P-2717

Serving JinShasan
049041
gyanmandir@kobatirth.org

श्री आगमोद्धारकग्रन्थमालाया दशमं रत्नम्

णमोत्थु णं समणस्स भगवओ महावीरस्स

# आगमोद्धारककृतिसन्दोहस्य

## द्वितीय – विभागः

प्रतयः ३७५, मूल्यम् रु. १-८७

वीरसं० २४८५
वि०सं. २०१५

परमपूज्य–गणिवर्यश्रीलब्धिसागरजीमहाराजना-
वर्षीतपनिमित्ते भेट

प्रकाशकः–
रमणलाल जयचन्द शाह
ठे. शेठ मीठाभाई कल्याणचन्दनी पेढी
कपडवंज (जि० खेडा)

संशोधकः–
परमपूज्य आगमोद्धारक–आचार्यप्रवर–
श्रीआनन्दसागरसूरिपुङ्गवपट्टधरः–
आचार्यश्रीमन्माणिक्यसागरसूरिः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्री आगमोद्धारकग्रन्थमालाया दशमं रत्नम्

णमोत्थु णं समणस्स भगवओ महावीरस्स

# आगमोद्धारककृतिसन्दोहस्य

## द्वितीय – विभागः

प्रतयः ३७५, मूल्यम् रु. १–८७

परमपूज्य–गणिवर्यश्रीलब्धिसागरजीमहाराजना-
वर्षीतपनिमित्ते भेट

वीरसं० २४८५
वि०सं. २०१५

प्रकाशकः–
रमणलाल जयचन्द शाह
ठे. शेठ मीठाभाई कल्याणचन्दनी पेढी
कपडवंज (जि० खेडा)

संशोधकः–
परमपूज्य आगमोद्धारक–आचार्यप्रवर–
श्रीआनन्दसागरसूरिपुङ्गवपट्टधरः–
आचार्यश्रीमन्माणिक्यसागरसूरिः

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

मुद्रकः-
श्री पंड्या प्री. प्रेस पृष्ठ १ थी ४८
सोमेश्वर मनसुखराम पंड्या
जम्बुसर (जि० भरुच)
वसन्तलाल रामलाल शाह पृष्ठ ४९थी९६
प्रगति मुद्रणालय
खपाटिया चकला सूरत W. R.

## प्राप्तिस्थानो-

१ श्रीजैनानन्दपुस्तकालय
गोपीपरा सूरत W. R.

२ श्रीसरस्वतिपुस्तकभण्डार
हाथीखाना रतनपोल अमदावाद

## ग्रन्थमालाना उदार सहायको

१५१) पू० गणिवर्यश्रीलब्धिसागरजीमहाराजना उपदेशथी श्रीटींटोइश्रावकश्राविकासंघना ज्ञानखातेथी

१५१) सु. श्राविका दीवालीब्हेन ते शेठश्रीजयन्तिलाल गणपतराम वखारीआनां मातुश्री सुरतवाला तरफथी कागल रीम सातना

५१) पू० मुनिश्रीसौभाग्यसागरजी म०ना उपदेशथी श्रीबोरसदश्रीमाली जैनसंघना ज्ञानखातेथी

सञ्चालक-रमणलाल जयचन्द शाह-

प्रकाशकः-
रमणलाल जयचन्द शाह
कपडवंज (जि० खेडा)

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

# प्रकाशकीय – निवेदन

आ आगमोद्धारककृतिसन्दोहना द्वितीयविभागमां प० पू० स्वर्गस्थ–गुरुदेव–प्रातःस्मरणीय–आगमोद्धारक–आचार्यदेवश्रीआनन्दसागरसूरिपुङ्गवनी कृतिओ छे; तेओश्रीए पोतानुं सम्पूर्णजीवन शासनसेवामां अर्पेलुं, जैनसाहित्यमां आगमशास्त्रो आदिने प्रकाशन कराववानुं अतिमहत्त्वनुं कार्य तेओश्रीए कर्युं छे. जैनशास्त्रो आदिनुं उंडु ज्ञान होवाने लीधे 'बहुश्रुत' तरीकेनी ख्यातिने तेओश्री पाम्या हता.

आनी पहेलांना प्रथमविभागमां ३८ कृतिओ अने आ द्वितीयविभागमां पण ३८ कृतिओ आपेली छे. आ तथा 'तात्त्विक प्रश्नोत्तराणि'नो विशालकायग्रन्थ अने हवे पछी प्रकाशन थता भा० ३, भा० ४, वगेरे तेओश्रीनी विद्वतानो पूरतो परिचय करावे छे, कृतिओना नामो ज पोताना विषयोने कही आपे तेवां छे.सदरहु प्रकाशनमां गच्छाधिपति–पू० आ० श्रीमन्माणिक्यसागरसूरीश्वरजीए मुख्यताए कृतिओनुं संशोधन कर्युं छे, पू० गणिवर्य श्री० चन्दनसागरजीमहाराजे मूलहाथपोथी परथी प्रेसकोपीओ करवी–मेळववी अने प्रूफो आदिसुधारवां वगेरेमां नोंधपात्र सेवाओ आपी छे आथी तेओश्रीओनो आभार-व्यक्त करुं छुं.प० पू० आगमोद्धारक–आचार्यदेवश्रीनी जन्मभूमि कपडवंज छे, तेम संसारि अवस्थामां अमारा कुटुम्बना हता. तेम तेओश्रीनो उपकार पण म्हारा पर अवर्णनीय छे. वर्त्तमानकालना आ अजोडगीतार्थ पुरुषे रचेली कृतिओ प्रसिद्ध करवा माटेनो लाभ मने प्राप्त थतां अनहद आनन्द प्राप्त थयो छे. दृष्टिदोषथी अगर प्रेसदोषथी जे कोइ खामी देखाय ते विद्वद्वर्योए शुद्ध करी लेवुं।

रमणलाल जयचन्द शाह

२०१५ भाद्रपद शुक्लाष्टमी कपडवंज



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥४॥

# अनुक्रमणिका


| | | पृष्ठम् | आ० नं. |
|---|---|---|---|
| १ | मङ्गलादिविचारः | १ | ६९ |
| २ | नयविचारः | ४ | ७१ |
| ३ | नयषोडशिका | ७ | २७ |
| ४ | निक्षेपशतकम् | ८ | ५४ |
| ५ | लोकोत्तरतत्त्वद्वात्रिंशिका | १३ | १४५ |
| ६ | व्यवहारसिद्धिषट्त्रिंशिका | १५ | ७० |
| ७ | कर्मफलविचारः | १७ | १८६ |
| ८ | परमाणुपञ्चविंशतिका | २१ | ७२ |
| ९ | भव्याभव्यप्रश्नः | २३ | १२३ |
| १० | अष्टकबिन्दुः | २३ | १९५ |
| ११ | स्याद्वादद्वात्रिंशिका | २५ | १०३ |
| १२ | अनन्तार्थाष्टकम् | २७ | २८ |
| १३ | पर्वविधानम् | २८ | १३९ |
| १४ | सूर्योदयसिद्धान्तः | ३० | ९७ |
| १५ | सांवत्सरिकनिर्णयः | ३३ | ९३ |
| १६ | पर्युषणारूपम् | ३८ | ११८ |
| १७ | ज्ञातपर्युषणा | ४० | १०८ |
| १८ | श्रुतस्तुतिः | ५३ | ८७ |
| १९ | ज्ञानभेदषोडशिका | ५५ | ३५ |
| २० | अनानुगामुकावधिः | ५६ | १९१ |
| २१ | प्रज्ञप्तपदद्वात्रिंशिका | ५७ | ३४ |
| २२ | अनुयोगपृथक्त्वम् | ५९ | १२ |
| २३ | निषद्याविचारः | ६४ | ११२ |
| २४ | सम्यक्त्वषोडशिका | ६५ | १५२ |
| २५ | सम्यक्त्वभेदविचारः | ६६ | १२६ |
| २६ | सम्यक्त्वभेदाः | ६८ | १५३ |
| २७ | सम्यक्त्वज्ञातानि | ७० | १२५ |
| २८ | क्षायिकभवसङ्ख्याविचारः | ७२ | १३२ |
| २९ | शमनिर्णयः | ७३ | १४८ |
| ३० | प्रतिमापूजाद्वात्रिंशिका | ७६ | १७४ |
| ३१ | प्रतिमापूजा | ७८ | ४२ |
| ३२ | प्रतिमापूजासिद्धिः | ८० | १७२ |
| ३३ | प्रतिमाष्टकम् | ८४ | ५५ |
| ३४ | जिनवरनुतिः | ८५ | १२४ |
| ३५ | देवद्रव्यद्वात्रिंशिका | ८७ | १७५ |
| ३६ | रात्रिचैत्यगमनम् | ८९ | ८१ |
| ३७ | देवतास्तुतिनिर्णयः | ९३ | ३७ |
| ३८ | गुरुस्थापनासिद्धिः | ९५ | १०२ |



॥४॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

# शुद्धिपत्रकम्

| पृष्ठम् | पङ्क्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १ | १२ | किं गुरु० | को गुरु० |
| ,, | १३ | स्यात् | स्याद् |
| ,, | १५ | त्वात् | त्वान् |
| ४ | ६ | न्यूनं | न्यूने |
| ,, | ७ | तन्तुः | जन्तुः |
| ,, | ८ | वाये न | वायेन |
| ,, | ८ | ०त्पादे न | ०त्पादेन |
| ६ | १२ | प्राग, अणु० | प्रा–गणु० |
| ११ | १६ | मूयान् | भूयान् |
| ११ | १८ | विघातुमनधमनाः | विधातुमनघमनाः |
| १२ | ४ | श्राद्धायोः | श्राद्धायो |
| १२ | १७ | ०यन | ०यनं |
| १४ | ४ | ०यित्यं | ०यित्वं |
| १५ | ३ | पाप | पापं |
| १६ | ४ | मुनिर्धर्मो | मुनिधर्मो |
| १७ | ६ | सम्यक | सम्यक् |
| १८ | ५ | ०व्या यैत्तऽ० | ०व्याद्यैर्यत्तेऽ० |
| १८ | ७ | कमणां | कर्मणां |
| १८ | १६ | द्द यते | दृश्यते |
| १८ | १७ | ०भि हि | ०भिर्नहि |
| १९ | ५ | निगच्छ० | निर्गच्छ० |
| ,, | ८ | आत्तरौद्रे | आर्त्तरौद्रे |
| ,, | ९ | ०ल | ०लं |
| ,, | ९ | ०न्तावि० | ०न्ताब्धि० |
| ,, | ९ | तेमू० | ०तेर्मू० |
| २० | ७ | ०राहत्पू० | ०रार्हत्पू० |
| २१ | १७ | प्रान्त्य | प्रान्त्यं |
| २२ | १६ | तर्काणु० | तर्कानु० |
| २४ | १ | तदथं त् | तदर्थकृत |
| ,, | २ | ०द्य द० | ०द्यं द० |
| ,, | ८ | विरहात् | विरहान् |
| ,, | १७ | मथुनं | मैथुनं |



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

| पृष्ठम् | पङ्क्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ,, | १७ | सम | समं |
| ,, | १७ | मूल | मूलं |
| २५ | ९ | ०राट् | ०राड् |
| २५ | १३ | मैत्रय | मैत्र्यां |
| २६ | २ | चतकान् | चैतकान् |
| २६ | ७ | बिश्व | विश्वं |
| २८ | ५ | ०दृग् | ०दृक् |
| ,, | ९ | पापा रतिः | पापारतिः |
| ,, | १२ | गृहस्थाः | गृहस्था |
| २९ | १ | चन्द्रावर्धितैः | चन्द्राभिवर्धितैः |
| ,, | ३ | षष्ट्याः | षष्ट्या |
| ,, | ८ | वर्षिकैः | वार्षिकैः |
| ,, | ११ | ०मासर्वा० | ०मासैर्वा० |
| ,, | १६ | ०घस्त्रो | ०घस्रो |
| ३२ | ११ | ०ममिम० | ०मभिम० |
| ३२ | १८ | ०पूर्णेत | पूर्णेति |
| ३३ | २ | केचिन्न० | केचिन्नै० |
| ३३ | ४ | यथो तमा० | यथोक्तमा० |
| ३५ | ५ | तादृग, | तादृग् |
| ३९ | १३ | ईर्ये० | ईर्यै० |
| ३९ | १७ | ०नकः | ०नकैः |
| ४१ | ३ | सवषा० | सर्वेषा० |
| ४१ | ९ | ०वस्थान | ०वस्थानं |
| ४२ | ४ | ०भिन्न | ०भिन्नं |
| ४३ | २ | ०व ण्हस्स | ०वयाजोण्हस्स |
| ४६ | ७ | सिद्ध | सिद्धे |
| ,, | ७ | ०चाय० | ०चार्यै० |
| ,, | १२ | ०निवृत्त | ०निर्वृत्तं |
| ,, | १३ | ०रब्ध | ०रब्धं |
| ४७ | १५ | ०दृश्य० | दृश्यं० |
| ४८ | ४ | ०वत्त० | ०वर्त्तं० |
| ,, | १३ | ०याम— | ०यामं— |



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

| पृष्ठम् | पङ्क्तिः | अशुद्धम् | शुद्धम् | पृष्ठम् | पङ्क्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|---|---|---|---|
| ,, | १४ | ०शंतो | ०शतो० | ८१ | ५ | भावे न | भावेन |
| ५३ | ४ | चूर्णि | चूर्णि | ८४ | ६ | ०श्रयं० | ०श्रय० |
| ५४ | ११ | स्व कां० | स्वकां | ८४ | ७ | उदयमागत् | उदयमगान् |
| ५४ | १७ | वृत्त | वृत्तं | ,, | ७ | किमुन | नैव किमु |
| ५५ | १ | श्रत० | श्रुत० | ,, | ८ | मुनयः, | मुनयः ?, |
| ६० | ७ | ०सिद्धि० | ०सिद्ध० | ,, | १४ | मत ? | मतः ? |
| ६० | १२ | ०समुहो० | ०समूहो | ८५ | १३ | ०धीर्षी | ०धीर्ष |
| ६७ | ५ | प्राप्त्वापि | प्राप्यापि | ८७ | ७ | प्रसा-रो० | प्रसारो० |
| ६९ | १० | सुख | सुखं | ८७ | १५ | च्छुट्टे० | च्छुटे० |
| ७० | १ | सुभैः | सुभैः | ८८ | ९ | ०माप्त | माप्तं |
| ७२ | ११ | ०ऽभ्र | ०ऽभ्रे | ८९ | २ | ०धानो | धानः |
| ७७ | ९ | महर्धिका | महर्द्धिका | ,, | १३ | ०लापो | ०लाषो |
| ७७ | १८ | ०हृतां | ०हृतां | ९० | १२ | ०वन्दम० | ०वन्दनम० |
| ७८ | ६ | ०ध्यैग्त्लानो- | ०धैर्ग्लानो- | ९१ | १ | था क० | ०थाक० |
| ७९ | १५ | चहु० | बहु० | ९१ | १० | ०हिण्डयां | ०हिण्ड्यां |



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

# नूतन प्रकाशनो

| | | | | |
|---|---|---|---|---|
| १ | सर्वज्ञशतक | उपा. श्रीधर्मसागरजीकृत | पत्राकारे | भेट |
| २ | तात्त्विकप्रश्नोत्तराणि | आगमोद्धारककृत | ,, | ७-५० |
| ३ | आगमोद्धारककृतिसन्दोह | प्रथम विभाग | ,, | ५-५० |
| ४ | ,, | द्वितीय विभाग | ,, | १-८७ |
| ५ | ,, | तृतीय विभाग | ,, | प्रेसमां |
| ६ | ,, | चतुर्थ विभाग | ,, | ,, |
| ७ | षोडशकजीपर आगमोद्धारकनां व्याख्यानो भाग बीजो गुजराती अने आगमोद्धारकश्रीनी बे कृतिओ सानुवाद | | बुकाकारे | २-७५ |
| ८ | कुलकसन्दोह | पूर्वाचार्यकृत | ,, | ०-७५ |
| ९ | सन्देहसमुच्चय | श्रीज्ञानकलशसूरिनिर्मित | ,, | ०-७५ |
| १० | जैनस्तोत्रसञ्चय | आमां सोमसुन्दरसूरिकृत मुनिसुन्दरसूरिकृत तथा पूर्वाचार्यकृत स्तोत्रो छे | ,, | प्रेसमां |
| ११ | अष्टादशस्तोत्री ( अवचूरिसमेता ) | | | ,, |

— मुख्यप्राप्तिस्थान —

## जैनानन्द पुस्तकालय, सूरत

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ॐ नमो जिनाय

आगमोद्धारक–आचार्यप्रवरश्रीआनन्दसागरसूरिवरनिर्मितः

# मङ्गलादिविचारः (१)

शास्त्रादौ मङ्गलं योगं, साध्यं वाच्यान्वितं बुधः। वक्ति प्रेक्षावतां यस्मा–च्छ्रुतिर्विघ्नोज्झिता स्थिरा ॥१॥ विनोदकं प्रशस्तपरिणामात् स्याद्, विघ्नानां द्रवणं क्षणात् । जिनाद्यालम्बनः शस्तः, सोपि तन्मङ्गलं वदेत् ॥२॥ विनोदकं लवं वह्नेर्विध्यातं वीक्ष्य कोविदैः। प्रदीपने न विश्वस्तैः, स्थेयं तद्वच्छ्रुतादृतौ ॥३॥ अल्पविघ्नो नयेन्निष्ठां, प्रारब्धं मङ्गलं विना । विघ्नभोगेन विदुषां, ततोऽनास्था न मङ्गले ॥४॥ नोदकौघेन दावस्य, शान्तिर्दृष्टा तत न किं । प्रदीपनोपशमने, जलौघः क्षिप्यते जनैः? ॥ ५ ॥ पापप्रणुत्तये प्रायः, शास्त्रारम्भः शुभात्मनां । सा शास्त्रानुसृतेः सिध्येत्, तत्कर्तुस्तन्नतिं व्रजेत् ॥ ६ ॥ श्रोतारः श्रवणात् शुद्धभावा भगवदादरात् । नयन्त्यविघ्नं निष्ठां तन्-मनीषी मङ्गले लगेत् ॥७॥ स्वविकल्पकृतं नेदं, दर्शितं सर्वदर्शिभिः । गुरुभिश्चोपादिष्टं त-ज्ज्ञायते मङ्गलादरात् ॥८॥ कृतज्ञाः कृतिनः कार्य-मुपकारकरान् नरान् । सदा स्मृत्वा सृजन्तीह, तत्कार्यं मङ्गलं बुधैः ॥९॥ किं देवः किं गुरुर्वक्ता, धामास्तिक्यस्य वा न वा । इत्युदीरितसंदेहं, श्रोतारं सान्त्वयेदतः ॥१०॥ कल्पितं कल्पवृक्षात् स्यात्, यद्वत्तद्वदिह क्रमात् । विघ्नापहं स्थितिकरं, सन्तानाच्छित्तिकृत्परम् ११॥ आदौ निर्विघ्ननिष्ठायां, कामना मध्यमे स्थितौ । अभ्यस्ते शिष्यसन्तान-दाने तत्(ता) मङ्गलत्रिकात् ॥१२॥ त्रिधा मोदकवद्भागो, नान्तरा विपरीतता । श्रुते कर्मक्षयार्थत्वात् मङ्गले श्रोतृबुद्धये ॥१३॥ आमे घटे यथा पाथ-स्तथाऽपात्रे श्रुतं ततः । अधिकारी समुद्देश्यो, येन नान्यापकारिता ॥१४॥ मुक्तये शासनारम्भः, सा न

आ. श्री कैलाससागरसूरि ज्ञानमंदिर
श्री महावीर जैन आराधना केन्द्र, कोबा,
गांधीनगर



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

आगमो-
द्धारक-
कृति-
सन्दोहे
॥२॥

वाङ्मात्रतो भवेत् । श्लिष्टतामुभयोर्ब्रूयात्तद्योगः सार्थको मुखे ॥१५॥ अतीन्द्रियाणामर्थानां, शिष्टानां स्वल्प-
वेदिभिः । न प्रामाण्यं ततो वाच्यं, सर्वज्ञैतिह्यमादितः ॥१६॥ आनन्तर्येण परतो, द्विधा फलप्रदर्शनात् ।
योगस्य वाच्यताऽऽरम्भे-ऽन्यथोत्कृष्टे फलेऽत्ययः ॥१७॥ न चेत्साध्यमुदीर्येत, विभिन्नरुचयो जनाः । स्वेष्टसि-
द्ध्यै क्षमं मत्वा, कुर्युः किं श्रुतियोजनाः ? ॥१८॥ मते जैनेऽप्यनेकानि, तत्त्वानि स्वेष्टसिद्धये । तद्वाच्यमादितो
वाच्यं, श्रोतॄणां बुद्धिशुद्धये ॥१९॥ शास्त्रकारा महात्मानो, भाषन्ते वितथं नहि । क्वचित्तदन्यथाभावे नाविश्रम्भो
महात्मसु ॥२०॥ प्रतिशास्त्रमुदीर्यन्ते, चत्वार्येतानि सूरिभिः । कृतिक्रममपेक्षन्ते, श्रोतारो नापि देशकाः ॥२१॥
मङ्गले विहिते ज्ञात्रा,सामर्थ्यात् शेषमूह्यते । तथापि स्पष्टबोधार्थं, शेषत्रयप्रसाधनम् ॥२२॥ श्रोतॄणां न समा
बुद्धिः, समेषां कर्मणां यतः । शमश्चित्रस्ततःसर्वे, नैवं चिन्तयितुं क्षमाः ॥२३॥ कर्ता श्रोता च जैनोऽत्र, न
च स्वच्छन्दवाक्पदं । भवानुबन्धं ब्रूयान्न, न चैकनयसंश्रितम् ॥२४॥ क्वचिद् शास्त्रकृतो ग्रन्थे, लक्षीकृत्य
बुधान् परान् । आचख्युर्मङ्गलं ह्येकं, शेषजिज्ञापयिषया ॥२५॥ जिनेन्द्रा देशनारम्भे, कृतार्था अपि पर्षदि ।
लोकप्रवृत्तये ख्यान्ति, तीर्थाय नम इत्यपि ॥२६॥ वक्ता जिनो गणाधाराः, श्रोतारो बीजबुद्धयः । शासनो-
दितये ब्रूते, वस्तु सर्वनयाश्रितम् ॥२७॥ श्रुतं भगवताऽऽख्यात-मित्यूचाना गणाधिपाः । मङ्गलं चक्रिरे स्पष्टं,
निष्ठास्थेमाव्ययप्रदम् ॥२८॥ परमेष्ठिनमस्कार आद्यावश्यकदेशने । सुकर्तव्यतयाऽवश्यं, निर्युक्तौ देशितस्ततः
॥२९॥ शेषेष्वावश्यकेष्वेवं, सूत्रेषु क्रियते बुधैः । मङ्गलस्य कृतिः कार्या, ध्रुवं तन्नात्र संशयः ॥३०॥
आद्याङ्गचूर्णिकृत्प्राह, श्रुतं मे प्रमुखं वचः । अधिकारतया तस्मात्, शेषाङ्गादौ वचस्तकत् ॥३१॥ यत्र स्पष्ट
उपोद्घातोऽनुवृत्तिस्तस्य ना भवेत् । अपेक्षातोऽधिकारो यत्, सर्वन्यायविदां मतः ॥३२॥ एतत्सूत्राण्य-
पेक्ष्योक्त-मर्थमाश्रित्य मङ्गलम् । उपोद्घातस्य निर्युक्तौ, ज्ञानपञ्चककीर्त्तनम् ॥३३॥ तथापि प्रतिनिर्यु-
क्ति पार्थक्यात् मङ्गलादरः । तत्कृतां यद्विशेषेण, तद्वाच्यं तत्र कथ्यते ॥३४॥ वाङ्मयेषु न शेषेषु, तथा

मङ्गला-
दि-
विचारः

॥२॥

तथा लेशान्नियन्त्रणा । ततः स्पष्टा कृता विज्ञैर्मङ्गलादेस्दाहृतिः ॥३५॥ इष्टादिदेवनत्या यत्, शस्तवस्तुप्रणोदनात् । यच्चाशीर्वाक्यतश्चक्रुर्मङ्गलं तच्छुभाशयात् ॥३६॥ पापानुबन्धिपुण्येन, नास्तिकानामघात्मनां । ग्रन्थनिष्ठा न सा शुद्धमतीनामवलम्बनम् ॥३७॥ पणाङ्गनाद्युतिं भोग-मधमर्णस्य पुष्टतां । श्वयथोः प्रेक्ष्य सद्बुद्धिः, को जह्यात् भावमुत्तमम् ॥३८॥ हितं स्वस्मै परस्मै चायत्यां तदनुबन्धवत् । परं यस्माद् बुधा बोधे, तादृशे सततं रताः ॥३९॥ अतो धर्मश्च मोक्षश्च, परमार्थविदां मतौ । उपदेश्यतया वाच्यौ, ततस्तावेव पण्डितैः ॥४०॥ श्लाघाऽर्थकामयोः क्वापि, या सङ्कीर्णकथादिषु । साऽऽक्षेपिण्या हितोद्देशान्नांशतो दोषभाजनम् ॥४१॥ यथा बालं प्रसूर्ब्रूयाद्यच्छन्त्यगदं गदापहं । पिबेदं मोदकं दास्ये, तद्वदेतन्न तात्त्विकम् ॥४२॥ आविष्कृता गणाधीशै-श्चतुर्णां पुरुषार्थता । अर्थकामौ हि धर्मात् स्त, इत्याख्यातुं न तत्त्वतः ॥४३॥ अत एव समाचख्यु-र्हरिभद्रा मुनीश्वराः । देवमानुषवीर्यर्द्धिवर्णनं देशनाकृताम् ॥४४॥ विपाकविषमावर्थ-कामौ चेत्तौ कथं फलं? । धर्मस्येतरथा किं तौ पुरुषार्थौ न सम्मतौ? ॥४५॥ विना धर्मं न लाभादे-र्विघ्नस्य विलयो भवेत् । तदृतेऽर्थसुखे नैव, पुरुषार्थौ न किं तकौ ॥४६॥ सनिदानः कृताशंसः, सातिचारः शमं विना । कृतो धर्मो विना चाज्ञां, कामार्थौ विरसौ सृजेत् ॥४७॥ अकामनिर्जरा जन्तो-रर्थकामविधायिनी । देवायुषो यतो बन्धस्तन्नोत्तीर्णमिदं श्रुतात् ॥४८॥ चन्दनादुत्थितो वह्निर्यथा भस्मीकरोत्यलम् । तथा धर्मोत्थितावर्थ-कामावायतिदुःखदौ ॥४९॥ अनुकूलतया जन्तुं, यतो वेदयते सुखं । भवाभ्यासात्तदर्थ्यंगी, कामार्थौ तन्न मतौ फलम् ॥५०॥ विपाकविरसत्वाद्धि, विरतेरुपदेशनं । तयोस्ततो न विदुषां, सम्मता पुरुषार्थता ॥५१॥ इत्थं चैतदिहेष्टव्यं, यद्बुधः परिणामदृक् । सम्पूर्णार्थविनिश्चायी, श्रोता वक्ता च मोक्षगः ॥५२॥ लब्ध्वा धर्ममशेषजन्तुकरुणाक्लिन्नोरसावेदितं, सद्योगं विनियोजनेन कुरुते दृष्ट्वा जगद् दुःस्थितं । मत्वा विश्वजनीनधर्मकथनं स्वान्यात्मपावित्र्यकृत्, कुर्यान्न मङ्गलमुख्यसन्धिचतुरो ग्रन्थं सदानन्ददम् ॥५३॥ इति मङ्गलादिविचारः ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

# नयविचारः (२)

कृतार्थोऽवाप्य कैवल्यं, तथाभव्यत्वभाविदन् । तीर्थं दिदेश भगवा-न्निश्चयव्यवहारयुक् ॥१॥ सामग्रीमाप्य जीवः स्याद्, बहुधा परिणामभाक् । परिणामितया योग्यो, न मृदस्तन्तुजोद्भवः ॥२॥ समवेतं परे प्राहुः, कार्यं तन्नैव युक्तिमत् । पटो जायेत तन्तुभ्यः, तन्तवश्च पटोद्भवाः ॥३॥ एकतन्तुविनाशे स्यात्, तेषां पटविनाशनं । कृतिं विनेतरद् वस्त्र-मुत्पद्येत च तत् कथम् ॥४॥ परिणामी भवेद्धेतुर्यावन्तस्तन्तवः पटे । परिणाममितास्तावन्मात्रा पटमितिस्ततः ॥५॥ न्यूनं वृन्देऽथ तन्तूनां, न्यूनो यथा पटो भवेत् । तथाऽपायेपि केषाञ्चि-त्पटात्तेषां मितिः परा ॥६॥ तन्तूनां नाशको तन्तुः, केषाञ्चित् घातको मितेः । प्राक्तनायाः पटस्यैष, नूत्नाया जनकोपि स ॥७॥ अवनामस्तुलादण्डे, यथोन्नामाविनाकृतः । प्राक्पर्यायविनाशेऽपि, तथान्योत्पत्तिरिष्यताम् ॥८॥ समवायोऽपि सम्बन्धः, कल्पितो नैव तात्त्विकः । न श्लेषादिरिवेक्ष्यन्ते, समवाया हि कुत्रचित् ॥९॥ असत्त्वे समवायस्य, का समवायिकार्यता ? । अभावे तस्य को हेतु-र्भवेदसमवायतः ॥१०॥ पटनाशे च तन्तूना-माविर्भावात् न हेतुता । पटस्य समवाये न, तन्तूनां न्यायदृष्टितः ॥११॥ पटोत्पादे न तन्तूनां, नाशस्तत्समवायिता । वस्त्रात् तन्तुसमुत्पादे, न वस्त्रं तत्कथं सका ? ॥१२॥ एवं वदन् समेतस्त्वं, शुभे स्याद्वादवर्त्मनि । वस्त्रस्योभयरूपत्वाङ्गीकारो नान्यथा तव ॥१३॥ तथा तन्तौ पटांशे किं, सति युक्तिविहीनता । व्यूतौ जायेत नूत्नं नानुपादानं समीक्ष्यताम् ॥१४॥ इष्येत चेत् परीणामो, रुताद्वस्त्रं च तन्तवः । मृदः कपालौ कुम्भश्च, तत्ते परिणामिकारणे ॥१५॥ तथा च खण्डयोर्वस्त्र-कुम्भयोरुद्भवे नहि । कर्त्तव्येश्वरकर्तृत्व-कल्पनाऽपि सचेतसाम् ॥१६॥ यथा(तो)ऽतनुः प्रभुः खण्डकार्योद्भूतौ समिष्यते । श्रद्धयाऽयुक्तया तां तत्यक्त्वा परिणामितां श्रय ॥१७॥ उपादानं शिवोत्पादे, जीवः कर्मच्युतिः पुनः । इतरत्कारणं सर्वं, शेषं



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

साधारणं मतम् ॥१८॥ मनुते व्यवहारोऽत्र, कार्यं सन्नैव कारणे । कार्योत्पादाय तद्यत्नः, क्रिया तन्नाफला सभा ॥१९॥ ब्रूतेऽत्र निश्चयो हेतौ, सदा कार्यं न यत्कृतिः । मृदं विहाय कुम्भस्य, तन्त्वादौ सम्भवेत् क्वचित् ॥२०॥ आविर्भावोऽत्र कार्यस्य, कृतिसाध्यो न यत्क्वचित् । एकस्मिन् सर्वकार्याणा-मुत्पत्तिः कारणे मता ॥२१॥ साधयेद् यत्र यत् सत् स्याद्, नान्यद् यतस्ततो नहि । असतः खरशृङ्गादेरुत्पत्त्यै यत्नवान्नरः ॥२२॥ हेतुतां मन्यते हेतोः, सजातीनां नयः परः । समेषां निश्चयो नैव, किन्तु कार्यकृतां तकाम् ॥२३॥ भव्यस्य मोक्षगामित्वं, व्यवहारोऽभिमन्यते । अयं तु सिद्धं भव्यत्व-भाजमाह न चापरम् ॥२४॥ पलालं न दहत्यग्निर्भज्यते न घटः क्वचित् । नरकान्निर्गमो नास्ति, शून्यं न च प्रवेश्यते ॥२५॥ प्रव्रजेन्नाग्मुनिर्नैव, मिथ्यादृक् शुद्धदृग् भवेत् । अज्ञानी नाप्नुयात् ज्ञानं, संसारी नैव सिद्ध्यति ॥२६॥ निश्चयोऽत्र वदन्नेवं, प्राह धर्ममयोगजं । शेषं तदुपचारेण, यावदप्रमदं मुनिम् ॥२७॥ कुर्वद्रूपं वदन् कार्यं, वदत्यर्वाग् न साधुतां । चरणोपहतौ ज्ञानं, दर्शनं केवलं न च ॥२८॥ गुणधाम्नो मतेऽस्याऽऽद्याज्जन्तुर्व्रजति सप्तमम् । मौनं सम्यक्त्वमाहाऽतः, सम्यक्त्वं मौनमेव च ॥२९॥ अस्यात्मा स्वगुणारामी, मोहं त्यक्त्वा भजन्निजं । चारित्रं दर्शनं ज्ञानं, कषायेन्द्रियनिर्जयात् ॥३०॥ नास्याविरतसद्दृष्टिर्न देशविरतो न च । प्रमत्तसंयतश्चापि, व्यवहारात् समेप्यमी ॥३१॥ न शङ्काद्या अतीचारा, न च बन्धवधादयः । न चाप्रशस्तयोगाद्याः, किन्त्वेते भङ्गभाजनम् ॥३२॥ ततो ये निश्चयं ख्यान्त, आत्मवेत्तृत्वमानिनः । ब्रुवन्तो मार्गशंसित्वं, सदाऽऽरम्भकिञ्चनाः ॥३३॥ गुरुत्वं स्वेषु सर्वेषां, श्रोतृणां रोपयन्ति च । श्राद्धसाधुपदस्थानां, जुगुप्सन्ते सदा क्रियाम् ॥३४॥ सूत्रानुसारतस्तेषां, निश्चयाभासमग्नता । नाकल्पानां श्रियं राज्ञां, विन्देद्रीरिमयं क्वचित् ॥३५॥ ज्ञानेनोद्योतिते मार्गे, भास्करेण तमो नहि । तथाऽऽत्मरूपविज्ञाने, न लवो मोहसीधुजः ॥३६॥ कलत्रेष्वादरं द्युम्ने, मनोवृत्तिमघोचये । इन्द्रियेष्वभिरामित्वं, बालिशत्वं गतोपमम् ॥३७॥ कषाये स्विन्नचित्तत्वं, धारयन्तो दिवानिशम् ।



P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

अध्यात्मब्रुवाः सुश्लाघां, न लभन्ते कदाचन ॥३८॥ न क्षमा व्यवहारे ये, कथं ते निश्चये क्षमाः ? ।
स्युर्नौतुराखुदष्टाक्ष आखुहा गन्धमात्रतः ॥३९॥ रजःसङ्गो यथाऽक्लिन्न-गात्रे नो नैव चाङ्कुरः । दग्धे बीजे,
मलाविद्धे जठरे न शमक्रिया ॥४०॥ नाधौते वसने रङ्गो, भित्तौ चित्रं न चाशुचौ । चित्ते न निश्चयोल्लाषे
व्यवहारापहा वृषः ॥४१॥ अवाप्तकेवलाश्चात, एवारम्भपरिग्रहौ । तत्यजुर्यन्न रमणं, क्षीणमोहा दधुर्भवे ॥४२॥
निश्चयेन विहीनानां, व्यवहारव्रताद्यपि । न शिवाय ततोऽभव्या, व्यवहारपरा अपि ॥४३॥ मिथ्यादृशो
भवे भ्रान्ता, मोक्षश्रद्धानवर्जिताः । नाबीजे पुष्करावर्त्ते, वृष्टेऽप्यङ्कुरसम्भवः ॥४४॥ गोप्त्रे चिलातिपुत्राय,
पटवे नरकायुषः । चौर्यात् कन्यावधात् को न, निश्चयाय स्पृहां वहेत् ॥४५॥ घातिनो भ्रूणगोब्राह्म-कलत्राणां
खलात्मनः । दृढप्रहारिणस्त्रातुर्निश्चयस्य यशोऽनघम् ॥४६॥ निश्चयाद् भारतीमृद्धिं, लक्षाधिका वहन् वधूः । धारयन्
भूषिताङ्गोऽयात्, केवलं भरतो नृपः ॥४७॥ अनवाप्तं यया पूर्वं, न कदापि सुदृग् व्रतम् । मरुदेवीभशीर्षस्था,
निश्चयात् केवलं गता ॥४८॥ व्यवहार: श्रियै नैवानिश्चयस्तेन भूपते: । उदायिनो निहन्तुर्न, श्रेयसी मुनिता
मता ॥४९॥ अङ्गारान्मर्दयन् सूरिर्वी रजीवा अमी इति । ब्रुवन् गच्छाद् बहिश्चक्रे, व्यवहारपरायणः ॥५०॥
बोधाय निश्चयस्य प्राग्, अणुसर्वव्रताद्दतौ । प्राज्ञैरनुमता पृच्छा, न तत्को निश्चयं श्रयेत् ॥५१॥ कर्मबीजं
तृषापाथः-सिक्तं जन्माङ्कुरं सृजेत् । परिणामाच्च तज्जन्म, तन्मुक्त्यै निश्चयं भज ॥५२॥ सद्दर्शने भवेद्धेतुर्यः
सैषोऽन्यद्दगुद्भवे । ज्ञानेऽज्ञाने च चरणे, बकुशत्वे च मन्यते ॥५३॥ आद्याङ्गेऽतः स्मृतं सूत्रं, गणधारिभि-
रभ्रमैः । आश्रवा ये परिश्रवाः, परिश्रवास्त आश्रवाः ॥५४॥ ज्ञानं नादर्शने मौन-मात्मबोधमृते स्मृतम् । तान्य-
न्तरेण मोक्षो न, निश्चयाद्दर्शनं भज ॥५५॥ आसादयेयुरनघ-दर्शनाः शाश्वतं पदं । नादर्शना मुनिजना, नि-
श्चयं तद्भजस्व भोः ! ॥५६॥ मतं दर्शनज्ञानाभ्यां, तीर्थं कैश्चिन्मनीषिभिः । अतस्तद्दृष्टयश्चाप्ता, न तास्तात्त्वि-
कवित्तमैः ॥५७॥ अप्रवृत्ता न योगाः स्यु-रनगारपदप्रदाः । सर्वेऽन्यथा शिवेऽस्थास्यन्, सुप्ता मूर्च्छितचेतसः ॥५८॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अप्रवृत्ता यदा योगास्तदा ध्यानं शिवार्पकम् । इति बुध्यन्न विद्वन् किं, निश्चयं श्रयसे शिवम् ॥५९॥ आत्मरूपमचारित्रं, बुध्यमानो बुधः किमु । व्यवहारफलं शुद्धं, निश्चयं श्रयते सदा ॥६०॥ अवाप्य केवलज्ञानं, लोकालोकावलोककं । व्यवहारप्रवृत्त्यर्थं, तीर्थं तीर्थाधिपोऽब्रवीत् ॥६१॥ एवं शास्त्रसुधारसं सुमनसः कर्मामयोज्ञासनं, श्रीमत्तीर्थकरोदितिं धृतधृतिं सम्पीय शुद्धाद्दतिं । नित्यं गच्छत चिन्मयेन मनसा निश्चायकं सद्गते-स्तीर्थं निश्चयसंश्रितं शिवपदानन्दप्रदं भाविनः ॥६२॥ इति नयविचारः ॥

## नयषोडशिका (३)

सूत्रेणानुगतार्थानां, व्याकृतानां तदाश्रितैः । निर्युक्त्यादिभिः सदर्थानां, स्यान्नयद्वारयोजनम् ॥१॥ परं ज्ञानक्रियाभिख्यौ, नयावावश्यके मतौ । तत्रास्ति कारणं तावद्यत्करणाश्रितं मतम् ॥२॥ आदावेव प्रतिज्ञातं, मोक्षो ज्ञानक्रियाद्वयात् । स्पष्टं कृतं नयद्वारे, साधुलक्षणनिश्रया ॥३॥ शुद्धं सर्वनयैरेतत्, साधुर्यचरणे गुणे । स्थित एवं च साध्योऽर्थ, उपसंहृत्य दर्शितः ॥४॥ चरणं न विना ज्ञानं, दर्शनं च ततस्त्रिकम् । चरणस्य स्थितौ मोक्ष-मार्गसिद्धिर्न दुष्करा ॥५॥ साधुक्रियागतं सर्वमावश्यकमुदीरितं । व्याख्या चापि कृताऽस्यैवं, तन्नयाः साधुनिश्रिताः ॥६॥ आवश्यकेषु मुख्याङ्गं, प्रतिक्रमणमीरितं । हेयः कार्यश्च तत्रार्थो, द्विधोक्तोऽस्ति पदे पदे ॥७॥ ततो ज्ञाते ग्रहीतव्येऽर्थेऽग्रहीतव्य इत्यपि । द्विधा विचार्य यत्यं च, नयवादसुधाश्रितैः ॥८॥ सर्वत्र वा विध्यविध्योः, सत्त्वं विज्ञाय धीधनैः । विधिं स्वीकृत्य यत्नेन, वर्तितव्यं नयैर्मतम् ॥९॥ एवं चारित्रसूत्रेषु, नयद्वारावधारणं । युक्तं परं परेष्वत्र, सूत्रेषु किन्तु युज्यते ॥१०॥ सन्त्यत्र शासने जैनेऽनुयोगा इतरेपि च । द्रव्यकालकथाश्लिष्टाः, परं ते चरणाप्तये ॥११॥ स्वस्वस्थानेषु स्यात्तेषां, नयद्वारोदितिः पृथक् । तांस्तान् पदार्थानाश्रित्य, तथापि न विरुद्धता ॥१२॥ लोके वाक्यानि कथ्यन्ते, यथा द्रव्याद्यपेक्षया ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तदर्थं बुध्यते बोद्धास्तत्तद्रव्याद्यपेक्षया ।।१३।। सूत्रोक्तयोऽपि तन्नत्रोवता द्रव्यादिसमाश्रिताः । नयद्वारे विविच्यैतदाख्येयमिति युक्तिमत् ।।१४।। उपक्रमे नयद्वारं, प्रामाण्याय विवेचितं । नयद्वारेऽत्र तुर्ये तु, सर्वं सूत्रं विचार्यते ।।१५।। सर्वत्र नो जनाः सर्वेऽधिकारं सेवितुं क्षमाः । तुर्ये ततो नयद्वारे, यथाश्रोत्रुपसंहृतिः ।।१६।।

इति नयषोडशिका ।।

---

## निक्षेपशतकम् (४)

चारित्रं नाज्ञातुर्दर्शनहीनस्य नैव सज्ज्ञानम् । एतत्त्रिकं विना न च मोक्षो भविनोऽपि जायेत ।।१।। निक्षेपैरर्थानां सर्वेषां स्यादधिगमात् जन्तोः । नयमानैर्निर्देशाद्यैः सदाद्यैश्च सद्दृष्टिः ।।२।। भावा भुवने द्वेधा, आराध्या इतरथा च चिद्वेद्याः । समवसरणवर्त्ती जिन, आराध्यो भावदेवतया ।।३।। यस्याराध्यो भावो नामाद्यास्तस्य वन्दनीयाः स्युः । तीर्थंकरनामाद्या निक्षेपास्त्रय इतो वन्द्याः ।।४।। नन्वेवं चक्रयाद्याः सिद्धिगतौ गामिनस्ततस्तेषां । नामादीन्याराध्यान्यतो हि नयात् किं न सर्वेषाम् ? ।।५।। अथ भावानुसरणतो नामाद्या वन्दनीयताधाम । तर्हि जिनाधिपतेर्न च्यवनाद्यनुमोदनीयतया ? ।।६।। किंच शलाकापुरुषाश्चक्रयाद्यास्तेन तत् त्रिकं वन्द्यं । नामादीनामेवं सति हर्याद्यर्चनं किं न ? ।।७।। सत्यं, द्रव्यत इष्टः शुद्धनयेनान्तिमो भवः सिद्धेः । पूज्यतया चक्रयाद्यास्तस्मिन् सिद्धा भवे नैव ।।८।। सिद्धेर्वा याऽवस्था तां निक्षिप्यार्चयेत् सुधीस्तेषु । नैवांशतोऽस्ति दोषो यच्छेषं भावमनुसरति ।।९।। अत एव जिनेन्द्राणां सिद्धत्वं प्रतिकृतौ समावेश्य । आरोप्यावस्थाद्वयमर्च्यते विज्ञैः श्रुताधारात् ।।१०।। अर्हन्तोऽचिन्त्यपुण्यप्राग्भारास्तद्भवोऽखिलस्तेषां । आराध्यो विधिविद्भिस्तत् किञ्चित् शङ्कनीयं न ।।११।। च्यवने जिनस्य शक्रः स्तवीति शक्रस्तवेन तं तस्मात् । एवं जन्मनि नामान्वयोद्वहादिष्वपि ज्ञेयम् ।।१२।। कल्याणकानि पञ्च तु जिनस्य लोकानुभावतोऽर्च्यानि ।



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

आगमोद्धारक-कृति-सन्दोहे ॥९॥

निक्षेप-शतकम्

तत्तेषां नानर्च्यं किञ्चिद्दृष्टं ह्यपि श्रेष्ठम् ॥१३॥ न भ्रियते विनताऽङ्के यत्तन्मोहप्रभाववैषम्यात् । यद्धौतोऽपि विकारो न तस्य नश्येत् श्रुतौघोक्त्या ॥१४॥ आर्हन्त्यं कर्मोदयप्रभवमपि प्राज्यधर्मदेशनया । पूज्यतमं, तद्वदेव हि जिनस्य सर्वं बुधैर्ज्ञेयम् ॥१५॥ नातश्चक्री जिनपोऽष्टमादितप आतनोति देवार्थं । भरताद्यास्तु वितेनुः पुण्यचयो यत्तथा नैषाम् ॥१६॥ प्रतिमा जिनस्य वन्द्याः कथयति धर्मं विभौ दश द्वे च । तिष्ठान्ति परिषदस्ताः समवसृतौ चतुर्मुखजिनाग्रे ॥१७॥ प्राग्मुख उपविशति जिनः शेषदिशासु प्रतिकृतीस्तस्य । तनुते सुरस्ततोऽसावमरकृतः कथ्यतेऽतिशयः ॥१८॥ जिनजिनबिम्बविशेषो यदि स्याल्लेशात् ततो न ता दिक्षु । संसद आयोजितकरकमलाः सुस्थाः स्थितिं कुर्युः ॥१९॥ अर्हत्प्रतिमानां नतिपूजनसत्कारकारणाद् हेतोः । बोधेर्लाभः शिवपदमुक्तं तत्साधकं न किमु ? ॥२०॥ सुरलोकविमानेषु प्रभोरशेषेषु मूर्त्तयो नित्याः । अष्टाधिकशतमानाः कल्याणायार्चिता देवैः ॥२१॥ सम्यग्दृष्टिजीवो नाधर्मं धर्मतापदं विद्यात् । तन्न सुराणां जिनबिम्बपूजनतो धर्मधीर्व्यर्था ॥२२॥ प्रतिनगरं जिनचैत्यान्याद्योपाङ्गोपवर्णितानि किमु । नाद्राक्षीर्बुध! यत्त्वं ब्रवीषि नूत्ना यतः प्रतिमाः ॥२३॥ जङ्घाचारणविद्याचारणमुनयो नतिं व्यधुः किं न ? । बिम्बानां जिनराजां भगवत्यङ्गे स्फुटं विद्वन् ? ॥२४॥ प्रतिषिद्धाऽर्हत्प्रतिमानतिरानन्देन परमताश्रयणे । आद्योपाङ्गे चाम्बडमस्करिणोहस्व तन्मनसा ॥२५॥ द्रौपद्या सूर्याभामरवन् महितानि जिनपबिम्बानि । श्रीज्ञातधर्मकथासु निमील्य नेत्रे तदूहस्व ॥२६॥ दुग्धं न काष्ठधेनुर्दत्ते यद्वत्तथाऽर्हतो मूर्त्तिः । साधयति शिवं नैव, व्यर्था तन्मूर्त्तिरित्यज्ञः ॥२७॥ जम्बूद्वीपाद्याकृतिमीक्षित्वा किं तद्धिय धत्से ? । किं च नरकादिचित्राण्युपदर्श्य ननोषि पापभियम् ? ॥२८॥ सत्यं वीरजिनं किमु निर्णयसि विनाऽऽकृतिं तदात्वेऽपि ? । शय्यम्भवार्द्रकुमरोद्बोधं किं नैव चिन्तयसि ? ॥२९॥ वनिताचित्रं मनसो विकारजनकं ततो भवांस्त्यजसि । तद्युतमालयमासात् किं न तथेक्षणात् शुद्धिः ? ॥३०॥ लोपित्वा जिनमूर्तीर्विधापयन् बिम्बमात्मनः साक्षात् । भक्तानां दर्शनमुदं न लज्जसे

॥९॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धारयन् मौनम् ? ॥३१॥ दुग्धं किं नामधेनुर्ददाति यज्जापमातनोषि सदा। भावविशुद्ध्यै चेतसा द्विकेऽङ्क जग्धा यदेवं वाक् ॥३२॥ दूरस्था किं धेनुर्ददाति दुग्धं न चेज्जिनादींस्त्वं। लभसे भव्यं स्मरयन् भावाच्चेत् सोऽत्र किमु नष्टः ? ॥३३॥ जिनबिम्बानां पूजा मनःप्रसत्त्यै ततः समाधिश्च। तस्मादमलं शिवपदमतो हि तत्पूजनं न्याय्यम् ॥३४॥ सामायिकसूत्रं त्व पठन् भदन्तेति कं समुद्दिशसि ?। गुर्वाकृतिं गुरुं वा विनाऽन्यथा तन्मृषा न किमु ? ॥३५॥ आवश्यकं तृतीयं तन्वन् चरणं स्पृशसि ननु कस्य ?। निजमस्तकेन गुर्वाकृतिं गुरुं वा विना साधो! ॥३६॥ अनुयोगेष्वत इष्टं स्थाप्यतयाऽऽवश्यकं प्रतिक्रमणे। अक्षादि तद्विचिन्तय चेत्सूत्राराधनाकामः ॥३७॥ गुरुविरहे नियता तत्प्रतिमा कार्या समग्रधर्मकृतौ। नानापृच्छ्य गुरून् यत् क्रियते कार्यं मुनिपदस्थैः ॥३८॥ किंचाविरहेऽपि गुरोः स्तुतौ जिनानां तदाकृतौ नियमात्। स्थापय सत्यं विद्वन्! स्थैर्यविशेषाय चोत्सर्गे ॥३९॥ नैवाचार्यस्य पुरतः परः शतानां तु वन्दनविधौ स्यात्। चरणे मस्तकलग्नं तत्तच्चरणौ ध्रुवं स्थाप्यौ ॥४०॥ मोक्षो जिनेन्द्रकथिताचाराचरणाद् भवेच्च तत्त्यागात्। स च दुष्करोऽथ लब्धे तस्मिन् ज्ञेयः स्तवो भावात् ॥४१॥ भक्त्या वक्तरिमानस्तस्मात् प्रचुरा पुनर्भवेद्भवितः। एवमन्योऽन्यवृद्धौ गच्छेन्मानः परां काष्ठम् ॥४२॥ वक्तुमाने प्रचुरे मानं वचनं भपेत् परं तस्मात्। वर्धतांशांशेन हि त्यागो यो दुष्करोऽभिमतः ॥४३॥ गृह्णानो व्रतमन्न् सिद्धे सत्यपि गुणधिके नाख्यत्। अपरोपदेशबोधात् पदं भदन्तेति न परनराः ॥४४॥ सिद्धसमक्षं गृह्णन् व्रतं तदाकारमादधीतान्तः। सम्बोधनप्रभावाज् ज्ञायत एतत् पुनर्विदुषा॥४५॥ न च सिद्धा आकारैरहिता इति तत्प्रतिकृतिर्नैव। अवगाहना च संस्थानं तेषां गीतमहद्भिः ॥४६॥ सत्यं पूजा हि तदा कृतकृत्यानां गुणार्थिनां पुंसां। परमस्तु भावतः सा यन्नारम्भादि दूरितपदम् ॥४७॥ आरम्भे जिनपाज्ञा लुप्येताताः सदावधोत्त्रस्तैः। स्नानकुसुमदीपादिभिरर्चनाधीयते नैव ॥४८॥ अपवादपदं चैषा नार्वार्हत्प्रतिकृतेर्भवेद् द्रव्यैः। अच्युतपददं यस्माद् द्रव्यार्चनमिष्यते विज्ञैः ॥४९॥ आरम्भस्य जिहासा भव्यानां शिवपदाप्तये गीता।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

आगमोद्धारक-कृति-सन्दोहे

अपवादात्त भेयं वध इव नाकेच्छया यज्ञे ॥५०॥ किंचार्चाया उक्तं फलं जिनानां स्वयं परैर्वाऽघे। पूजेप्सवो जिनाः स्युर्न मानमन्त्ये विकल्पे च ॥५१॥ अन्यच्चाचार्याद्या विरताः सावद्ययोगतस्त्रेधा। करणाद्यैः कायाद्यैः कथमारम्भं दिशेयुरमुम् ॥५२॥ निरवद्या चेत्पूजा विदधति किं नैव सूरिराजाद्याः ?। यन्नात्मनोऽस्ति हितदं तत्कथमुपदिश्यतेऽन्यस्मै ? ॥५३॥ यद्वद् ग्रामविहारे नद्युत्तरणं वधान्वितं यतिनाम्। अपवादतो विधेयं किं तद्वन्नार्हतः पूजा ? ॥५४॥ कामं तथापि सर्वे भविनो निःश्रेयसार्पकं धर्मे। साधोर्भावार्चनमयलमाधातुं क्षमा नैव ॥५५॥ भावार्चनेऽक्षमा ये ते कुर्युर्जिनराजपूजनं द्रव्यैः। हेतोः पूर्वोक्तात् खलु मलिनारम्भान्विता गृहिणः ॥५६॥ स्त्र्यादिकृते सारम्भा अपि ये जिनराजपूजनं द्रव्यैः। हिंसामीत्याऽत्याक्षुर्दुस्तर एषां महामोहो ॥५७॥ आरम्भे चेज्जुगुप्सा कायारम्भे गृहे स्थिताः किं ते ?। कुश्रुतकुतर्ककुमतेरतोऽर्चने वधभयं जनितम् ॥५८॥ पुत्राद्यर्थं हिंसादण्डोऽर्थत आगमे समाख्यातः। पुष्पाद्यैरर्चनायां जिनस्य किं नानर्थदण्डत्वम् ? ॥५९॥ असदेतन् नागादेरर्थायानर्थदण्ड आख्यातः। आचाराङ्गे द्वितीये नतु जिनचैत्यादिपूजायाम् ॥६०॥ उष्णाम्बुभक्तदाने साधोस्तद्वन्दनाय निर्गमने। वर्षायामुपदिष्टेर्थ गमने मुनिदर्शनायापि ॥६१॥ निष्क्रमणे निर्हरणे किं ते नानर्थदण्डभीरुत्वं ?। तत्त्वं देवविलोपी स्वपोषकोऽनृतवधादेशी ॥६२॥ अत आगमानुसारी श्राद्धो नैवार्चनं जिनेन्द्रस्य। स्वानुचितैः कन्दाद्यैः कुर्याद्यत्तत्र वधभयं तत्त्वात् ॥६३॥ ये संसारोद्विग्ना ग्रहीतुमनसो मुनित्वमारम्भम्। न स्वकृते तन्वन्ति, भ्रष्ठधियस्ते न तां कुर्युः ॥६४॥ शुभपरिणामात्पूजां जिनस्य रचयन्ननुक्षणं कर्म। निर्जरयति दुर्जरं यन् नाशयति भवं शुभो भावः ॥६५॥ एकान्तेनारम्भे चेदाज्ञा लुप्यते जिनेशस्य। स्याद्वादस्ते नष्टः सिद्धा अब्ध्यादिषु कथं च ? ॥६६॥ दानादौ ते लाभो भूयान् भूयसि नतौ गतौ दूरात्। सर्वेष्वन्येषु तथा चेत्पूजया किं विराद्धं ते ? ॥६७॥ यद्वद्धर्मांशोऽत्रानुमोद्यते न च ततो वधानुमतिः। तद्वज्जिनपूजायां किं मतिमन्नैव चिन्तयसि ? ॥६८॥ कर्त्ताऽपि यथा तत्रोद्यच्छति बहुशो विधातुमनधमनाः। नद्वद्भावविशुद्ध्यै

निक्षेप-शतकम्

॥११॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जिनपूजायै यतेत बहु ॥६९॥ अपवर्गाय वधोज्झनमर्चापि जिनेशितुः शिवायैव। तन्नापवादपदताऽयुक्ता सम्यग् विचिन्तयतु ॥७०॥ अपवादता न तत्त्वात् साधूनामन्यथा विधेय सा। परिहृत्य यदपवादानुत्सर्गाणां भवेद् वृत्तिः ॥७१॥ विरताविरते श्राद्धे साऽवश्यं भवति तदयमुत्सर्गः। तेषां निरवद्यत्यक्त्वा कालं पौषधगतं सवम् ॥७२॥ चैत्यनतौ यतिनोऽपि हि विदधति जिनबिम्बपूजनालभ्यं। लातुं लाभं श्राद्धायोपदिशन्ति च विधानेन ॥७३॥ अच्युतदेवत्वाप्तिः परिणामात्तस्य तथाविधादुक्ता। बोध्यं शिवाय सोक्ताऽऽश्रयकस्तत्र यतः स्पष्टम् ॥७४॥ सुदृशो वैमानिकता श्रुतकेवलिनां च लान्तकः स्वर्गः। अवमश्रवणात्सुधर्मा श्राद्धानामच्युतस्तद्वत् ॥७५॥ अपवादपदं सा वा विरताविरतानपेक्ष्य विज्ञेया। अपवादो यद्धेतोस्तत्रैवासौ प्रवर्त्तेत ॥७६॥ अन्यस्मायुत्सृष्टं परेण नापोद्यते ततो मुक्त्यै। विरतिः पूजा च बुधैर्ज्ञेया न तु यज्ञशसनमिव ॥७७॥ सुजनो यथा परस्मै महिमानमनधमुशति सुजनसङ्गे। तद्वज्जिनो जिनार्चाफलं वदेद् योग्यजीवाय ॥७८॥ केवलिनः सामान्याः परमावधयो मनोविदो मुनयः। पूर्व्याद्या व्याकुर्युः किं नार्चाया फलं विद्वन्! ॥७९॥ केवलिनो जिनपा अपि सरिदुत्तरणादि जगदुरिह सम्यक्। तद्वत् सूर्याद्याः किं न गताधाः पूजनं ब्रूयुः? ॥८०॥ निरवद्याऽपि च पूजा बिभ्रद्भिः साधूतां न क्रियते यत्। हेतुस्तत्र विशेषाल्लाभो विरतौ न कोऽप्यन्यः ॥८१॥ जिनराजः किं साधोर्वैयावृत्त्यं करोति सूरिर्वा?। अन्यस्माद्बहुलाभोचेत्तद्वज् जानीया अत्र ॥८२॥ यद्वा स्वरूपसवधा परिणामफला यतो जिनेशार्चा। तन्न स्वरूपमावानवद्यधृत्तैरियं कार्या ॥८३॥ यद्वज्जिनचन्द्राणां च्यवने जन्मनि निर्वृतौ नृणां। कल्याणकेष्वनुमतौ न रतादेरनुमतिस्तथेहापि ॥८४॥ श्राद्धः सामायिकवान् जले सचित्तेऽङ्गिनं न पतितं द्राक्। पश्चाक्षमुद्धरेत्तल्लभमुशेत् किं न स परस्मै? ॥८५॥ अपवादपदे साधोरर्चोद्दिष्टा जिनस्य, यद्वक्रः। श्रीवज्रसूरिवर्याः पुष्पानयन हिमवदादेः ॥८६॥ अर्चाकृते जिनेन्दोः स्नानं सिचयानि लेपनं प्रवं। उपकरणानि च मुनिनाधेयानि सदा, न तदस्येयम् ।८७। संयमिनामपवादः संयमपोषाय

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

न च जिनेन्द्रार्चा । साक्षात्संयमपुष्टयै बाधा च तदुपकृतेर्धरणे ॥८८॥ संयमबाधाहतये स्यादपवादस्तपस्विनां नियमात् । तन्न जिनेन्द्रार्चैषामपवादपदं भवेज्जातु ॥८९॥ ज्ञानाद्यर्थं वर्षाकाले यमिनां विहरणं प्रोक्तं । यत्तत्संयमपोषं तस्य फलं मनसि निध्याय ॥९०॥ पूजा जिनबिम्बानां संयमपुष्टयै न गण्यते क्वापि । तत्सामान्येनोक्ता नैषा यमिनां परपदेऽपि ॥९१॥ न च वाच्यं बिम्बेषु ज्ञानादिगुणा न लेशतः सन्ति । तत्कथमेषामर्चा युक्ता तुर्यादिगुणगानाम् ? ॥९२॥ यस्मात्सर्वगुणाढ्या जिनास्तदारोपतोऽथ बिम्बेषु । तेषां पूजा नरसुरसुखाय मुक्त्यै च विज्ञेया ॥९३॥ यद्वद् ब्राह्म्यै लिप्यै ज्ञानारोपेण गणधरसुधर्मा । व्याख्याप्रज्ञप्तौ नमतीह तथैषां न किं पूजा ? ॥९४॥ यद्वा यद्वदसाधुः साधुपदेप्सुर्मुदाऽर्च्यते भवतां । यद्वा यथा कलेवरमनगारस्यार्च्यते विगुणम् ॥९५॥ अज्ञान् सावद्योक्त्या भीतिमुत्पादयन् जिनेन्द्रार्चां । परिहारयन् न किं त्वं परिहरसीज्यां स्वकीयां ताम् ? ॥९६॥ आदिजिनेन्द्रोक्त्या किं मस्करिवेषो मरीचिरागत्य । न नतो भरतनृपेण ? सत्यं चेदत्र का शङ्का ? ॥९७॥ न च वाच्यं नामाद्या निक्षेपास्त्रय इहाहता द्रव्ये । पर्याये भावस्याऽभ्युपगमनं सैव तत्त्वपरः ॥९८॥ उभयनयाश्रितमर्हन्मतं विबुध्येयमुक्तिरर्हा न । आकण्ठामृतपीनो न विषोद्गारं नरो मुञ्चेत् ॥९९॥ तेनैकनयापेक्षं द्रव्यस्यावस्तुतां समुद्वीक्ष्य । मुह्येद् बुधो न यस्मात् स स्याद्वादश्रुतं वेत्ति ॥१००॥ इत्थं श्रीजिनराजसूरिवृषभादीनां जिनाज्ञारतः, सद्दृष्टिश्चतुरोऽपि शुद्धमनसा न्यासान् सदा मन्यते । सोऽत्रामुत्र जिनेन्द्रशासनमलं प्रोद्भाव्य लोकेऽखिले, निर्नाश्याखिलकर्मबन्धनिचयं स्वानन्दमुग्रं भजेत् १०१॥ इति निक्षेपशतकम् ॥

## लोकोत्तरतत्त्वद्वात्रिंशिका (५)

लोकोत्तरं जिन ! तवेदमुदीर्यते यच्छासनं प्रतिपदं निजशास्त्रराज्यां । तत्सत्यमेव अदमी परवादिनोऽत्र,



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धर्मं दिशन्ति जनसिद्धवचः प्रतीत्य ॥१॥ ज्ञानमात्मगुणत्वेन, त्वमात्थात्मस्वभावभृत् । परैस्त्विन्द्रियपूगोत्थं, समवायेन संश्रितम् ॥२॥ देहपर्यन्तमात्मानं, त्वमात्थ तद्गुणाश्रयात् । अन्ये जगति सर्वेषामात्मनां व्यापितां जगुः ॥३॥ ज्ञानमन्यत्र स्मृत्यादि, तेषां चान्यत्र सज्यते । वैचित्र्यं ज्ञानगं नैव, तेषां जीवसमाक्षतः ॥४॥ यायित्यं प्रेत्य तेषां स्यान्नात्मनां किन्तु चेतसः । जडं च तैर्मतं तत्तु, भिदा कैषां तु नास्तिकात् ? ॥५॥ शरीरमान आत्मा ते, प्रेक्ष्यते तद्गतो यतः । भवान्तरं समेतः संस्तद्भवीयां तनुं श्रयेत् ॥६॥ सिद्धत्वमपि सम्प्राप्तो, घनत्वात् पूर्वकायतः । त्रिभागोनावगाहनः साद्यनन्ततया स्थितः ॥७॥ परात्मस्थानि कर्माणि, परान् दानादिकर्मसु । प्रेरयन्तीति सिद्धं ते, लोकोत्तरमते किल ॥८॥ परेषां सिद्धिमाप्तानां, न ज्ञानं सुखमण्वपि । मते ते तु सदा सिद्धा, ज्ञानसौख्यसमन्विताः ॥९॥ किञ्च तेऽनन्तजीवानां, राशिर्लोके मतस्ततः । सिद्धानां न पुनर्जन्म, परेषां तु प्रवादिनाम् ॥१०॥ अतीन्द्रियार्थबोधस्याभावान्न स्थावराङ्गिनां । बोधस्ततो मितान् जीवा–नाहुर्मुक्तस्य जन्म च ॥११॥ युग्मम् ॥ परे पुण्यकृतेर्मार्ग-मभिषेकादि चक्षिरे । दानादिजिनपूजादि, दयादि त्वन्मते पुनः ॥१२॥ कर्मणामणवो जीवे, वध्यन्ते ते मते ननु । तेन ते सुखदुःखस्य, विधातृत्वेन सम्मताः ॥१३॥ गुणोऽदृष्टं परैरुक्तं, जीवस्य न परं भुवि । सर्वेषामङ्गिनां तुल्य-महो आत्मगुणे मतम् ॥१४॥ पक्षपातग्रहग्रस्ता, निषेद्धुं जैनसङ्गमम् । पुण्यनाशाम्बुसंसर्गा–न्नाशं पुण्यस्य चक्षिरे ॥१५॥ सम्यक्त्वाद्या गुणा मुक्तिं, ददते ते मते किल । देष्टा वर्धयिता शास्त्रैस्तेषां तन्मोक्षदो भवान् ॥१६॥ साजात्येतरबोधादीन्, हेतून् मुक्तेः परे जगुः । तदेते तत्त्वतो वादे ज्ञानाद्येकान्तमाश्रिताः ॥१७॥ आत्मनस्तादवस्थ्येऽपि, भवो मुक्तिश्च जायते । परस्परविरुद्धौ तन्मतेऽनैकान्तिके वरम् ॥१८॥ किञ्च मत्वा गुणान् जीवे, तदावृत्यै त्वयोदिता । ज्ञानघ्नादितया कर्मा-वली नान्यैरबोधतः ॥१९॥ आश्रवास्तन्मताः शास्त्रे, चित्रा ज्ञानद्विडादयः । परेषु नैव लेशोऽस्त्या-श्रवसंवरतत्त्वगः ॥२०॥ किञ्च त्वदीयशास्त्रेषु, मता अष्टादशाश्रयाः । हिंसाद्यास्तज्जमेनस्तु, श्वभ्रादिष्वनुभूयते ॥२१॥ परैस्तु लोकसम्बोध्यो, व्यवहारः समा-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्रितः । ग्राह्यार्पणीयरूपेण, हिंसादानादिकर्मसु ॥२२॥ हता मुक्तिं गताः स्वर्गं, श्वभ्रं वा निजकर्मतः । हिंसकाय न दातारः, किंचित्तत् किं वधोऽफलः ? ॥२३॥ दातारः प्रेत्य तेषां स्यु-र्याचका इतरे परे । एवं व्यवहृतेश्छेदो, न नैव स्यात् परं पदम् ॥२४॥ लोकोत्तरमते ते तु, हिंसाद्याश्रवराशितः । बद्धं पाप स्वयं जीवो, भुङ्क्ते योगात्तथाविधात् ॥२५॥ परमाधार्मिकाः श्वभ्रे, व्याधाद्याः पशुपक्षिषु । नरेषु दण्डिकाद्यास्तु, दत्त्वा दुःखं व्यधुस्त्वघम् ॥२६॥ एवं परापरे जीवा, अजीवाश्चापि कर्मजं । फलं भोजयितुं नित्यं, संसृतिं साधितुं क्षमाः ॥२७॥ लोकोत्तरमते जीवाः, श्वभ्रादिषु भवाः सदा । अनादिकालतस्तस्माज्जगत् शाश्वतमाश्रितम् ॥२८॥ सर्वेऽत्र जन्मिनः कर्म, कुर्वन्ति प्रेत्य तत्फलम् । भुञ्जन्त्येवं न यावत्स्या-दंव्ययं तावदीक्ष्यताम् ॥२९॥ तथाभव्यत्वभावेन, कर्मलाघवतां गताः । सद्दर्शनादि सम्प्राप्य, भव्या गच्छन्ति निर्वृतिम् ॥३०॥ एतत्सर्वं जिनेन्द्रोक्तागमाद् ज्ञेयं विवेकिभिः । नान्यस्माल्लेशतोऽप्येतज्ज्ञानं जीवैरवाप्यते ॥३१॥ जीवाजीवादितत्त्वानां, यथार्थानां निदेशनात् । सत्यं लोकोत्तरं जैनं, मतं विद्वद्भिरिष्यते ॥३२॥ अज्ञानान्धितलोचने जगति मे सद्भाग्ययोगाद्वरं, दृष्टेर्मार्गमुपागतं जिनवरेन्द्रोक्तार्कभासान्वितं । शासनमार्हतमाप्तवर्यसुभगं शीघ्रं ततो हं गमी, शश्वत्सौख्यमयं महोदयपदं यन्नित्यमानन्दभाग् ॥३३॥ इति लोकोत्तरतत्त्वद्वात्रिंशिका ॥

## व्यवहारसिद्धिषट्त्रिंशिका (६)

अनादिः संसृतिर्जन्तो-र्मिथ्यात्वादिजकर्मभिः । तज्ज्ञात्वा केवलविदा, भव्यायोपादिशज्जिनः ॥१॥ नाज्ञः प्रवर्त्तते शुद्ध्यै, नायत्नः शुद्धिकारकः । ज्ञानक्रिये ततोऽदिक्षत्, सन्मार्गं परमेश्वरः ॥२॥ व्यवहारं विना विद्वान्, कर्मसाधनकर्दमे । मज्जेत् स्वयं परान् जन्तून्, मज्जयेच्च वधादिभिः ॥३॥ अत एव समुत्पन्न-केवला अप्यगारिणः । भरताद्या जहुः सङ्गं, द्रव्यतः संयमादृतेः ॥४॥ भगवान् श्रीमहावीरः, क्षुत्तृषाक्रान्तविग्रहान् ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अम्भस्तिलानचित्तान्ना-नुजज्ञे यमिनोऽप्यतः ॥५॥ कृतिर्यथोक्ति देवस्य, लक्षणं द्रव्यतोन्तरा। संयमं तद् युता दारैः, शस्त्रैर्देवा जुगुप्सिताः ॥६॥ गुरवो मुक्तसङ्गाः स्युर्व्यवहारमृते कथं ?। ससंगाः सवधाः किं नान्यथा गुरुपदोचिताः ? ॥७॥ धर्मः शुद्धः कषच्छेद-तापैः शुद्धौ कथं स्याताम्। आद्यौ न व्यवहारेण, विना सम्भवतः क्वचित् ॥८॥ प्राणान्न हन्यात् मृषा ब्रूयात्, नासौ सर्वज्ञतापदम्। अनारम्भो मुनिर्धर्मो, जन्तुबाधाविवर्जितः ॥९॥ व्यवहारे परित्यक्ते, नैषामेतानि लक्षणं। तथाच किं तनूभृद्भ्यः कथ्यं देवादिलक्षणम् ? ॥१०॥ अर्वाग्दृशां विबोधाय, तद् गम्यं लक्षणं वदेत्। वक्तृश्रोत्रोरितरथा, ध्यान्ध्यं स्यादनिवारितम् ॥११॥ किञ्चात्मना परित्यक्तारम्भसङ्गेन किं पुनः। प्रवृत्तिः क्रियते सङ्गवधयोर्येन यामो न बाह्यतः ॥१२॥ अन्यच्चावृतवन्तः स्युः कषाया बाह्यसाधुतां। तृतीयास्तत्क्षये किं च, सा नोद्भवति निर्मला ? ॥१३॥ संयोजनावियोगे किं, निर्वेदाद् भवतो विदः। संवेगाच्च भवेद्भाव-साधुतासम्भवो नहि ॥१४॥ अत एवानुरक्तानां, संयमे देशतो व्रतं। भावना गृहिणां चाणुव्रतेषु संयमाश्रिताः ॥१५॥ द्वितीयानां तृतीयानां, कषायाणां च बाह्यतः। देशसर्वव्रते वार्ये, तत्क्षये ते न किं तथा ? ॥१६॥ सञ्ज्वलना ह्यतीचारापादकाः कोपनादिभिः। परेषूदयमाप्तेषु, मूलोच्छेदः कथं, ननु ? ॥१७॥ द्रव्ययोगानिरोधे ना-योगिता परमेशितुः। इति पश्यन् कथं लुम्पेद्, व्यवहारं श्रियः पदम् ? ॥१८॥ बुद्धवान् भरतश्चक्री, मुद्रिकायाः वियोगतः। मरुदेवी जिनस्यर्द्धिं वाणीं वाऽऽलम्ब्य सिद्धिभाक् ॥१९॥ अन्यलिङ्गो गृहस्थो वाऽवाप्नुयात् केवलं परम्। अधिके जीवितेऽवश्यं, चरणं बाह्यमाश्रयेत् ॥२०॥ त्रिशाऽत्यल्पान् स्वयम्बुद्धान्, प्रत्येकांश्च जिनागमात्। बहून् सम्बोधितानन्यैर्न बुधो व्यवहारहा ॥२१॥ जीवेत्कश्चिद्विषं पीत्वा, तथाभव्यतया पुमान्। सर्वे प्रियायुषो जीवाः, किं पिबेयुर्विषं ननु ? ॥२२॥ वधसङ्गौ विषं घोरं, बाह्यतोऽपि न बुद्धिमान्। भवभीतस्ततस्तत्र, वर्त्तेतामोदितो रतः ॥२३॥ नालम्ब्यं मरुदेवादे-र्ज्ञातं प्रत्येकबोधिनः। विदन्निति बुधः किं स्याद्भवभीरुः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

क्रियाऽलसः ॥२४॥ अनन्तैर्लेभिरे बोधा, निस्तीर्णश्च भवार्णवः । सङ्गत्यागान्न ते ज्ञानां व्यवहाराय किं क्षमाः ? ॥२५॥ व्यवहारं समुच्छिन्दन्, तीर्थोच्छेदी मतो जिनैः । इति मन्वान आप्तोक्ति-माश्रितस्तं त्यजेत् कथम् ? ॥२६॥ न चोद्यं यत् क्रिया गौणी, परथा कथमुच्यते । समासे परतो द्वन्द्वे, वर्णाल्पच्यन्यथा पुरः ? ॥२७॥ मोक्षो ज्ञानक्रियाभ्यां इस्तक्तस्तत्र लघुः क्रिया । नावाचि प्राक् सति द्वन्द्वे, ज्ञानमभ्यर्चितं ततः ॥२८॥ आद्यं ज्ञानं क्रिया पश्चा-दित्युत्पत्तिक्रमाश्रितं । वच एतत् न 'यद् धर्मोऽखिलसंवरमन्तरा ॥२९॥ करणे तृतीयाऽऽदिष्टा, मुख्यता तद् द्वयोरपि । उभयोः करणत्वेन, सम्यक चिन्तय चेतसा ॥३०॥ परस्थं करणं ज्ञानं, सम्भवेन् मारुषादिवत् । अनुवृत्तेर्बुधस्यादौ, न क्रिया जातुचित्तथा ॥३१॥ अगीतार्थोऽपि निश्राय, गीतार्थं मुनितापदं । नाव्रतः साधुताभाक् स्याज्, जिनेन्द्रमपि संश्रितः ॥३२॥ असंयतार्चनं विज्ञ-मतमाश्चर्यमन्तिमं । न क्वाप्यभ्यर्चना साधोरगीतार्थस्य गीयते ॥३३॥ चरणे ज्ञानदृष्ट्यादेः, सङ्ग्रहायापवादता । पुष्ट्यै यमस्य सा यन्नापोद्यतेऽधिकृतं विना ॥३४॥ हीनो व्रतेन पूज्यः स्याद्, यत्प्रोक्तं तत्र कारणं । शुद्धप्ररूपणा भाव-साधुता ह्यपवादतः ॥३५॥ श्रुतबोधेन चेत् पूजा-योग्यः स स्यात्तदा न किं । दशपूर्वी दधन्न्यूनां, स मिथ्यात्वे मुनिब्रुवः ? ॥३६॥ द्रव्यपर्यायभावज्ञो, हिंसादेर्विरतो विभोः । आज्ञामनुसरन् शक्त्यो-द्यच्छन् पूजापदं श्रुतात् ॥३७॥ श्रीमज्जैनेन्द्रवाणीं प्रतिपदमनुयान् हापयन्निन्द्रियाणा-मर्थेषु प्रेमरोषौ रतिमनुरचयन् संवरेषु प्रकामं । गुप्त्या गुप्तं समित्या समितमरुहतां मार्गमुद्योतयन्तं, नत्वाऽर्चित्वा तदीये पदयुगकमले लीन आनन्दमेतु ॥३८॥ इति व्यवहारसिद्धिषट्त्रिंशिका ॥

## कर्मफलविचारः (७)

नमत भव्यजना ? नतनाकिनं, विहितशुद्धपदाश्रितसंस्थितिम् । निहतजन्मजरामृतिकारणं, कृतसुधाम-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निवासविवेचनम् ॥१॥ नह्याधेयं विनाधार-माधारः क्षेत्रमुच्यते । निश्चयेनावकाशोऽदो, मण्डलं व्यवहारतः ॥२॥ पारिणामिन उच्यन्ते, जीवास्तत्र द्विधा नतिः । स्वाभाविका परोत्पाद्या, चेत्याद्या न विविच्यते॥ ३॥ पराऽत्र देशद्रव्याद्धाभावमुख्या नतिं प्रति । कारणं येन द्रव्याद्याः कर्मोदित्यादिकारकाः, ॥४॥ ये जीवा द्रव्यक्षेत्रादि-सहायस्यानपेक्षिणः । ते विचित्राः सुरश्वभ्रि-शलाकचरमाङ्गिनः ॥५॥ तेषामायुर्यतो नवोपक्रम्येतापवर्त्तनं । क्रियेतास्य न द्रव्याद्यैर्यत्तेऽनपवर्त्यजीविताः ॥६॥ तथापि सर्वथा ते न, द्रव्यादिकस्य कुर्वते । उपेक्षां निर्गतौ द्वारावत्या द्राग्रामकेशवौ ॥७॥ अपरेषां ततो युक्त-तम आत्महितैषिणां । सोपद्रवस्य धाम्नो हि, त्यागः शास्त्रविदोदितः ॥८॥ कर्मणां फलदातृत्वमव्याहतमथेष्यते । किमपेक्ष्यास्तदा द्रव्यक्षेत्राद्या विबुधैरिह ? ॥९॥ द्रव्याद्या एव चेद् दद्युः, सुखदुःखे शरीरिणां । आत्मवैरितया ध्वस्तं, समस्तं शुभदर्शनम् ॥१०॥ उपप्लुतं ततः स्थानं, वर्जयेदिति वाचिकं । अदृष्टवादिनां वः किं, युज्यते मतघातकम् ? ॥११॥ सत्यं लोभान्धितात्मानः, कर्मणां फलवत्तनुः । न सा परं विना द्रव्याद्येतत्प्रागेव निर्णीतम् ॥१२॥ कर्मणो वर्गणाः सूक्ष्मा, नोपभोगक्षमास्ततः । न बाह्यद्रव्यप्रभृति-निरपेक्षं फलन्त्यमी ॥१३॥ इच्छाकृतं यथा शेषं, न विना बाह्यपुद्गलान् । विकारादि तनौ दृष्टं, न चेच्छाप्यणुवर्जिता ॥१४॥ बोधिका न परा मध्या, नच ते अन्तरा वचः । वैखर्या नच सा बाह्येन्द्रियाण्यृते भवेद्विदे ॥१५॥ विद्युच्छक्तिर्यथा यन्त्रे, प्राप्तापि बाह्यपुद्गलान् । नाविचाल्य जनं स्वार्थं, बोधनाय भवेदलम् ॥१६॥ स्नायवोऽपि तनौ केचिद्, ये स्वविकारसम्भवे । बाह्याणुविकृतेः ख्यान्ति, स्वसद्भावं विचक्षणाः ॥१७॥ कानिचित्स्थूलताभाञ्जि, साक्षाद् द्रव्याणि भूतले । औषधीभूतकायानि, फलदायीनि बाह्यतः ॥१८॥ दृष्टसाम्येपि न फलं, समं जगति दृश्यते । तत्रादृष्टो बुधैः कश्चिद्धेतुः कल्प्यो ह्यतीन्द्रियः ॥१९॥ तदेवादृष्टमित्येवं, सूक्ष्मैः कर्माणुभिर्नहि । विना बाह्यगताणूनां-मपेक्षां साध्यते फलम् ॥२०॥ अत एवौषधैर्योगः, प्रशस्यो गदसंगमे । तं.थदिराद्दतिश्चात्म-कल्याणकरणे पटुः ॥२१॥ विचित्रा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

आमया विश्वे, दृश्यन्ते द्विविधा यतः । सङ्क्रमेगोद्भवाः केचित्, केचित्सङ्क्रमवर्जिताः ॥२२॥ आद्येषु सत्सु
मनुजैस्त्याज्यं तद्धाम सर्वथा । न ते यद्यपि सर्वेषां, तत्रस्थानां तनौ नृणाम् ॥२३॥ आमयास्तदपि त्याग,
आख्यातोऽस्य महर्षिभिः । अपायशङ्कासद्भाव, आदितस्तस्य वर्जनम् ॥२४॥ युग्मम् ॥ न चान्यस्थान-
सङ्क्रान्त, आदितो गदसम्भवः । निरीक्ष्याग्निं वसेत्कोऽन्यो, बालिशात्तत्र धामनि ॥२५॥ गेहेशूरतमाः
केचिन्न निर्गच्छन्ति तादृशात् । आदावालयतो द्रङ्गात्किं शौचन्त्यामयोद्भवे? ॥२६॥ उपप्लुतं त्यजेद्धीमान्, सुखा-
वासे वसेत्सुखम् । तत्रापि कर्मसामर्थ्याच्चेद्भवेद् व्याधिसम्भवः ॥२७॥ तदा निरुपमं धर्म-स्मरणं हृदि
सन्दधेत् । तावद्विज्ञेन भेतव्यं, यावन्न भयसङ्गमः ॥२८॥ कर्मणां मे विपाकोऽयं, तन्न तत्कृतिरायतौ ।
हितदेति निराबाधं, श्रयेद्धर्मं सुखावहम् ॥२९॥ आर्त्तरौद्रे यतो मूलं, भवस्य दुःखदायिनः । इष्टानिष्टाप्तिवि-
रतेरिच्छा हेतुस्तयोर्मता ॥३०॥ आयुश्च चञ्चलं दर्भप्रान्ताम्बिन्दुरिवानिशं । यान्ते मतिरसौ प्रेत्यगतेर्मूलमनश्वरम्
॥३१॥ शोकतापादयोऽसातवेदनीयस्य कारणम् । दुर्गतौ पतितो जन्तुर्नान्यत्किमपि चेतयेत् ॥३२॥ सातं
पुरा भवेद् बद्धं, तदप्येतेन तद्भवे । सङ्क्राम्यतेऽसुखतया, विषेण दुग्धवृन्दवत् ॥३३॥ अत एव श्रुते प्रोक्ता,
ज्ञानाद्याराधनान्तिमे । भागे भवस्य धन्यानां, दुष्करा चन्द्रवेध्यवत् ॥३४॥ न चान्त्ये ज्ञानदृष्ट्यादे, राधना सं-
स्कृतिं विना । संस्कारेपि सति न साराधना चलचेतसः ॥३५॥ न च चित्तं स्थिरं स्थाने, सोपप्लवेऽङ्गिनां
भवेत् । सोपद्रवस्य तद्धाम्नो, वर्जनं हितकृन्ननु ॥३६॥ भयान् सर्वान् परित्यज्य, निर्गत्य साधवोऽभवन् ।
तेऽपि सोपप्लवं क्षेत्रं, त्यजेयुर्दूरतो पि हि ॥३७॥ अन्यदास्तां चतुर्मास्यामपि जन्तुसमाकुले । कुर्यु रोगपरा-
भूतौ, स्थानेऽन्यस्मिन् समाक्रमः ॥३८॥ ज्ञानादिवृद्धये देहपालनं क्षेत्रसौस्थ्यतः । ते निर्दिष्टे यतः सूत्रं,
यथालाभं वहेद्वपुः ॥३९॥ उपप्लुते वसन् स्थाने, ज्ञानादेः पोषकः कथं? । स्यात्ततोऽनार्यसंस्थाने, विहारोऽपि
निवारितः ॥४०॥ अप्राप्तकाले यो धत्ते, आत्मनोऽनशनक्रियां । स चात्महा न शस्यः स्याद्रौद्रध्यानपरायणः ॥४१॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विज्ञातार्हन्मते पुंसि, न स्वान्यात्मविबाधने । विचारकणिकाभेद, आत्मत्वस्याविशेषत: ॥४२॥ अत एव जिनाश्चख्युरेषणासमितिं मुने: । अन्यथारभ्य दीक्षाया:, प्रोच्येतानशनक्रिया ॥४३॥ अपवादानपि प्राहु:, निर्ममानां महात्मनां । सेवनीयतया कालमनतिवृत्य वाङ्मये ॥४४॥ सर्वत्र संयमं रक्षेदात्मानं तु ततोऽपि च । मुच्येत सोऽतिपातादे:, शुद्धेर्नैवात्मर्हिसनम् ॥४५॥ तथाच ज्ञानवृद्ध्यादिमपवादाश्रितिर्हिता । अवलम्ब्य, न यद्भिन्नं तस्मादात्मविशोधनम् ॥४६॥ गीत: कृतयोगीत्यादिस्मृतेर्ज्ञानादिसाधने । अपवादे न दोषोऽस्ति, प्रमादस्य तु शोधनम् ॥४७॥ ये त्वेनत्सूत्रमालम्ब्य, यथाछन्दतयाटति । न तैर्ज्ञाता श्रुताम्नातापवादस्था विशुद्धता ॥४८॥ उत्सर्गरक्षणे दक्षोऽपवादो नान्यलक्षण: । विहाराहत्पूजनादि:, स न यज्ञेऽङ्गिनां हुति: ॥४९॥ उत्सर्ग-पालनाशक्ता-चपवादावलम्बनं । निस्त्रिंशानां ततो युक्तो, न द्वितीयाश्रय: क्वचित् ॥५०॥ सोपद्रवं पुरं घाम, ग्रामो वा द्वादशाब्दत: । अर्वाक् त्याज्यतया गीत-धुर्याणां गीयते श्रुते ॥५१॥ नि:स्पृहाणामियं वार्त्ता, त्यागेऽपाययुताश्रिते: । चेत्कथं न भवेद्वर्गत्रयसाधनधारिणाम् ? ॥५२॥ यथैव तपस: पाप-प्रचिति: क्षयमाप्नुयात् । तथैवोपक्रमादायुरेति किं न क्षयं बुधा: ? ॥५३॥ न यथर्ते तप: पाप्म-क्षयो महामुनेरपि । नार्वाक् तथानुपक्रान्तस्यायुषस्त्रुटिसम्भव: ॥५४॥ जीविते श्वसनो जीवोऽस्य त्रुटे: श्वसनं कथं ? । पार्थक्यमायुषो नाम्नोऽवधार्येदं विचिन्त्यताम् ॥५५॥ आयुषोऽध्यवसायाद्या:, श्रुतिसिद्धा उपक्रमा: । युक्ताऽऽश्रिते: सविघ्नाया, हानिरायूरिरक्षिषो: ॥५६॥ एवं च वध्यकर्मालौ, पेलवायां वधो मत: । तेनायुषो यतोऽकारि, स्थितस्यापि यदुत्क्रम: ॥५७॥ तादृशं तेन बद्धं चेन्न विनोपक्रमं तथा । तेनासौ प्रेरितश्चेन्नाकर्मणां सा भवेत्क्वचित् ॥५८॥ नचास्ति नियमस्तादृग्, यत्तेनासौ तथाकृत: । यतोऽज्ञानप्रमादादि, स्वादृष्टोद्भवमेव तत् ॥५९॥ न च तत्प्रेरको जन्तु:, कषायादिविनाकृत: । न चावनाभिसन्धेश्चाभावो येन न हिंसनम् ॥६०॥ वधकोऽसौ न निर्लेपो, येन वध्यैनसां चय: । वधे हेतुर्भवेदेको, नाश्रव: स्याद्विहिंसक: ॥६१॥ हिंसाऽभावेऽपि या हिंसा,



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रमत्तस्य मताङ्गिनः । सा न कर्मोद्भवेति किं, कर्मबन्धविधायिनी ? ॥६२॥ एकेन्द्रिया न कस्यापि, हिंसकाः प्राणिनो यदि । तदा बध्नन्ति किं तेपि, कर्म भ्रमिनिबन्धनम्? ॥६३॥ आत्मनो बध्यता भावा-द्वैरं तु द्रव्यतो वधात् । तन्नैकापीयमनृता, हितं तद् द्वयवर्जनम् ॥६४॥ निरपेक्षा यदि श्रद्धा, निरपेक्षं तपो यदि । चर्या यदि निरपेक्षा, तद्धिता निरपेक्षता ॥६५॥ तादृशानां भवेत् किन्तु, न गार्हस्थ्योषितिर्वरा । गार्हस्थ्यं नैरपेक्ष्यं च, तदार्धजरतीयता ॥६६॥ चौरकण्ठीरवव्याघ्र-व्यालाद्यजनिता अपि । यत्रापाया वसेत्तत्र, न गृहस्थोपि बुद्धिमान्, ॥६७॥ अनपाये वसेद्धीमान्, धाम्न्यनपायतत्त्वविद् । अनपायं यतो ध्यानं, निरपाया च राधना ॥६८॥ यतीनामपि सापेक्षो, धर्मश्चेद् गृहिणां कथं । निरपेक्षो भवेद्धर्मो, देशसंयमधारिणाम् ? ॥६९॥ त्याजं त्याजं जननमरणव्याधिशोकोद्भवां गां, ध्यायं ध्यायं भवगतजनुर्ज्ञानदृष्ट्यादिप्राप्तिं । स्मारं स्मारं मनुजजनुषो दुर्लभा प्राप्यतान्त-र्धारं धारं जिनगुणनिधिं भव्यलोका यतध्वम् ॥७०॥ नवसारे वसुसारे स्मारितसुषमापुरर्द्धिसम्भारे । आनन्देनानन्दे प्रकरणमिदमात्ममतिततये ॥७१॥ श्रीमत्पार्श्वजिनेशपादपवितं पूजादिकार्योद्यतं, यत्रैवामृतसागराख्ययतिनो दीक्षेष्टिसम्पूर्णता । शिष्टं यन्नृपपुङ्गवेन गुणिना शैवेयनाम्ना सदा, तस्मिन्वाञ्छितकल्पपादपचिते सारे पुरे ख्यापितम् ॥७२॥ इति कर्मफलविचारः ॥

## परमाणुपञ्चविंशतिका (८)

कारिकेयं धृता भाष्ये, तत्त्वार्थीये पुरातना । उमास्वातिवरैः श्वेतां-शुभिः सूक्ष्माणुसिद्धये ॥१॥ कारणमत्र तदन्त्यं सूक्ष्मो नित्यश्च भवति परमाणुः । एकरसगन्धवर्णो द्विस्पर्शः कार्यलिङ्गश्च ॥२॥ व्यवहाराः प्रधानानु-यायिन इति कारणम् । अत्रोपादानमादेयं, न परं तेन पौद्गलम् ॥३॥ भेदं पार्थक्यमन्त्यं यद्, द्व्यणुके संस्थितं नहि । निमित्तं समवायं न, प्रान्त्यं कारणमाश्रयेत् ॥४॥ पारम्पर्यमुपादानेऽणुरन्त्यं कारणं परं ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अचितस्कन्धगोऽन्त्यो यः, संयोगः स न पुद्गलः ॥५॥ यथाप्रवृत्तकरणं, योगा मिथ्यात्वमक्षगं । ज्ञानमोघेन सर्वेऽमी, हेतवोऽन्त्या न पौद्गलाः ॥६॥ अत एवैवशब्दोऽत्रासाम्प्रतस्त्विति सूरिभिः । वृत्तौ स्पष्टतयाऽऽख्यात-मत्रेति च मतं पदम् ॥७॥ अत्रशब्देन तैरुक्ता, पुद्गलानामधिश्रितिः । स्युरन्यत्रान्यथाऽन्त्यास्तेऽधिकृता नात्र पौद्गले ॥८॥ तच्छब्दोऽपेक्षते शब्दं, यदितीत्थं प्रमीयते । यदन्त्यं कारणं स्कन्धे, तत्परमाणुरुच्यते ॥९॥ वादोऽत्र परिणामस्य, तेन द्व्यणुकसंहरात् । उद्भवः परमाणोः स्यान्, न कार्यं कारणात्ययात् ॥१०॥ महास्कन्धेऽपि सोऽस्त्येव, परिणामोऽपरस्तदा । भेदे द्व्यणुक सङ्घादेरन्त्योऽणुः कारणं पृथक् ॥११॥ सामान्येनाधिकारोऽत्रा-जीवानां प्रथमः कृतः । पृथक्कर्तुमधीकार-मत्रेत्यावश्यकं पदम् ॥१२॥ जगत्यसौ न कालोऽस्ति, यस्मिन् सर्वेऽणवः पृथक् । अन्त्यावस्थां गताः स्युर्यदेतल्लक्षणविग्रहाः ॥१३॥ आलोच्येत्याहुराचार्याः, यत् सूक्ष्मं पौद्गलं दलं । स सूक्ष्मः परमाणुः स्यात्, सम्बद्धोऽपि स्वरूपतः ॥१४॥ सूक्ष्मो नापेक्षिको ग्राह्य-स्तस्य बादरभावतः । अन्त्यः सूक्ष्मः पुद्गलस्तु, कश्चिन्नाणोः परो भुवि ॥१५॥ यथाऽन्त्यं कारणं बद्धे, न गम्यं न पृथक् समे । अणवो न विभक्ताः स्युर्जातु सूक्ष्मत्वमाययुः ॥१६॥ आशङ्क्येति तृतीयं, लक्षणं नित्य ईरितं । परिणामेषु सर्वेषु, पृथक्त्वे च सदा भवेत् ॥१७॥ जैनो वादः परीणामेऽतोऽणुः स्कन्धेष्वपीष्यते । कथञ्चित्परिणामश्च, कार्यं हेतुं च समन्वयेत् ॥१८॥ नाशान्न कारणानां स्यान्-न चानाशात्तु सर्वथा । वादेऽत्र परिणामस्य, नाशा-नाशावुभौ मतौ ॥१९॥ यथा स्यूतः पटस्तन्तु-समवायेन कारुभिः । करोति पटकार्याणि, तन्तुकार्यं न रुध्यते ॥२०॥ अन्त्यकारणता सौक्ष्म्यं, नित्यत्वं च श्रितं ह्यणून् । श्रद्धानुसारिणः श्रोतॄन् प्रतीदं लक्षणत्रयम् ॥२१॥ तर्कानुसारिणः श्रित्वाऽऽचार्यास्तुर्यं जगुः परं । लक्षणं कार्यलिङ्गेति, परमाणोर्विनिश्चितम् ॥२२॥ आन्वीक्षिकीं श्रितो विज्ञोऽनुमायादृष्टमूहते । भूमिगृहाद् द्विजं क्रष्टुं, नेशा विद्यार्थिनः परे ॥२३॥ नाणूनां साधनं तर्के, कार्यलिङ्गात् परं यतः । हेतुहेतुर्महद्द्रव्ये, तर्के प्रोच्याणुरुच्यते ॥२४॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यच्चकरसवर्णादि, न तल्लक्षणदेहभाक् । स्कन्धानामसौ सद्भावो, न नास्तीत्युच्यते बुधैः ॥२५॥ व्यावृत्त्या च यदि ब्रूयुर्लक्षणत्वममुष्य चेत् । न कदाचित्क्वचिच्चात्र, रसाद्या द्व्यादयो नहि ॥२६॥ अयुक्तं तर्हि नो किञ्चिद्यन्नाणौ नैकतोऽधिकाः । रसाद्याः स्पर्शयुग्माच्च, नान्यः स्पर्शोऽधिको भवेत् ॥२७॥ परमाणावंदितं जिनेश्वरमते यल्लक्षणं व्यापकं, सततं यच्छिशुबुद्धबोधविधये वर्यैर्मुनीशैः श्रुते । जगदे तच्छुभकारिकापदगतं मोहापहाराय तु, समतामाप्य परां मया शृणुत तत्सद्वस्तुबुद्ध्यै नराः ॥२८॥ इति परमाणुपञ्चविंशतिका ॥

## भव्याभव्यप्रश्नः (९)

सनत्कुमारदेवेन्द्र-सूर्याभविबुधादिभिः । श्रीवीरं प्रति यत्पृष्टं, स्वकीयात्मविशेषितम् ॥१॥ भव्यो वाऽहमभव्योऽस्मीत्येवमादि जिनागमे । प्रोक्तं वीरेण त्वं भव्योऽसीत्यादि स्पष्टवाक्यतः ॥२॥ ततश्च ज्ञायते राशि-द्वयं सूत्रकृतां मते । किं चाग्रस्थानके प्रोक्तं, तृतीयेऽङ्गे गणेशिभिः ॥३॥ द्वैविध्यं भव्यसिद्धिकाभव्यसिद्धिकगोचरं । जीवाजीवाद्यभिगमोपाङ्गे राशिद्वयं तथा ॥४॥ अभव्याः सूक्ष्मपर्याप्त-निगोदेभ्यो मताः श्रुते । प्रज्ञापनाख्येऽनन्तघ्नाश्चतुःसप्ततिके पदे ॥५॥ आवश्यके तु सम्यक्त्व-लाभे भवसिद्धिका अपि । इत्याख्योदिताः स्पष्टमभव्या यत् श्रुते मताः ॥६॥ ज्ञेयं केवलिनामेवैतत्तन्नार्हन् सुरोत्तमैः । पृष्टः स्वविषये तेन, स्वभावोऽयं यदात्मनः ॥७॥ अत एवावदन् सिद्धसेनपादास्तु सम्मतौ । भव्याभव्यत्ववादो यदहेतुक इतीर्यते ॥८॥ चेतनाधारकत्वेन, नैष राशिस्तृतीयकः । जीवाः सर्वेपि यन्नित्यं, चैतन्यं शुद्धमादधुः ॥९॥ इति भव्याभव्यप्रश्नः ॥

## अष्टकबिन्दुः ( १० )

यो वीतरागः सर्वज्ञस्त्रिकोटिशुद्धशास्त्रवाक् । शिवदो ह्याज्ञयाराद्धो, नमस्तस्मै परात्मने ॥१॥ स्नात्वा-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चर्येन्महादेवं, द्रव्यभावभिदाशुचिः । शुद्धयत्यन्तेऽसुमान्ध्यानादाद्यपीष्टं तदर्थकृत् ॥२॥ द्रव्यभावाष्टपुष्पीयं,
स्वर्गमोक्षप्रदा मता । जात्याद्याऽऽद्य दयाद्यन्त्ये, भावः कर्मक्षयङ्करः ॥३॥ एधांस्यघानि धर्माग्निः, प्रबला
भावनाहुतिः । अकामा मोक्षदा साधो-रनघेत्यग्निकारिका ॥४॥ आज्ञास्थितोऽनुकम्पावानुपकारी सदाशयः ।
ईप्सेत्सम्पत्करीं वृत्तिं, पौरुषघ्नीं च वर्जयन् ॥५॥ भिन्नं न कल्पितं पाके, न कृतं न च कारितं । यतिना
गृह्यतेऽन्नादि, न पुण्ययावदर्थिकम् ॥६॥ दीनादेर्दयया दाने, पुण्यं पापमिहान्यथा । भवाङ्गमेते तत् साधोः,
प्रच्छन्नं भोजनं मतम् ॥७॥ जिनाज्ञाभक्तिसंवेग-युतोऽविध्यादिवर्जितः । विरतो भावतो द्रव्याच्चोक्तमित्यपि
शोभनः ॥८॥ शान्तो हेयादिनिश्चायी, स्वस्थो न्यायादिवृत्तिमान् । तत्त्वसंवेदनः पात-नैरपेक्ष्याद्यसङ्गतः ९॥॥
कष्टं भवाङ्गमिच्छेयं, तत्त्यागो ज्ञानसङ्गतं । वैराग्यं, नेष्टविरहात्, न मिथ्यात्वाच्च साधुता ॥१०॥ तपः
संवेगशमयुग्, यावन्नेन्द्रियहीनता । पीडा न ह्रीष्टसिद्धयात्र, स्यात्क्षयोपशमाद्धितं ॥११॥ धीमता ज्ञातशास्त्रेण,
धर्मवादो ह्यनाग्रहः । मृत्यन्तरायौ न जये, बोधोऽस्य विद्वदर्चितः ॥१२॥ लक्षणं न प्रमाणादेः, किन्त्वहिंसा-
दिपञ्चकं । चिन्त्यं धर्मार्थिभिश्चेष्ट-सिद्धयर्थं क्वास्य योग्यता ॥१३॥ नित्यो न हन्यते हन्ति, निष्क्रियत्वान्न
संसृतिः । तदभावे न सत्यादि, क्रियायोगे समं शुभम् ॥१४॥ अनित्योऽहेतुकं नश्येद्, हिंसको जनकः क्षणः ।
स्याद्वा शास्त्र उपन्यासो, निष्फलोऽस्या भवेत्पुनः ॥१५॥ नित्यानित्यः स्मृतेर्देहाद्भिन्नाभिन्नो यमं ततः ।
कर्मोदये पि संक्लेशाद्धिसाऽहिंसा च भावतः ॥१६॥ अचित्तादोदनाद्यद्यं, न प्राण्यङ्गात् समं कथं । मांसं, लोकं
समीक्ष्याख्याः, सशास्त्रं शास्त्रवित्तम ? ॥१७॥ नियोगेऽभक्षणाद्दोषोऽन्यदात्तिर्नहि दोषकृत् । महाफला निवृत्तिः
किमत्रिरक्तिर्हिं दुष्टता ॥१८॥ सचित्तनाशनं मद्यं, प्रत्यक्षेणैव भण्डनं । भ्रष्टशक्तिरृषिर्भ्रान्तोऽतस्तद्वर्ज्यं विवेकिभिः
॥१९॥ प्रोक्तं ह्यधीत्य स्नायात्तन्नादोष मथुनं क्वचित् । सत्त्वान्तकमधर्मस्य, मूल त्याज्यं विषान्नवत् ॥२०॥
धर्मार्हः सूक्ष्मधीर्ग्लानौषधदातेव नेतरः । श्रुताद्दते प्रव्रज्यादि-दाताप्येतद्विघातकः ॥२१॥ मार्गानुसारिणी शुद्धिर्न



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रागादेर्ग्रहात्मिका । श्रुतनिष्ठस्य गुर्वादि-मानिनः सा सुचेतसः ॥२२॥ मालिन्यकृदनाभोगाद्, घोरं मिथ्यात्व-मश्नुते । अवन्ध्यं सम्पदाम्बीजमुन्नतिः स्वर्गसिद्धिदा ॥२३॥ दयार्चाशीलवैराग्यं, पुण्यं तच्च सदागमात् । वृद्धेभ्यः स च संसारे, शोभनादधिकप्रदः ॥२४॥ औचित्याद् गुरुशुश्रूषा, मङ्गलं धर्मिणां व्रते । गुरूद्वेग-हृतो वीरस्येवेदमुपपद्यते ॥२५॥ धर्मोद्यमात्तत्त्वदृष्टेः, सुखित्वाद् वृणुतोक्तितः । त्रिशतकोटयादिदानेपि, महादानं जगद्गुरोः ॥२६॥ तीर्थकृत्त्वोदयाद्दानं, धर्माङ्गं स्वाशयकरं । दत्ते जिनो गुणार्थ्येवं, न पापं दूष्य-कार्पणे ॥२७॥ राज्यं ददन् विवाहं च, कुर्वन् शिल्पं निरूपयन् । अधिकापत्तिरक्षातोऽदोषः पुण्यं च पवित्रमम् ॥२८॥ वासीचन्दनकल्पानां, जगद्दुरितहारिणाम् । साम्यमात्मम्भरीणां यज्ज्ञेयमेकान्तभद्रकम् ॥२९॥ ज्ञानादे-र्घातिनाशात्स्या-दात्मस्थं केवलं मुखे । लोकालोकावभासीदं, न गमोऽस्य गुणो यतः ॥३०॥ अचिन्त्यपुण्य-सम्भारात् सर्वभाषानुगामिनीम् । तीर्थकृत्त्वाद्भव्यहितां, देशनां जिनराट् ददौ ॥३१॥ आबाधारहिता मुक्तिः, स्वस्थाऽमोहाऽममाऽचला । संवेद्या योगिनामेषा तद्गा जीवाः समे त्विमे ॥३२॥ इति अष्टकबिन्दुः ॥

## स्याद्वादद्वात्रिंशिका (११)

इन्द्राणां विंशतिं दीप्रां, नखमिषात्सदा दधत् । नम्रेन्द्रमौलिरर्हन् स्ताद्, भव्यानां विघ्नवृन्दहा (स्याद्वादे-नाघनाशकः) ॥१॥ नयाः परस्परं घ्नन्ति, मत्सराघ्रातचेतसः । स्यात्पदे तान् समायोज्य, मैत्र्यां युक्ताः समेऽर्हता ॥२॥ विशेषवादिनः साम्य-वादिनोऽन्योन्यमाहति । दधुर्विशेषसामान्य-मयं वस्तु जगौ जिनः ॥३॥ क्रियावादो मतेर्वादं, हन्ति वादो मतेः क्रियां । ज्ञानक्रियाभवं मोक्षं, जिन आहाविरोधतः ॥४॥ हिनस्ति सद्वचोऽविद्यमानवादी तकं च तत् । सदसदात्मकं कार्य-मुशन् मैत्र्यां न्यवीविशत् ॥५॥ कार्यं कारणनाशेन, तदेव तद्भवत्यलम् । आख्यान्तौ योजितौ भेदा-भेदेन हेतुकार्ययोः ॥६॥ केचिन्नित्या अनित्याश्च, मतेऽर्थाः



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कस्यचित् पुनः। नित्यानित्यान् समानाख्याञ्जिनः समपदार्थवित् ॥७॥ निश्चयं व्यवहारस्तं, व्यथते स च निर्भयम् । परस्परसमावेशं, तीर्थाधारं जिनोऽवदत् ॥८॥ आर्थान् नयान् नयाः शाब्दा, घ्नन्ति ते घ्नन्ति चैतकान् । उभयान् सर्वगानाख्यञ्जिनः स्याद्वाददेशकः ॥९॥ नैगमं सांग्रही नीतिस्तां हन्ति व्यवहारिणी । पारम्पर्येण दृष्ट्वेति, मतं सर्वनयात्मकम् ॥१०॥ अभिलाप्यं तथा नेति, जगुर्वस्तु परेऽबुधाः । उभयात्मकताऽर्थानां, जगदे जगदुत्तमैः ॥११॥ पर्याया नाम करणिर्द्रव्यं भावस्तथोचिरे । स्वतन्त्राः सव्यपेक्षांस्तु, तानाह जगदीश्वरः ॥१२॥ पर्यायान् सत आचष्टे, परेऽसत उदित्वरः । मुनिः स्वतः सतोऽन्यस्मा-दसतः सर्ववस्तुषु ॥१३॥ नैवोत्पादमयं विश्वं, न पुनर्विशरारु च । ध्रुवं नोत्पादविगम-ध्रौव्यरूपं जगत्पुनः ॥१४॥ न दुःखी न सुखी जीवः, सर्वथा सर्वधामसु । संसारिणां विचित्रे स्तः, सुखदुःखे स्वकर्मजे ॥१५॥ सान्ताः समे न चानन्ता, अर्था भुवनगाः स्मृताः । अन्तानन्तमयं विश्वं, वस्तु जिनप ऊचिवान् ॥१६॥ साद्याः समे न चानाद्या, अर्था भुवनगामिनः । आद्यनादिमयं सर्वं, जगदीशो जजल्प तत् ॥१७॥ एकात्मकं जगत्सर्वं, मन्वते केचिदन्ततः । अनेकरूपं तच्चान्ये, जिन एकेतरात्मकम् ॥१८॥ मुक्त्यै सर्वं जगद्योग्य-मयोग्यं मन्वतेऽपरे । योग्यायोग्यमयाः सर्वे, भविनस्त्विति जैनवाक् ॥१९॥ आत्मा ज्ञानमयः कैश्चित्, कैश्चिदुक्तः क्रियामयः। अनन्तैः पर्ययैराढ्यं, सर्वं वस्तु यथार्थवाक् ॥२०॥ हिंसाऽपाय मता कैश्चित्, परैः स्वर्गाय काचन। यथाभावमघं पुण्यं, निर्जरेति जिनेशगीः ॥२१॥ मृषाद्या नरकायैव, न तथेति च केचन । अनेकान्तेन वितता, देशना जगदीश्वरैः ॥२२॥ क्रिया बन्धाय केषाञ्चित्, परेषां धिषणैव च । यथायोगं युगं चैतन्, मन्यते मुनिकुञ्जरैः ॥२३॥ उत्क्रामन्तेऽङ्गिनः सर्वे, न तथेति परे पुनः । विचित्रा विश्वगा वृत्ति-रनेकान्तमते पुनः ॥२४॥ सूर्याचन्द्रमसौ स्थास्नू, केचित् केचिच्च चञ्चलौ । अवादिषुर्मतं तथ्यं, जगत्सर्वं चलाचलम् ॥२४॥ असदुत्प-

P.P. Ac. Gunratnasuri M.S.          Jun Gun Aaradhak Trust

द्यते नैव, सन् नैवेति परे जगुः । सदसतोः समुत्पत्तिं, मन्वते तत्त्ववेदिनः ॥२६॥ साकारमीश्वरं केचित्, केचिदाकारवर्जितं । स्वीकुर्वन्ति मते जैने, स द्वयात्मकतामितः ॥२७॥ भेदेनोपासनामेके, परेऽभेदेन तां जगुः । यथाभूमिक्षमे ह्येते, मतं जैनेश्वरं पुनः ॥२८॥ ईशो द्रव्यस्तवेनेज्यो, भावेनेति तथा परे । यथायथं समाराध्य, आराध्यो जैनगीः पुनः ॥२९॥ द्रव्यात्मकं समं वस्तु, परे भावात्मकं परे । द्रव्यभावाव-भेदेन, भेदेन चेति तथ्यवाक् ॥३०॥ स्वतो ज्ञेयाः समे भावा, इत्येके केचिदन्यथा । अन्वयव्यतिरेकेण, वस्तूनां ज्ञानमार्हताः ॥३१॥ (आर्हता ज्ञानमूचिरे) जीवो वालाग्रपर्वादि-मानः सर्वगतस्तथा । प्रतिपन्नो विचित्रस्तु, शरीराश्रित आर्हतैः ॥३२॥ अर्थाः सर्वेऽपरनयमतैः स्वीयसङ्कल्पजाल-माश्रित्योक्ता विविधवचनैः सर्वबोधप्रहीणैः । उन्मूल्याप्ता हतमतिचयं कर्मवृक्षं समस्तं, ज्ञात्वा ज्ञेयं समभुवनगं चख्युरानन्दसिद्ध्यै ॥३३॥ इति स्याद्वादद्वात्रिंशिका ॥

## अनन्तार्थाष्टकम् (१२)

ननु सूत्रेषु वाक्यस्य, जिनोक्तस्य विवेचिता । अनन्तार्थयुतिः स्पष्टा, यत एतदुदाहृतम् ॥१॥ वालुकाः सर्वधुनीनां, सर्वाब्धीनां ग्रुषन्ति च । अर्थास्ततोऽप्यनन्ताः स्यु-र्जिनोक्ते वचसि ध्रुवम् ॥२॥ यदि सामान्यतः सर्वे, शब्दाः सर्वार्थवाचकाः । इति न्यायोऽत्र बोद्धव्यः, का जिने तर्हि वर्यता ॥३॥ विशेषतो न सन्त्यस्य, यत्सङ्ख्येयं नृजीवितं । शक्नोति नेयता वक्तु-मनन्ता जातुचिन्नरैः ॥४॥ सत्यं, न केनचित्प्रोक्ता, अनन्ता जिनवाग्गताः । अर्थास्तथाप्यनन्तार्थं, वचो जैनं न चान्यथा ॥५॥ यावतोऽर्थान्नरो वेत्ति, तावतां बाधमीक्षते । वचसि स्वे परित्यज्य, तं सर्वं वदति प्रधीः ॥६॥ अर्थांल्लोकगतान् सर्वान्, वीक्षमाणो जिनो वचः । सर्वानुगं निराबाधं, वचो वदति निश्चितम् ॥७॥ एवं जैनं वचोऽनन्त-पदार्थान्



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

व्याप्य संस्थितं । बाधं चानन्तगं त्यक्त्वा-ऽनन्तार्थं तत उच्यते ॥८॥ इत्यनन्तार्थाष्टकम् ॥

## पर्वविधानम् (१३)

प्रणम्य नतयोगीन्द्रं, देवार्च्यं त्रिजगद्गुरुं । जिनं मासाब्दविभिदो, वक्ष्ये पर्वोपलब्धये ॥१॥ उद्यम्यं सर्वदा धर्मे, कर्मबन्धभयान्वितैः । हित्वाश्रवान् संवरैक-साध्ये निःश्रेयसप्रदे ॥२॥ सम्यक्त्वेऽतो विनिर्दिष्टे, लक्षणे मुनिपुङ्गवैः । संवेगभवनिर्वेदौ सद्दृग् तद्धर्मलिप्सुकः ॥३॥ लक्षणं लिङ्गमित्युक्त्या, न भ्रान्तव्यं हितैषिणा । अग्नेरौष्ण्यस्य लिङ्गत्वे, किं नान्योन्यनियन्त्रणा ? ॥४॥ किंतु यत्र मनो नास्ति, सार्वेऽपर्याप्त ऊर्ध्वगे । सहकार्यभावतस्तत्र, मनोजन्या न कल्पना ॥५॥ पर्याप्तेऽपि क्वचिज्जन्तौ, कादाचित्को विपर्ययः । स लेश्याद्यनुबन्धेन, लक्षणं तु पुनः स्थिरम् ॥६॥ धर्मस्य विद्विषां विघ्न-कारिणां गर्हणावतां । तत्क्रियामचिकीर्षूणां, तन्न सम्यक्त्वमंशतः ॥७॥ शान्तेर्दर्शनमोहस्य, यथार्था जायते रुचिः । सत्तत्त्वगा पुनः पापा रतिः संयोजनाक्षयात् ॥८॥ प्राग्भाविनोऽस्य लिङ्गत्वं, न विरुद्धं यतो मतः । पुण्योदयः पुनर्वस्वोरुदयस्यापि बोधकः ॥९॥ एवं सत्यपि सर्वेषां, सद्दृशां न वृषोद्यमः । तदिच्छाभावतो नैष, किन्तु चारित्रमोहजः ॥१०॥ अत एव च सार्वज्ञ्या-धिष्ठिता भरतादयः । गृहस्थाः आददुर्दीक्षां, मोहाभावाज्जगद्गुरोः ॥११॥ गृहिलिङ्गेऽन्यलिङ्गे च, शास्त्रे सिद्धिरुदाहृता । साऽन्तर्मुहूर्त्तजीवित्वे, नान्यथेति श्रुते मतम् ॥१२॥ तेन चारित्रमोहस्योदयाद्धर्मं चिकीर्षति । नापि व्रतं यतो रुद्धः, पञ्जरे क्षुधितो वसेत् ॥१३॥ अप्रत्याख्यानमोहस्य, शमात् स्याद्देशतो व्रतं । यथाऽभ्रकाणामल्पत्वे, ज्योतिर्देशाद्दिवस्पतेः ॥१४॥ देशतो विरतः कुर्याद् वधादेर्विरतिं कथां । यावद्दिगादिनियमं, कश्चिद्दिष्टमपि श्रयेत् ॥१५॥ पौषधावश्यकतपो-देशावकाशिकानि तु । पर्वाण्यवेक्ष्य भवभी-त्रस्तोऽवश्यं समाचरेत् ॥१६॥ पर्वाणि पक्षमासाद्बभेदानुसरणानि तु । ततोऽत्र मासवर्षाणां,



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भेदान् वक्तुमुपक्रमः ॥१७॥ युगं स्याच्चन्द्रचन्द्राभि-वृद्धचन्द्राववर्धितैः । नैकं तत्र क्रियायोगि, कर्माब्दं तु क्रियाविधौ ॥१८॥ विहाय कार्मणं वर्षं, नकस्मिन्नपि सम्भवेत् । दशपञ्चदिनः पक्षो, मासस्त्रिंशद्दिनोन्मितः ॥१९॥ मासद्वादशभिर्वर्षं, षष्टया: शतत्रयैर्दिनैः । अत एवोदितं ज्योतिष्करण्डे कार्मणं तथा ॥२०॥ वर्षाणि पञ्चधा कर्मेन्दुक्षसूर्याभिवर्धितैः । निरंश एक एवात्र, कर्मसंवत्सरो भवेत् ॥२१॥ व्यवहारोपयोग्येष, नान्ये सांशदिनोद्भवाः । संवत्सरास्ततः स्पष्ट, क्रिया कार्मणवार्षिकी ॥२२॥ अहोनिशोऽवसाने द्वे, मते आवश्यके बुधैः । ऋते कार्मणमन्याहो, न हि तत्रोपयुज्यते ॥२३॥ अष्टमी पक्षमध्ये स्यात्, पक्षान्ते पञ्चदश्यपि । अर्वाक् पक्षदिनात्कार्यं, चतुर्दश्यां तु पाक्षिकम् ॥२४॥ सर्वमेतत् कार्मणाब्द-कालमाश्रित्य साध्यते । न्याये-नैव (नान्येन तत्) ततः कार्ये चातुर्मासिकवर्षिके ॥२५॥ न च वाच्यं कथं तर्हि, वर्षेऽभिवर्धितेपि च । विंशत्या दिवसैः कार्योदिता पर्युषणा श्रुते ॥२६॥ एवं सति न कर्माब्दं, युज्यते सर्वपर्वसु । न तत्र वार्षिकं पर्वो-दितं पर्युषणाभिधम् ॥२७॥ किन्तु संयमसिद्ध्यर्थं, जलकायविराधनां । परिहर्तु स्थितिं वक्तुं, मुनीनां तद्वचो मतम् ॥२८॥ चन्द्रेऽन्यथा परे वर्षे, कथं भाद्रपदे भवेत् ? । त्रयोदशभिरायातं, मासवर्षिक-मामतम् ॥२९॥ न च चन्द्रादिवर्षाणामेकस्यात्रसानिता । भाद्रपद्यस्ति पञ्चम्यां, चतुर्थ्यां वा कथञ्चन ॥३०॥ कामणाब्दं तु वक्तृणां, विवक्षामनुयाति तत् । चतुर्थ्यां भाद्रमासस्य, भवेद्वार्षिकपर्व तु ॥३१॥ न च केनापि सर्वत्र, हायने वार्षिकं मतम् । अभिवृद्धे दिनैर्विंशत्या, किन्त्वाषाढात्परेऽधिके ॥३२॥ शास्त्रे पौषाषाढयोस्तु, वृद्धौ पर्युषणोदिता । विंशत्या यद्दिनैस्तत्किमर्धजरतीयमाश्रयेत् ॥३३॥ यथा वृद्धौ तु मासस्य. पर्वघस्त्रोऽवष्वष्कति । यवनानां तथैषां स्यान्न चेद् भाद्रपदे ध्रुवम् ॥३४॥ वृद्धौ यथाऽन्यमासानां, चतुर्मासीत्रिकं म? । वार्षिकेणापराद्धं किं, न तन्नियतमामतम् ॥३५॥ दिनेषु सप्ततौ शेषेषूक्तं वार्षिकपर्व यत् । तत्किं विस्मृतमायुष्मन् !, नच शास्त्रवचऽन्यथा ॥३६॥ चतुर्मासीत्रिके मासो, वृद्धो न गणनामयेत् ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

आषाढादिषु तत्कार्यात् नैवं किं वार्षिकं भवेत् ॥३७॥ तिथेर्हानिश्चन्द्रमासोऽपेक्ष्यतोर्वृद्धियुक्तता । ततः कार्मणमाश्रित्य, पर्व वर्षमिति ध्रुवम् ॥३८॥ एवं न्यगादि शुभकृत्यसमूहहेतुः, पर्वाब्दिकं नियतधर्मविधानदक्षं । कर्माद्भमाप्य जिनराजमतानुसारि, कृत्वा भवन्तु भविनोऽद उदीर्णबोधाः ॥३९॥ इति पर्वविधानम् ॥

## सूर्योदयसिद्धान्तः (१४)

नत्वा नम्यं नराधीशैर्जिनेशं शुद्धिकाम्यया ।
ब्रुवे सिद्धान्तमुदयेऽर्कस्याराधनसिद्धये ॥१॥

अत्र हि 'चाउद्दसट्ठमुद्दिट्ठपुण्णमासिणीसु पडिपुण्णं पोसहं अणुपालेमाणे'त्ति सूत्रकृताङ्गादिवचनात् 'अट्ठमीचउद्दसीनाणपंचमीपज्जोसवणाचउमासीए चउत्थट्ठमछट्ठं न करेइ पच्छित्तं'ति श्रीमहानिशीथभणितेः 'एएसु चेव चेइयाइं साहुणो वा अण्णाए वसहीए ठिया ते न वंदंति पच्छित्तं'ति व्यवहारपीठिकाचूर्ण्युक्तेः 'एतेषु चाष्टम्यादिदिवसेषु चैत्यानामन्यवसतिगतसुसाधूनां वाऽवन्दने प्रत्येकं प्रायश्चित्त'मिति व्यवहारपीठिकावृत्तिविवरणात् 'अट्ठमी चउद्दसीसुं अरिहंता साहुणो य वंदेयव्वे'त्यावश्यकचूर्ण्युच्चारात् 'अट्ठमीचउद्दसीसु उववासकरणं'ति पाक्षिकचूर्णिनिरूपणात् 'अट्ठमछट्ठचउत्थं संवच्छरचाउमासपक्खेसु'त्ति निशीथादिनिगदितेश्च सर्वेणापि चतुर्वर्णचतुर्विधसङ्घेन शुद्धये धर्माराधनाया अवश्यमादौ तिथिकालस्य निश्चयः कार्यः, अन्यथा प्रतिपदमुक्ततिथिविधानस्यानर्थक्यप्रसङ्गात् । तिथयश्च काश्चित् क्षीणा लौकिकाभिप्रायेण वृद्धा अपि भवन्ति, ततश्च का आराध्या इति संशयापनोदक्षमेण 'क्षये पूर्वा तिथिः कार्ये'तिवचनेनाराध्यतिथेः क्षये तत्पूर्वस्या अपर्वतिथेः क्षयं कृत्वा सैवापर्वतिथिः पर्वतिथित्वेन कार्या ग्राह्या व्यपदेश्येति यावत् । एवं च पर्वतिथेर्वृद्धौ 'वृद्धौ कार्या तथोत्तरे'तिवाक्येन द्वितीयैव टीप्पनगता पर्वतिथिः पर्वतिथिनाम्ना कार्या व्यवहार्या व्यपदे-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्येति यावत् । एवं च पूर्वा अपर्वतिथिनाम्ना व्यपदेश्येति फलितोऽर्थः । एवं पर्वानन्तरपर्वतिथेः क्षयवृद्धयोर्यावत्सम्भव इति न्यायेन पूर्वतरापर्वतिथ्योर्हानिवृद्धी कार्ये इति । एतादृशे सत्यपि सिद्धान्ते पारम्पर्ये च केचित्तपोगच्छीया विप्रतिपद्यन्तेऽधुना, यदुत-'संवच्छरचाउम्मासे पक्खियअट्ठाहियासु य तिहीसु । ताओ पमाणं भणिया जाओ सूरो उदयमेइ' ॥१॥ त्तिवचनात् 'उदयंमि जा तिही सा पमाणमियरीइ कीरमाणीए । आणाभंगऽणवत्थामिच्छत्तविराहणं पावे' ॥१॥ त्ति वचनाच्चोदयवतीनां सप्तम्यादीनामनुदयवदष्टम्यादिकरणं सम्पूर्णोदयवतीनामष्टम्यादित्वे सत्यपि सप्तम्यादित्वकरणं च न कथञ्चनापि घटाकोटीमाटीकते, तस्माद्यथोदयमेव तिथयः कार्या इति । ननु पर्वतिथीनां हानौ वृद्धौ चोदयस्याभावे द्विर्भावे च सति तैः किं पर्वतिथेरनुष्ठानं क्षेप्यं वर्धनीयं चेति ? । नो तथा, किन्तु पूर्वतिथौ क्षीणपर्वतिथेरनुष्ठानं, परं व्यपदेशोऽपर्वतिथिसत्कनाम्नैव, द्विर्भावे चोभयमपि पर्वतिथिनाम्नैव व्यपदेश्यं, परं पर्वतिथिसत्कमनुष्ठानं तु द्वितीयोदयस्पर्शिन्यां कार्यमितिचेत्, सप्तम्यादित्वमभ्युपगम्य किंनिमित्तकमुपवासादिकरणं तदा प्रथमोदयस्पर्शिन्यां चाष्टम्यादौ तिथौ किं न तदष्टम्यादिनिमित्तता स्वीक्रियते कथं च पाण्डित्यातिरेकदर्शिनीं व्याख्याकुशलतां परिहृत्यानुदयेऽष्टम्यादिक्रियाया आदृतिः, सति चाष्टम्यादेरुदये व्यवहारे चाष्टम्यादिक्रियाया आद्यदिने अनादृतिश्चेत्युभयं क्रियते स्वीक्रियते च एवमनुदये करणादाराधनाया अष्टम्यादिनिमित्तायाः सति चोदये तदकरणात् स्ववचसैव ते जाता मिथ्यात्वादिदोषचतुष्टयवन्त इति । नन्वस्ति तेषामाराधनायास्तथाविधाया आलम्बनं ?, 'क्षये पूर्वा तिथिः कार्या वृद्धौ कार्या तथोत्तरे'त्युमास्वातिनाम्नाख्यातः प्रघोषः । सत्यं, विद्यते एष प्रघोषो मान्यश्च, परं तत्र पूर्वायाः पर्वत्वविधानमुत्तराया एव च पर्वतिथित्वविधानं समादिष्टं । विधानमाराधनायास्तु तत्तद्विधिनियमयोरङ्गीकारेण व्यपदेशं तत्तत्तिथ्यादित्वेन कृत्वैव स्वीकारे च तथाविधे 'उदयंमी' त्यादि बाधितमेव तदा तवेति । 'ननु किं तर्हि 'ताओ'त्यादि 'उदयमी'त्यादि च वचो व्यर्थमेवेति ? चेद्,



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हानिवृद्ध्योः प्रसङ्गे तत्तथैव । ननु किमर्थकं तर्हि तद्वचः ? इति चेद्धानिवृद्धिव्यतिरिक्तप्रसङ्ग एव तदुपयुक्तं, हानिवृद्ध्योस्तु तद्बाधितमेव । ननु हानिवृद्धिव्यतिरिक्ते काले तदुक्तेः किं प्रयोजनं ?, कथं च तत्र तदनङ्गीकारे मिथ्यात्वादिचतुष्टयमिति ?, चेच्छृणु, अष्टम्यादयस्तिथयस्तावत् पौषधादिना सचित्तत्यागादिना चाराध्याः । सा चाराधनाऽपरसूर्योदयान्तं यावत् सम्पूर्णपौषधस्याहोरात्रमात्रत्वात् कार्या, तिथयश्च लोकोत्तरमार्गेऽहोरात्रादूना एव । लौकिके तूना अधिका अपीति न पौषधकालं यावन्नियतावस्थाना इति । कीदृश्यस्ता आराधनार्थमालम्ब्या इति संशयान्धकारविनाशाय 'ताउ तिहीउ पमाणं' त्यादि 'उदयंमि जा तिही सा पमाणं' त्यादि चोक्तं । तथा चोदयव्यापिनी तिथिरपरसूर्योदयान्तव्यापिनी ज्ञेया । पारासरोऽप्येतदेवाह-'आदित्योदयवेलायां, या स्तोकापि तिथिर्भवेत् । सा सम्पूर्णेति मन्तव्ये'ति । तथा च प्रत्याख्यानग्रहणकाले या सा तं समग्रं दिनं यावन्मन्तव्या । प्रत्याख्यानकालग्रहणकालश्च सूर्योदयादर्वागेव, प्राक् सूर्योदयादुपकरणदशकप्रतिलेखनोक्तेः । ततश्च निरस्ता मूलत एव ते ये सायं प्रतिक्रमणकालव्यापिनीममिमन्वते अहोरात्रिक्याराधनायां पर्वतिथिं । एवं चोदयस्पर्शात् प्राग्बहुतराया अपि पर्वतिथेस्तत्त्वेन व्यपदेशाभावो, द्वितीयाग्रेतनतिथिभोगकालेऽपि उदयस्पर्शिन्या एव तिथेर्व्यपदेशोऽपि न दुष्ट इति सर्वं सुस्थम् । एतेन च ये एकस्मिन्दिने तिथिद्वयस्य वाचका आराधका वा ते निरस्ता, उदयस्पर्शिन्या एकस्या एव भावात् । क्षये वृद्धौ च 'क्षये पूर्वा तिथिः कार्या, वृद्धौ कार्या तथोत्तरे'त्यनेनैकस्या एव च प्रत्यवस्थापनात् । न च पर्वतिथौ, क्षीणायां विराधने तन्नियमानां पूर्वतिथौ न्यूनं प्रायश्चित्तं वृद्धौ वा प्रागुदयस्पर्शिन्यां तथाभावे स्वल्पमपि प्रायश्चित्तं तैरुत्थापकैरपि गृह्यते दीयते । प्रातस्त्यप्रत्याख्यानकायोत्सर्गे त्वष्टम्यादिरिति क्षये पूर्वापर्वतिथौ वृद्धौ चोत्तरदिन एवोच्यते । एवं चायथाकारिवादित्वेनाज्ञाभङ्गानवस्थामिथ्यात्वविराधनारूपदोषचतुष्टयापत्तिर्दुर्वारा, तथाहि-सम्पूर्णमहोरात्रं पर्वतिथीनामष्टम्यादीनामनङ्गीकाराद् द्विर्भावाङ्गीकाराच्च प्रतिपूर्णेत चतुष्पर्वीति



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

च याऽऽज्ञा तस्या भङ्गः, पर्वतिथीनां क्षीणत्वस्य स्वीकृतावनेके तदनुष्ठानं परित्यजेयुः, केचिदर्धपालनं तन्नियमानां कुर्युरिति क्षये, वृद्धेः स्वीकृतौ च केचिद्दिनद्वयं केचिदुत्तरं केचित्पूर्वं संशयानाः केचिन्नेकमपि पर्वतिथिदिनमाराधयेयुरित्यनवस्था, 'उदयंमी'त्यादिकस्य 'क्षये पूर्वे' त्यादिकस्य चाश्रद्धानादागमस्य मिथ्यात्वं, यथोक्तमार्गस्य तदनुयायिनां च विरोधाद्रत्नत्रय्या विराधनेति चतुष्टयमाज्ञाभङ्गादीनामापद्यन्तेऽधुनातनोत्थापका इति । यथार्थमार्गागमनं ह्यमुष्मात्, कुर्युः समुत्थापनमार्गलग्नाः । फलेग्रहिर्मेऽयमणुप्रमोऽपि, यत्नस्त्विति प्रार्थयते जिनेशम् ॥१॥ इति सूर्योदयसिद्धान्तः ॥

## सांवत्सरिकनिर्णयः (१५)

नत्वाहं सर्ववस्तुज्ञं, कामदं कामवर्जितं । पर्युषणाया निर्णेत्रीं, वक्ष्ये वाचं श्रुतानुगाम् ॥१॥ अह्नि जातं यथा पापं, शुध्येत् दैवसिकादृतैः । रात्रिकादरणाद्रात्रौ, जातं पापं शमं व्रजेत् ॥२॥ पाक्षिकं पक्षसम्भूतं, पापं क्षयति सङ्गतम् । पक्षश्चतुर्दशीप्रान्तो, वर्णितो विश्वलोचनैः ॥३॥ यतो दिनाद्विधीयेत, गणनां गणगामिभिः । तद्दिनप्राप्तिमाश्रित्य, पक्षो गण्येत धीधनैः ॥४॥ अत एवोदितिः साधोः, पाक्षिकप्रतिक्रान्तिगा । चतुर्दश्यां ततोऽभक्तं, प्रोक्तं गणधरैः श्रुते ॥५॥ अत एवागमे श्राद्ध-व्रतालापेषु सञ्ज्ञितं । चतुर्दश्यष्टमीत्यादि, पाक्षिकं हृदि स्थापनात् ॥६॥ अन्यथा प्राग्भवाऽऽख्येया-ष्टमी पश्चाच्चतुर्दशी । आनुपूर्व्येण यद् द्वन्द्वः, कार्यो व्याकरणाश्रितैः ॥७॥ प्रतिपक्षमुभे शेषा, न तथेति न चिन्तनं । तत्रानुपूर्व्यभावस्य चिन्त्यो हेतुः परोऽत्र वा ॥८॥ यत्रोक्तं मुनिभिः शास्त्रे, पाक्षिकं, न चतुर्दशी । तत्र सा यत्र तत्तत्र, नेति सैव च पाक्षिकम् ॥९॥ चतुर्दश्यामभक्ते स्यात्, पौर्णमास्यां तु पाक्षिके । द्वयोः सङ्गे भवेत् षष्ठं, न च वाक्यं तथा क्वचित् ॥१०॥ ननु पक्षान्तगं युक्तं, पाक्षिकं स च पर्वणि । तच्चोद्दिष्टापौर्णमास्यो-रिति युक्तं तयोस्तकत् ॥११॥ सत्यं परं तज्ज्योतिष्कं, न प्रतिक्रान्तिगोचरम् । अन्यथा हायनस्यान्त, आषाढ्यां तत्र



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वार्षिकम् ॥१२॥ भवेन्, न चैव तत्तत्र, भवतापि विधीयते। अहोरात्रेश्च योऽन्तोऽपि, न तत्रैतत्प्रतिक्रमः ॥१३॥ स पक्षो ननु किं सौरश्चान्द्रो वाऽन्योपि वा मतः ?। नैकोऽपि युज्यते तत्र, चतुर्दश्यां तु पाक्षिके ॥१४॥ पञ्चदश्यां यदीष्टं स्यात्, पाक्षिकं तर्हि चान्द्रकः। पक्षो युज्येत नैतद्वः, सम्मतं यौक्तिकं पुनः ॥१५॥ अह्नो रात्रेश्च निधने, यथोभौ च प्रतिक्रमौ। तथा पक्षस्य निधने, पाक्षिकं युक्तिमन्ननु ॥१६॥ सौरे पक्षे तु सार्धानि, दिनानि दश पञ्च च। अधिकानि ततो नैव, युक्तं तेनापि पाक्षिकम् ॥१७॥ युक्तमुक्तं परं तन्न, युक्तं यच्चान्द्रके दले। न्यूनान्यहानि ते पञ्च-दशभ्यो न च युक्तिमत् ॥१८॥ ऋतु-पक्षं तदाश्रित्य, कार्मिकं वा विधीयते। पाक्षिकं तत् पञ्चदशे, प्रायेणाह्नि समाप्नुयात् ॥१९॥ क्वापि पक्षे भवेन्न्यूना, रात्रिस्तत्रापि न त्रुटिः। तिथेर्भोगो यतस्तत्र, न न जातो यतः क्षयेत् ॥२०॥ अत एव तिथेः कार्यं, प्राक्तिथौ क्रियते बुधैः। परस्यां क्रियमाणे तु, तद्गन्धोऽपि न लभ्यते ॥२१॥ पञ्चदशाहानीत्यादि, अत एव च पाक्षिके। उच्यते तिथेः ख्यानं, समाश्रित्य बुधोत्तमैः ॥२२॥ हानिश्च षष्ट्याऽहोभिः स्यात्, पक्षे पक्षे तिथेर्ध्रुवम्। तेनैव पौरुषीमाने, सप्ताह्याऽङ्गुरुचालनम् ॥२३॥ षण्णां चावमरात्राणां, श्रुतोक्तिः सङ्गता तथा। नन्वेवं वर्धने तिथ्याः, क्व कर्तव्या तिथिक्रिया ? ॥२४॥ शृणु सौम्य ! न जैनानां, ज्योतिष्के वर्धनं तिथेः। यतो वृद्धौ तिथेस्तस्याः, क्रियायां प्रच्छनं भवेत् ॥२५॥ लौकिके ज्योतिषे सास्ति, मान्यते सा तदाश्रितैः। अस्माभिर्ननु तत्रान्स्या, तिथिर्मान्यात्र कारणम् ॥२६॥ शास्त्रकृद्भिश्चतुर्मासी, द्वितीयाषाढमासि यत्। सम्मताऽऽषाढपूर्त्यां तद्, द्वितीया तिथिराहता ॥२७॥ न च लौकिकमार्गानु-सरणं नैव यौक्तिकं। यतः श्रुतेऽपि विद्वद्भिः, कर्ममासादि साधितम् ॥२८॥ मासर्क्षादि च सूत्रेऽपि, व्यवहाराश्रितं स्मृतम्। पौरुष्यादि च सूत्रेषु, तमेवाश्रित्य संस्मृतम् ॥२९॥ पुरा जैनसमं राज्ञां, ज्योतिषं समवर्तत। यतः प्राच्ये कौटिलीये, नीतिशास्त्रे स्मृतं ह्यदः ॥३०॥ आषाढ्यां वत्सरस्यान्तः, प्रावृडाद्या



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रसोन्मिताः। ऋतवः षड् दिनैः षष्ट्या, तिथेर्हानिः क्रमाद् भवेत् ॥३१॥ युगमध्ये भवेत्पौषो, वृद्धः शुचिस्त-
दन्तिमः। दिनरात्र्योर्मानमष्टा-दश द्वादश नालिकाः ॥३२॥ उत्कर्षेण जघन्येन, द्विधा मध्ये प्रवह्निकौ। पौरुष्यपि
तथा तेषां, तुर्यांशौ जैनवत् तयोः ॥३३॥ नृपैर्ज्योतिषिकेऽन्यस्मिन्नादृते लौकिके वयम्। तदेवानुसरामो
यज्ज्योतिषं दुर्जरं मुनेः ॥३४॥ व्यवहारे हि जैनानां, नान्तरं लौकिकैर्हि तं। मुनेराधुनिकस्य स्यात्, तत्सं-
सर्गादिवर्धनम् ॥३५॥ आम्नायोस्ति न च तादृग, येन संवाद्यतेऽध्यक्षतः। तेनेदानींतनर्षीणां, ज्योतिष्कं
लौकिकं ननु ॥३६॥ टीप्पणं लौकिकं जैनैश्चेदुरीक्रियतेऽधुना। पर्वाण्यपि च तन्मासतिथ्याद्याश्रित्य संगतम्
॥३७॥ प्रागासन् पूर्णिमास्वेव, तिसृषु तिस्र आमताः। चतुर्मास्यो यदा पर्वोज्वले भाद्रे तु पञ्चमी ॥३८॥
आर्यकालकसूरीशैः, प्रभावकैर्यदा पुनः। चतुर्थ्यामादृतं पर्व, सर्वसङ्घपुरस्सरैः ॥३९॥ ततः प्रभृति सर्वेण,
संघेनाहनि तत्र च। क्रियतेऽदो हेतुयुक्तं, नाग्रहो ननु धर्मिणाम् ॥४०॥ पक्षान्ते पाक्षिकं शुद्ध्यै, सञ्ज्व-
लनकषायिणां। प्रत्याख्यानावृतां तद्वत्, चातुर्मासिकमीरितम् ॥४१॥ वार्षिकं त्वप्रत्याख्यान-कषायवि-
निवृत्तये। तदत्र तत्तिथेर्भद्रो, नातिक्रम इति श्रुतिः ॥४२॥ स्वतन्त्रं पाक्षिकं तेन, चतुर्दश्यां तदादितः।
न चतुर्मासिकं यत्तद्वार्षिकेण समं युतम् ॥४३॥ अतिक्रान्ते चतुर्मास्याः, सविंशे मासि प्रावृषि। वार्षिकं
सप्ततौ घस्रेष्ववशेषेषु कार्तिकम् ॥४४॥ न रात्र्यतिक्रमो यद्वद्वार्षिके हितसाधकः। तथैव च चतुर्मास्यां,
व्यत्ययोऽतो द्वयोरपि ॥४५॥ निशीथचूर्णिकाराणां, वचोऽपि तत्प्रदर्शकम्। यदाख्यातमथेदानीं, किं चतुर्थ्यां
तु वार्षिकम् ? ॥४६॥ समाहितं तत्र पूज्यैः, कालकार्यादृतीरणात्। न च तत्रोदितं कैश्चिद्वार्षिकं पञ्चमीदिने
॥४७॥ चतुर्थ्याचरणे ख्यातं, सर्वसंघानुवर्त्तनम्। तेन श्रमणसंघेन, मतो वार्षिकव्यत्ययः ॥४८॥ ज्ञायते
न च कोऽप्यध्वा, तदात्वो वृत्तिभाग् यतः। केषाञ्चिदमतो वर्ष-पर्वात्यययो विकल्पभाक् ॥४९॥ हायनेऽन-
न्तरे स्वर्गं, जग्मिवांसो गणाधिपाः। पाश्चात्यैरादृतं ख्यात्यै, वाक्यमेतन् न सद्दृशाम् ॥५०॥ यतो न



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चूर्णिकाराद्या, वक्तुं शक्या ह्यसदृदृशः । तथोक्तौ न च पञ्चाङ्ग्याः, प्रामाण्यं न च शासनम् ॥५१॥ पाक्षिकं तच्चतुर्दश्यां, प्रतिपक्षं श्रुतोदितम् । आषाढ्याद्याश्चतुर्मास्य-श्चतुर्दशीषु सङ्गताः ॥५२॥ नन्वेवं न्यूनतामेति, पाक्षिकत्रितयं यतः । चतुर्मासीप्रतिक्रान्तौ, क्रियते नहि पाक्षिकम् ॥५३॥ वर्षस्यान्तस्ततो वो न, चतुर्विंशतिरुद्भवेत् । पाक्षिकाणां त्रये न्यूने, तच्च सिद्धान्तबाधितम् ॥५४॥ न तावत् पाक्षिकाण्याहुर्नियतानि मुनीश्वराः । तत एवाधिके मासे, पाक्षिकद्वयमेधते ॥५५॥ चतुर्मासी यतो वृद्धौ, मासो न परिवर्त्तते । ततो नियता विज्ञेया माभिराषाढमुख्यकैः ॥५६॥ ससङ्क्रान्तिको यदाषाढस्तस्य शुक्ला चतुर्दशी । यदा तदा चतुर्मासीं, तदीयामाहुः कोविदाः ॥५७॥ अत एवागमे प्रोक्त-मभिवर्धितवत्सरे । अवस्थानादि विंशत्या, दिनानां तु व्यतिक्रमे ॥५८॥ चन्द्रेषु त्रिषु यस्मात् स्याद्, वर्षा श्रावणगाऽऽदिमा । अभिवर्धितवर्षे तु, भवेदर्वाक् ततस्तथा ॥५९॥ अत एवान्यथाकारे, तत्र, षट्कायगोचराम् । विराधनां जगौ गीत-यशाः शास्त्रे प्रपञ्चतः ॥६०॥ अन्यथा तत्र सम्यक्त्व-ज्ञानादिहतीर्वदेत् । संवत्सरप्रतिक्रान्तिर्यत आचारपञ्चके ॥६१॥ अत एव जिनाचार, आश्रितः कल्प आगमे । यतोऽत्राख्यायते वीर-मादितस्तत्परम्परा ॥६२॥ न च तीर्थेश्वराः कल्पा-तीताश्च कः प्रतिक्रमः । आराध्याभावतस्तेषां, का कथा वार्षिके तदा ॥६३॥ यथा वर्षास्ववस्थानं, तेषां नियतमाश्रितं । तथाऽन्येषामपीष्टं तत्, सूरीणां कल्पवाङ्मये ॥६४॥ हेतुपृच्छा कृता तत्र, यदा तत्राप्युदाहरत् । गृहस्थैः स्वगृहं स्वार्थसंस्कृतं स्याद्यथा तथा ॥६५॥ न च सांवत्सरे हेतुः, स्यात् प्रतिक्रमणे सकः । तथा च वर्षावस्थान-ज्ञापकं तद्वचो मतं ॥६६॥ अत एव च तुर्येङ्गे, वर्षावस्थानमाश्रितं । निश्रीकृत्य जिनं वीरं, सविंशे मासि सङ्गतम् ॥६७॥ शेषेषु सप्ततौ तत्र, दिनानां पर्व वर्णितम् । वार्षिकं पर्व यन्न स्याज्जिनानां कल्पितामृते ॥६८॥ किञ्च स्थानाङ्गसूत्रेऽपि, पञ्चमेऽध्ययने जगौ । गणभृद्वाचमाश्रित्या-भयदेवसूरीश्वरः ॥६९॥ न विहारो मुनीनां स्याद्युक्तः प्रथमप्रावृषि । परं स सापवादोऽस्ति, नापवादस्तु

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सप्ततौ ॥७०॥ एवमेव च कल्पादौ, वर्षावस्थानमादिमं । गदितं मास आषाढे, पूर्णिमाया दिने पुनः ॥७१॥ परमेव सविंशे हि मासे ख्यातं तकद् बुधैः । तथा च व्यक्तमेवेदं, द्वितीयं पदमाश्रितम् ॥७२॥ नचावस्थानविषयोऽपवादो वार्षिकं व्रजेत् । नान्यार्थोपोदितं यस्मान्नान्यदाश्रयते वचः ॥७३॥ वार्षिकं नियतं भाद्र-पदे शुक्ले दले पुनः । चतुर्थ्यां न च तत्रास्ति, द्वितीयं पदमाश्रितम् ॥७४॥ अत एव च कल्पस्य, सामाचार्यां गणेश्वरः । जगौ पृथक् पृथक् सर्वाः, सामाचारीर्मुनीश्वरान् ॥७५॥ अन्त्ये च क्षामणासूत्रं, गदितं गणभृद्वरैः । अक्षामणे च निर्ग्रन्थ-सङ्घबाह्यकृतिः पुनः ॥७६॥ न च मुनीनां सर्वेषां, सामग्री सर्वदा समा । इत्यवस्थानमर्यादा, सापवादा न चेतरा ॥७७॥ वर्षास्थित्या अनियतत्वे, हानिर्न हायनेऽपरे । सांवत्सरस्य दिननियतत्वं न युज्यते ॥७८॥ चन्द्रेऽब्दे मासदशकं, द्व्यधिकं स्यात् परं मुधा । त्रयोदश भवेयुस्ते, मासास्तत्रैव हायने ॥७९॥ द्वितीये श्रावणे भाद्र-पदे वाऽऽद्ये प्रतिक्रमे । अभिवर्धितवर्षेऽन्य-वर्षे भाद्रे त्रयोदश ॥८०॥ दिनानां विंशतौ सूत्रं, वर्षावस्थानगोचरं । सर्वाभिवर्धिते प्रोक्तं, न चतुर्मासगोचरम् ॥८१॥ परं विधिः स प्रागासीदनित्यावस्थितौ मुनेः । अधुनाषाढशुक्लस्य, चतुर्दश्यां न तस्थुषः ॥८२॥ सांवत्सरं तु प्राचीना, अपि नित्यं प्रतिक्रमं । व्यधुर्भाद्रपदे शुक्ले, नान्यत्र तत्र कारणम् ॥८३॥ प्रागुक्तमेव यत्तत्र, न युक्तस्तिथ्यतिक्रमः । या तिथिः प्राग्भवेद्वर्षे, सैवान्यस्मिन् विधीयते ८४॥ अत एव च सूरीशैर्वार्षिकं परिवर्त्तितं । न चेद् द्वितीयवर्षे किं, पर्व नैव च पूर्ववत् ॥८५॥ उच्यते यच्च सप्तत्यां, शेषायामितिसूत्रगं । वचश्चन्द्राब्दविषयं, न पञ्चाशद्दिनी पुनः ॥८६॥ तन्नभसि द्वितीयस्मिन्, प्रथमे वा वार्षिकक्रिया । कैश्चित्तद्युज्यते नैव, यतः सूत्रस्य भिन्नता ॥८७॥ नैव चार्धजरतीयन्यायस्याश्रयणं शुभम् । न च सूत्रकृतां काले, वृद्धिः पौषशुची ऋते ॥८८॥ मासां परेषां येन स्यात् त्वदुक्तेत्यर्थसम्भवः । ॥८९॥ कल्पनाशिल्पिनिष्पन्नं, विकल्पं मनसा दधत् । सूत्रोक्तमन्यथा कुर्वन्, निर्लज्जः को भवादृशः ॥९०॥ अनित्यं वार्षिकं चेत्स्यान् न प्रत्याख्यानगोचरौ ।

P.P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अतिक्रान्तोऽनागतश्चेति, भेदौ द्वौ श्रुतवर्णितौ ॥९१॥ अतः कल्पान्त्यसूत्रेऽपि, सांवत्सरिकमीरितम् । भिन्नं व्यवस्थितेः सूत्रात्, फलं तूपहृतौ पुनः ॥९२॥ अत एवोदितं कल्पनिरुक्तौ पूर्वसूरिभिः । भिन्नगच्छभवैर्यत् स्याद्, वार्षिकं भाद्रशुक्लगम् ॥९३॥ अभिगृहीतवासः स्यान्, मुनीनां नियतेऽहनि । न परं वार्षिकं कार्यं, नियत एव घस्रके ॥९४॥ एवं च ये समाचख्युर्नाभिगृहीतवासरात् । भिन्नो वार्षिककृत्यस्य, वासरस्ते पराकृताः ॥९५॥ सामग्रीसम्भवे यस्मा-दाषाढे पूर्णिमादिने । गृहिज्ञातं परिवसेन्, न चेत् पञ्चदिनीं वदेत् ॥९६॥ एवं त्वदुक्तनीत्या स्यादाषाढ्यामेव वार्षिकम् । केषाञ्चिदपरेषां तु, पर्वस्वन्येषु तद् भवेत् ॥९७॥ कल्पस्य कर्षणं वार-द्वयमष्टमयोजनं । वर्षावासे वत्सरे च, तेन न भ्रमणं विदः ॥९८॥ इत्थं भव्यजनावबोधविधये सिद्धान्तयुक्त्यन्वितं, श्रीसांवत्सरिकप्रतिक्रमगतं वाच्यं विविच्योदितम् । श्रुत्वा जैनमतानुगा विधिकृतौ बद्धादराः संततं, सन्तः सन्तु सदा प्रसन्नमनसः सांवत्सरिकोद्यताः ॥९९॥ इति सांवत्सरिकनिर्णयः ॥

## पर्युषणारूपम् (१६)

नत्वा नम्रेन्द्रसंघातं, महावीरं जिनोत्तमं, ब्रुवे पर्युषणारूपं, भव्यानां हितकाम्यया ॥१॥ स्थानाङ्गे दशमे स्थानेऽष्टमं पर्युषणादिमं । कल्पाध्ययनमुक्तं तत्, पदयुग्माङ्किताभिधा ॥२॥ परं पदद्वये नाम्नि, प्रागुत्तरपदद्वयं । लुप्त्वाऽभिधीयते नाम, तदभिधाद्वयं भवेत् ॥३॥ जहा कप्पेत्ति तुर्येऽङ्गे, समवसरणे मतम् । परं पर्युषणाया नेतीत्थं पर्युषणाश्रुते ॥४॥ एवं च पञ्चकल्पादौ, दशधाचारवर्णने । पर्युषणादिकल्पाह्वा, या साऽखण्डाऽभिधा भवेत् ॥५॥ स्यात्तत्त्वभेदपर्यायैर्व्याख्या तत्रापि पर्ययान् । आश्रित्य तत्त्वभेदौ त-दादौ पर्यायवर्णनम् ॥६॥ पर्युषणायाः पर्यायाः, पर्यायस्थापनादिकाः । षट् साधूनां स्यात् पर्यायः, तत्र पर्युषणादिनात् ॥७॥ ग्रीष्महेमन्तिकाः सर्वे, त्यज्यन्ते पर्ययाः पुनः । वर्षीया अत्र गृह्यन्ते, प्राकृतिकाभिधा ततः ॥८॥ षण्णामपि





P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

दिशां माने, परिवसनाग्रहाद्भवेत् । द्रव्यादेः स्थापनां कृत्वा, स्थानात् पर्युषणाभिधा ॥९॥ प्रावृष्यनियमेपि स्याद्वर्षामाश्रित्य निर्णयात् । वासस्य पञ्चमी सञ्ज्ञा, वर्षावासेति सार्थिका ॥१०॥ शेषेष्वष्टसु कल्पेषु, परोऽवग्रह उच्यते । मासिकोऽत्र चतुर्मासो, ज्येष्ठावग्रहता ततः ॥११॥ एवं षट्स्वभिधानेषु, स्थापना समयाश्रिता । या तां पर्युषणामाहू, रूढ्या व्याख्यानकोविदाः ॥१२॥ न्यूनातिरिक्तमासोऽष्टौ (कार्तिक्या) भ्रान्त्वाऽऽषाढ्यां स्थिरो मुनिः । प्रावृड्वर्षोभयं मुख्यं, चतुर्मासीं स्थिरो भवेत् ॥१३॥ शाक्यास्त्रीनेव स्थित्वैकत्र मासो मेनिरे स्थिताः । कांश्चिद् वर्षाचतुर्मासीं, वर्षावासोऽखिलैर्मतः ॥१४॥ अब्वद्रव्यादिदुर्लभेऽवश्यं वर्षासु स्थास्नुता । वर्षावासोऽत्र तेनाह्वा, चतुर्मास्यत्र नो ऋतोः ॥१५॥ ननु भाद्रात्परं वर्षा, सत्यं प्रावृड् ऋतुः पुरा । परं विभक्तः स द्वेधाऽऽद्यः प्रावृट् परस्तथा ॥१६॥ अहोरात्रान् दश क्षिप्त्वा, वर्षाहेतु ततः श्रुते । जघन्योऽवग्रहो घस्र-सप्तत्योन्मित उच्यते ॥१७॥ पङ्कः प्राणाः स्थण्डिलोर्वी, वसतिर्गोरसो जनः । वैद्योषधसमूहेशाः, पाषण्डो भिक्षणं व्रजः ॥१८॥ तादृक्स्थानाय पञ्चाहैकादशान् वर्धयेत् पदे । सावनीं रीतिमाश्रित्य, दिनैः पञ्चाशता सका ॥१९॥ आद्योऽवग्रह आम्नातोऽर्धं सक्रोशयोजनम् । पूर्णं योजनमन्यः स्यात्, सक्रोशः क्षेत्रसंमितौ ॥२०॥ आहारे विकृतौ संस्तारे मात्रे लोचवस्तुषु । ग्रहो धृतिस्त्यजिर्योग्यो, द्रव्यपर्युषणा त्वियम् ॥२१॥ ईर्येषणावाक्समितौ, मनोवाग्दुष्कृतौ कृते । विग्रहे च कषायेषु, भावे वार्षिकवर्जनम् ॥२२॥ शैक्षः सचित्ते नो दीक्ष्यो, भावितो न परे पदे । अल्पवृष्टौ ततो याने, कुर्याद्धर्मावहेलनम् ॥२३॥ शौचवादं पुरस्कृत्य, कुर्यान्मुनिजुगुप्सनं । श्रित्वा सकर्दमाङ्गं स, मुक्त्वा जीर्णं च भावितम् ॥२४॥ परोऽप राजाऽमात्यो वा-तिशय्यच्छित्तिकारकः । दीक्ष्यो धाम्नि विशाले पात्शौचो धार्यो विवेकतः ॥२५॥ भावे या स्थापना साऽर्च्या, तत्तद्रूपकथानकः । साधूनां बोधनं पर्यु-षणायास्तत्त्वमग्रिमम् ॥२६॥ पर्युषणेयमाद्यन्त्य-तीर्थयोः कल्पमाश्रिता । परमन्त्यार्हतस्तीर्थे, कर्षणं मङ्गलं मतम् ॥२७॥ प्राक् साऽऽषाढ्याः परं

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

भाद्र-शुक्लायां नियता कृता। पञ्चम्यां कालकार्यैः सा, चतुर्थ्यां संघमानितैः ॥२८॥ वाच्यं शासननेतुः श्री-वीरस्य चरितं सह। गण्याल्या शेषजिमपपरिवारगणैस्तथा ॥२९॥ सामाचार्यश्च विविधा, वाच्याः पर्युषणादिकाः। सांवत्सरिककल्पोक्ता, यावत्कल्पस्य देशनम् ॥३०॥ ताश्चैवं क्रमशः कालस्तस्याः षट्दिक्ष्व-वग्रहः। दानग्रहविधिस्त्यागो, विकृतीनां मुनीश्वरैः ॥३१॥ कृतादिगृहभिक्षाया, विधिर्गोचरसम्मितिः। पानभेदामितिर्दत्तेः, सङ्खडीवर्जने विधिः ॥३२॥ अल्पवृष्टौ विहरणं, महावृष्टौ स्थितेः कृतिः। विधिर्विपक्षेणैकत्र, स्थाने सूक्ष्माष्टकोदितिः ॥३३॥ आचार्याद्याज्ञया सर्वं, गोचरादि विधित्सितं। वस्त्रातपाद्यन्य मुक्त्वा, शय्यासनाद्यभिग्रहः ॥३४॥ स्थण्डिलोर्व्यो विशेषेण, वर्षास्वीक्ष्या जीवावनात्। लोचः पक्षादिविधिना, गोलोमा न तु वार्षिके ॥३५॥ नानन्तसहितो धर्मस्तत् क्लेशं वार्षिकात्परं। धारयन् न भवेज्जैनो, निष्काश्योऽयं बहिर्गणात् ॥३६॥ स्थानमेकं सदा मार्ज्यं, त्रिः परे द्वे दिनत्रयात्। गम्यमुक्त्वा दिशो भागं, यतः स्यात्सुखमार्गणम् ॥३७॥ सामान्यावग्रहाद्ग्लान-हेतोरेष विशिष्यते। योजनानां चतुष्पश्च, यावत् तत्कार्यतो गतिः ॥३८॥ प्रपाल्यैनमनेकेऽर्चा-मेकां धृत्वा ययुः शिवं। परे द्वित्रिर्जनित्वा न, जनिः सप्ताष्टतः परा ॥३९॥ भगवान् श्रीमहावीरो, जगाद्वैवं सभागतः। सार्थं सहेतुहितकृज्जनानन्दाय सिद्धिकृत् ॥४०॥ इतिपर्युषणारूपम् ॥

## ज्ञातपर्युषणा (१७)

**नत्वा वीरं जिनाधीशं, सुरासुरनमस्कृतं। तन्यते मुग्धबोधाय, सांवत्सरिकनिर्णयः ॥१॥**

ननु यदा जैनैर्लौकिकं प्राक्तन लौकिक लोकोत्तरपञ्चाङ्गभिन्नं तद्गणितं ज्योतिष्कगतमुत्सृज्य नूतनं प्रवर्त्तमानं पञ्चाङ्गमुरीकृतं नासीत्तदापि अधिकमासवत्तयाऽभिवर्धितनाम्नोच्यमाने तद्विपरीते तु चान्द्रसञ्ज्ञिते वर्षे च



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गृहिज्ञातवर्षावस्थानस्वरूपः पर्युषणादिवसोऽनियत आसीत्। यतोऽभिवर्धिते आद्ये आषाढ्या द्वितीयाषाढ्याश्च द्वितीयेऽभिवर्धिते तस्य कृतिरासीत्, आषाढ्या विंशतौ दिनेषु चान्द्रे तु वर्षे आषाढ्याः पञ्चाशति दिवसेष्वतिक्रान्तेष्वासीदिति शासनानुरागिणां सर्वेषामविप्रतिपन्नं मतं, परं तदात्वेऽपि सांवत्सरिकं पर्व नियतमनियतं वाऽऽसीदितिशङ्काशङ्कुनाऽऽधुनिकाः शासनरागिणोऽपि बाध्यन्ते। सम्प्रति च नवीनतरलौकिकपञ्चाङ्गस्यापि जैनैः समस्तैः स्वीकारात्, तत्र च श्रावणभाद्रपदयोरपि वृद्धिसम्भवे सांवत्सरिकं कदा कार्यमिति बहवो मोमुह्यन्ते। केचिदशीत्या केचिच्च पञ्चाशता दिवसानामाषाढ्यास्तद्विदधते परस्परं विवदन्ते च कर्कशं। तत्र सांवत्सरिकं शास्त्रानुसारेण न्यायेन कदा कार्या? इति। अत्रोच्यते-धीधनैस्तावच्चिन्त्यमेतत् यदुत-प्राक्काले वर्षावस्थानस्य नियततायामस्ति हेतुविशेषो निर्दिष्टः शास्त्रकारैर्यद्वा हेतुमन्तरा तथाऽऽज्ञप्तमिति?, तथैवाभिवर्धिते आषाढ्या विंशतौ दिनेष्वतिक्रान्तेषु चान्द्रे च पञ्चाशति आज्ञापयता वर्षावस्थानं तद्भेदेऽपि तैर्हेतुविशेषो निर्दिष्टो न वेति?। ननु श्रीपर्युषणाकल्पे एव पर्युषणायां वर्षावासावस्थानरूपायां निश्चितः प्रश्नपूर्वको हेतुः, तत्पाठश्चैवं- 'से केणट्ठेणं भंते! एवं वुच्चइ - 'समणे भगवं महावीरे वासाणं सवीसइराए मासे विइक्कंते वासावासं पज्जोसवेइ, जओ णं पाएणं अगारीणं अगाराइं कडियाइं उक्कंपियाइं छन्नाइं लित्ताइं गुत्ताइं घट्ठाइं मट्ठाइं संपधूमियाइं खायनिद्धमणाइं अप्पणो अट्ठाए कडाइं परिभुत्ताइं परिणामियाइं भवंति, से तेणट्ठेणं एवं वुच्चइ - 'समणे भगवं महावीरे वासाणं सवीसइराए मासे विइक्कंते वासावासं पज्जोसवेइ। अनेन प्रश्नोत्तरसूत्रवचनेनागाराणां परकृतपरिकर्मारम्भनिष्ठार्थः स्पष्ट एव सविंशतिरात्रे मासि व्यतिक्रान्ते नियतावस्थाने हेतुविशेषः प्रतिपादितः। विशेषहेतुता चास्य सामान्येनाषाढपूर्णिमायां वर्षावासावस्थाने ये वर्षाविहरणे जायमानाः षट्कायविराधनादयो दोषाः सविशेषिता अवगन्तव्या इति ज्ञापनाय। आषाढ्याः परतो वर्षासु विहरणे इमे दोषाः उक्तास्तद्यथा - 'छक्कायाण विराहण आवडण विसमखाणुकंटेसु। उज्झण अभिहण रुक्खोल्ल सावए तेण



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

उवयरए ॥१॥ निशीथभाष्ये। नन्वेते विहारदोषाः प्रावृषं समाश्रित्योक्ताः, 'एते तु पाउसंमि'त्तिवचनात्, नित्यावस्थानरूपे वर्षावासे नेति चेत्। न, 'वासासु'त्ति वचनेन वर्षाविहारेऽप्येतेषामेव दोषाणां सद्भावस्य सूचनात्। ननु तर्हि ग्रामानुग्रामविहारस्योभयोरपि प्रावृड्वर्षालक्षणयोः ऋत्वोर्निषेधे समानेषु दोषेषु किमिति द्वयोर्भिन्न सूत्रमिति?। सत्यं, 'वासासु णवरि लहुग'त्ति वचनात् प्रायश्चित्तभेदात् तदर्थं भिन्ने सूत्रे इति। एवं च पर्युषणाकल्पीयं सूत्रं प्रावृषि विहारमनुज्ञातुं प्रवृत्तमित्यर्थापत्तिं विकल्प्य नैव मन्तव्यं। ननु प्रकल्पोक्तरीत्या प्रावृषि विहर्तुश्चतुर्गुरुकाः, वर्षासु तु लघवः आपद्यन्ते। तथा चाषाढपूर्णिमात एव नियतावस्थानं प्रतिपाद्यं, केवलासु वर्षासु नियतावस्थानस्य प्रतिपादनेन तु प्रावृषि विहारस्यानुज्ञापत्तिः स्यात्, गुरुदोषकरणानुज्ञापूर्वकलघुदोषनिषेधेन प्रवचनार्थव्याघात इति। सत्यं, यदि प्रावृड्विहारस्य दोषाणां प्रतिपादनेन निषेधं नाकरिष्यत्तदा भवदुक्तः प्रवचनार्थव्याघातः स्यात्। ननु यद्युभयोरपि प्रावृड्वर्षालक्षणयोः ऋत्वोर्विहारस्य निषेधो ग्रामानुग्रामविहारनिषेधेनैकत्रावस्थाननियमस्तर्हि किमर्थं पर्युषणाकल्पीयं सूत्रं वर्षाविहारस्य नियतावस्थानरूपायै पर्युषणायै प्रावृतदिति?। सत्यं, 'सिद्धे सत्यारम्भो नियमाये'त्युक्तेर्नियतावस्थाननियमायेदं सूत्रं। ननु कृते नियमे नियमातिरिक्तानियतसदृशविषये पूर्वोक्तविधिसूत्रस्याप्रवृत्तेरागतैव प्रावृषि विहारस्यानुज्ञेति चेत्। न, तत्रापि विहारस्य प्रतिपदेन दोषाणां प्रतिपादनात्। ननु तर्हि नियतावस्थानस्य वर्षासु नियमने किं फलमिति? चेत्। सत्यं, प्रावृड्विहारे यानि 'वासं न सुट्ठु आरद्ध'मित्यादीनि गृहिणां पुरतोऽवस्थानसन्दिग्धतोक्तौ कारणानि तेषामसम्भवं दर्शयित्वा नियतावस्थानं विधायात्र स्थिताः स्मेति गृहिणां पुरो नियतावस्थानकथनमाज्ञापयन्ति सूत्रकाराः। अत एवं गृहिज्ञाताज्ञातपर्युषणाभेदः, नतु विहारावस्थानभेदेनेति। ननु गृहिणां पुरतः अवस्थानस्योदितौ सन्दिग्धनिश्चयोक्तिरूप एव भेदः, प्रावृड्वर्षाऋतू अधिकृत्य परोऽपि वाऽस्ति विशेषः? इति चेदस्ति, कोऽसौ विशेष इति चेत्। योग्यक्षेत्रालाभे तृणडगलाद्यलाभेऽपि च ग्रामानुग्रामविहारस्यानुज्ञा प्रावृषि,



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सा न वर्षासु, 'रुक्खहेट्ठावि पज्जोसवेयव्वं'ति चूर्णिवचनात् । यद्यपि वर्षाऋतोरारम्भ आश्विनकृष्णप्रतिपदि, तथापि 'ताहे भद्दवय जोण्हस्स पंचमीए पज्जोसवेयव्वं'ति 'अववाएवि सवीसतिरायमासाओ परेण अतिक्कमेउं न वट्टति'त्ति 'पविट्ठेहि य भणियं-भद्दवयसुद्धपंचमीए पज्जोसविज्जति'त्ति च निशीथचूर्णिवचनादर्वागेव प्रावृट्पूर्तेर्भाद्रपदशुक्लपञ्चम्यां तु वर्षाभावाभावादिष्वधिकरणापभ्राजनादिदोषाणां प्रावृड्भाविनामभावात् पर्युषिता इति वक्तव्यं, वृक्षस्याधस्तादपि च पर्युषितव्यमेव । यद्यपि अशिवादीनि व्याबाधपञ्चकान्तान्यपवादानि द्वयोरपि प्रावृड्वर्षापर्युषितानां ग्रामानुग्रामविहारे तुल्यानि, तथापि वर्षासु ज्ञानादीन्यपवादपदान्यधिकानि ब्रुवद्भिर्भाष्यकारैः स्पष्टितमिदं यदुत-प्रावृषि षट्कायादिविराधनादिसम्भवात् क्षेत्रालाभादिभिर्विहारेऽनुज्ञायमानेऽपि ज्ञानाद्यर्थं न विहारस्यानुज्ञा, वर्षासु तदर्थमपि विराधनाया अल्पत्वादनुज्ञा, विराधनाया अल्पत्वादेव'वासासु णवरि लहुगे'त्युक्त्वा लाघवं दर्शितं । किंच-प्रावृषि वर्षाया मुख्यकालत्वात्तत्रैवागारिणामगारकर्म जातपूर्वमेव । एवं च निष्परिकर्मागारलाभसम्भवमाश्रित्यैव पर्युषणाकल्पादिषु नियतावस्थानरूपपर्युषणानिरूपिते सन्दिग्धनियतवसनोक्त्यादिको हेतुविशेषो ज्ञातव्यः । एतेन च सन्दिग्धनियतावस्थानोक्त्योर्भेदो विशेषहेतुस्तथैव । अभिवर्धिते वर्षे विंशतौ रात्रिषु चान्द्रे च सविंशतिरात्रे मासे व्यतिक्रान्तेषु नियतावस्थानोक्तिगृहिज्ञातपर्युषणारूपा कथं क्रियते ? इत्यारेकाया अपि सुखोन्नेयमेव। यतोऽभिवर्धिते वर्षे ग्रीष्मे हेमन्ते चाधिकमाससम्भवाद् गृहिणो गृहपरिकर्म वर्षणं चारत एव भवति । एतेन समस्तेन नियतावस्थानेतरयोः विंशतिरात्रिसविंशतिरात्रमासलक्षणयोश्च षट्कायविराधनाद्या आपतनाश्च दोषाः अधिकरणवर्जनादिप्रयोजनं स्पष्टतयोक्तं । आषाढ्या अशीतिदिनातिक्रमे सांवत्सरिकपर्युषणाकरणस्य श्रावणशुक्लपञ्चम्यां वा तत्करणाकरणयोः किमायातमिति ? । यतः नियतावस्थानस्य गृहिज्ञातपर्युषणापरपर्यायस्य कृतिस्तु अभिवर्धिते विंशतौ रात्रिष्वतिक्रान्तासु श्रावणशुक्लपञ्चम्यां चान्द्रे च सविंशति रात्रे मासे आषाढ्या भाद्रशुक्लपञ्चम्यां चानुज्ञाता, तद् गृहिज्ञातपर्युषणासांवत्सरिकपर्युषणयोर्भेदाभावात्,



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सापि तदैव कर्तव्येति ज्ञायते इति। सत्यमुक्तमयुक्तं तूक्तं, प्रथमं तावत् ज्ञाताज्ञातपर्युषणयोः समग्रेऽपि आचारप्रकल्पाद्युक्तेऽधिकारे सांवत्सरिकस्योल्लेखाभावेऽपि तथैकान्तप्रतिपादनपरस्य वक्त्रं न वक्रीभवति, तद्दुःषमावसर्पिणीखलायितमेव। न च तदा चूर्णिकृत्काले प्रतिक्रमणानि सांवत्सरिकं वा प्रतिक्रमणं नाभूदिति, आद्यन्तिमतीर्थयोः सप्रतिक्रमणत्वात् दैवसिकादिप्रतिक्रमणावत्त्वाच्च। किंच-भो नियतानियतपर्युषणयोरभिवर्धितचान्द्रवर्षीयपर्युषणयोश्च भेदेऽधिकरणादिरूपः षट्कायविराधनादि च प्रयोजनतया हेतुविशेषतया चोच्येते, तत्सांवत्सरिकप्रतिक्रमणोपलक्षितपर्युषणायां मान्येते ते तत्रेति ?, नो चेत्, प्रयोजनहेतुवैषम्ये तथाविधाक्षराणां चानुपलम्भेऽपि यद् यद्वा तद्वा प्रज्ञाप्यते स्थाप्यते तत् कस्य हास्यास्पदं न भवति। ननु किं गृहिज्ञातपर्युषणोक्त्या सांवत्सरिकपर्युषणायाः प्रतिपादनं न जातं ? येनैवमाक्षिप्यते इति चेत्। नैव स्यात्तद्, यदि गृहिज्ञातपर्युषणासांवत्सरिकप्रतिक्रमणपर्युषणयोर्हेतुस्वरूपफलानि समानानि स्युस्तच्च नांशतोऽपि, यतो गृहिज्ञातपर्युषणायां हेतुरधिकरणादिवर्जनं, स्वरूपं वर्षावासं स्थिताः स्मेत्युक्तिः, फलं च निष्परिकर्मवसतिलाभादि, त्रयमेतदनेकशास्त्रसिद्धं हेत्वादित्रयं कः खलु सकर्णः कथयेत्तस्याः सांवत्सरिकपर्युषणया सहैक्यमनन्यदिनभावित्वनियमं वा। ननु गृहिज्ञातपर्युषणायाः समानदिनभावित्वं केनापि शास्त्रकृतोक्तं ?, आममितिचेत्, किं न दृश्यते ? भिन्नदिनभावित्वं क्वोक्तमिति ? सांवत्सरिकशब्देनैव, यतो नहि गृहिज्ञातपर्युषणयोर्भिन्नसंवत्सरयोर्भिन्नभिन्नमासयोरस्त्यन्तरालनियमः तृतीयपञ्चमयोः श्रावणे गृहिज्ञातपर्युषणाकरणे पुरोवर्त्तिषु संवत्सरेषु भाद्रपद एव पर्युषणायास्ताद्दश्याः करणादेशस्य सिद्धत्वात् शास्त्रैरिति। नन्वधिकमासस्याविवक्षायां किं न भविष्यति समाहितिः ?, सत्यं भवेत् सा, परं चित्रमेतद्यदुताभिवर्धितेऽधिकमाससम्भवस्य प्रतिपादितत्वे सत्यपि भवद्भिस्तत्पुरोवर्तिनि चान्द्रे वर्षे मासोऽधिको विवक्षार्थं गण्यते। तत्त्वतस्तु गृहिज्ञातपर्युषणाया आषाढयेवाऽवधिः, न प्राक्। किञ्च-गृहिज्ञातपर्युषणाया विधौ शास्त्रकृद्भिरभिवर्धितसम्बन्ध्यधिको मासो गणितो विवक्षितश्च, अन्यथा



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कथमवक्ष्यन्त ते यदुत - 'अभिवड्ढियवरिसे गिम्हे (हेमंते) चेव सो मासो वतिक्कंतो'त्ति। परमवधेयमत्रेदं-गृहिज्ञातपर्युषणा कृषिगृहपरिकर्मादिसापेक्षा, कृष्यादि च वर्षावर्षणसापेक्षं, वर्षा चाभिवर्धिते पूर्वमेवाषाढ्या नियमतो वर्षति। तत एव गृहिज्ञातपर्युषणायामधिकं यं कञ्चिदपि पौषाषाढ्योरन्यतरं विवक्षितत्वात् चान्द्रे सविंशतिरात्रे मासे, अभिवर्धिते च विंशतौ रात्रिष्वतिक्रान्तेषु अधिकरणापभ्राजनादिवारणार्थं स्थिताः स्मोऽत्रेति निर्णीतोक्तिरूपा गृहिज्ञातपर्युषणाकृतिराम्नाय्याभैरिति सापेक्षः स विधिर्न सामर्थ्यं सारयति। अन्यच्च साध्वाचारापेक्षिकविधौ नाम्नाय्याभैरधिकमासस्य सङ्ख्यानं। तत एवात्रैव पर्युषणाया व्यतिकरे ज्ञाताज्ञातविध्योरधिकमासं विवक्षित्वा मर्यादाभेदे कृते ऋतुबद्धकालीनविहारे अष्टावेव मासा अवधृताः, 'ऊणातिरित्त अट्ठये'त्ति भाष्यकारवचनादसन्दिग्धं। न चोनातिरिक्तत्वमत्र यद्विवक्षितं तत्राधिकस्यापि मासस्य समावेशो नासम्भवीति वाच्यं, यद्यूनातिरिक्तानेहोभवनकारणानि भाष्यकृद्भिर्नोक्तान्यभविष्यन्त तदैवमुदितुं भवन्तोऽपारयिष्यन्नपि, परमत्रोनातिरिक्तभवनकारणानि पूर्वीयवर्षावासपूर्त्तेरर्वाग् विहारसम्भवमंषमे च क्षेत्रालाभादिभिराषाढ्या अतिक्रमसम्भवं चाधिकृत्य ज्ञेये अष्टमास्या ऊनातिरिक्तते इति स्पष्टितत्वादुक्तान्येव तानीति न भवदीयविकल्पलेशस्यावकाशोपि। अन्यच्च भवदीयोऽभिप्रायश्चेह पर्युषणाकल्पादिशास्त्रेषु यानि जिनान्तरादीनि सार्धाष्टमासाद्यधिकानि तान्यन्यथा कुर्वन्नेवोन्मज्जेत्, सर्वत्र युगान्त्ये आषाढाधिक्यात् भगवतः श्रीमन्महावीरस्य कार्त्तिकामावास्यारूपनिर्वाणकालात् सार्धनवमासाधिक्यादिसम्भवात्। न च कुत्रापि शास्त्रे सार्धनवमासाद्युक्तिः। तथा च शास्त्रापेक्षिके मासकल्पविहारादिरूपे साध्वाचारे नाधिकमासस्याविवक्षा, तथैव जिनान्तरादिरूपे आनुवादिकेऽपि शास्त्रकृतामविवक्षैवाधिकमासस्य। किञ्च-यद्यधिकमासस्य विवक्षा स्याच्छास्त्रकृतां तर्हि युगान्ते आषाढस्य नियमेनाधिक्यसम्भवाद्विंशतिरात्र्यादिवचनाद् द्वितीयआषाढोऽधिकृतस्तत्र आषाढी चातुर्मासी मता च। न च शास्त्रकृद्भिस्तत्र प्रथमाषाढपूर्णिमा आषाढीतयाऽभिमता। न च द्वितीयाषाढपूर्णिमायां पञ्चमासी मता। पर्यालोच्यते चेद्भवद्भिरेतत् सर्वं ध्रुवममृतेन विषवेगवदपस-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रिष्यत्येव भवतामधिकमासस्य गणनायां विद्यमानः कदाग्रहः। निवृत्ते च तस्मिन्नेव भवान् श्रावणिकत्वाश्रयणेन पर्युषणापर्वणो भेदविधौ तत्परतामाधास्यति। अन्यच्च भगवन्तो युगप्रधानाः श्रीकालकाचार्याः वर्त्तमानशासनाधीश्वराः श्रीमलधारगच्छीयश्रीहेमचन्द्रसूर्यादिवचनात् श्रीवीरभगवतो निर्वाणात् त्रिपञ्चाशदधिकचतुःशत्यां, तीर्थोद्गारनाम्ना प्रघोष्यमाणगाथामाश्रित्य तत एवाशीत्यधिकनवशत्यां, श्रीपर्युषणाकल्पगतं वाचनान्तरीयपुस्तकारूढिकालस्य पर्युषणातिथिपरावर्त्तहेतुत्वेनारोपितं वचनमाश्रित्य त्रिनवत्यधिकनवशत्यां पर्युषणातिथेः परावर्त्तं चक्रुरिति गीयते। त्रिष्वपि मतेषु तद्वर्षमाभिवर्धितं, यतः संख्यासु पञ्चभिर्भक्तास्वेतासु शून्यं त्रयश्चावशिष्यन्ते। एवं च सिद्धे तस्मिन् परावर्त्तनवर्षे श्रीकालकाचार्ययुगप्रधानैर्यद्भाद्रपदशुक्ले पञ्चम्यां सांवत्सरिकपर्युषणाकृतये श्रीसङ्घायादेशो दत्तः, परमश्रावकशातवाहनराज्ञोऽनुरोधेन च चतुर्थ्यां सांवत्सरिकपर्युषणां चक्रुः,। तत्सर्वमपि खरतराणां श्रावणिकानां मते नांशतोऽपि घटामटाट्यते। एवं चाधिकमासस्य गणनायामयुक्तत्वे सिद्धे यस्य कस्यापि मासस्य भवतु वृद्धिः, परं सा मासकल्पचातुर्मासिकसांवत्सरिकप्रमुखेषूपेक्षितुमेव योग्या। योग्यं च सर्वेष्वपि समानरीत्या भाद्रपदशुक्ले पञ्चम्यां श्रीकालकाचार्यादिशाच्चतुर्थ्यामेव च सांवत्सरिकपर्युषणाकृत्यकरणं। न च श्रावणिकैः खरतरैरपि तिथिवृद्धिहान्योः पञ्चदशदिनात्मकपक्षनिर्वृत्तं पाक्षिकं चतुर्दशीं विहायान्यदा क्रियते, इति किं शोभास्पदमार्हतशासनमङ्गीकुर्वाणानामिदमर्धजरतीयमनुष्ठानमिति ?। ननु भवद्भिरारब्ध गृहिज्ञातपर्युषणयोर्भिन्नकालकर्तव्यतामभिवर्धिते साधयितुं, तत्र गृहिज्ञातपर्युषणायामधिकमासस्य संख्यानं वृष्ट्यपेक्षितकृष्यादिक्रियाप्रत्ययिकमर्हं न तु पाक्षिकमासकल्पचातुर्मासिकसांवत्सरिकादिष्वित्यन्यान्यशास्त्रवचनैरनुमानप्रधानैः साधितं, परं गृहिज्ञातपर्युषणायाः सांवत्सरिकस्य साक्षाद्भेदप्रतिपादनपरमनुमानहेतुकं किमिति शास्त्रवचनं न दर्श्यते ? इति चेत्। सत्यं, गृहिज्ञातपर्युषणाया हेत्वादिदर्शने सांवत्सरिकभिन्नतायाः स्वभावसिद्धेः, परं भवदाकाङ्क्षा चेत्तथाविधा, तर्हि तत्समाध्यर्थमपि क्रियते तत्र यत्नः। तत्र प्रथमं सांवत्सरिकं संवत्सरनिर्वृत्तं,



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

संवत्सरनिर्वृत्तिः प्रथमादवधिभूतात् सांवत्सरिकात्, संवत्सरेण निर्वृत्तं सांवत्सरिकमिति व्युत्पत्तेः। नन्वादिधार्मिकस्य धर्मप्रतिपत्तिकालस्य वैचित्र्यात्, सर्वेषां च शासनवर्त्तिनामसमकालं धर्मप्रतिपत्तेः, तीर्थकृतां च तीर्थप्रवर्त्तनकालस्य विविधत्वात् कथं सर्वेषां प्राक् संवत्सरस्यावधेर्भावः? इति चेत्। सत्यं, शासनस्य प्रवाहेणानादित्वात् सदा सांवत्सरिकस्य नैयत्यं, तथाभावत्वादेव च देवविद्याधरादीनां नन्दीश्वरद्वीपादौ सांवत्सरिकमुद्दिश्य महामहकरणं शाश्वतं सङ्गच्छते। केचित्तु पूर्णिमायां पाक्षिकं स्थापयितुमुद्यताः पक्षेण भवं पाक्षिकमिति व्युत्पाद्य चतुर्मासीनां कार्त्तिक्यादिपूर्णिमासु भावाच्चतुर्दश्याः पाक्षिकत्वं शास्त्रोक्त्या युक्त्या च सिद्धमुत्थाप्य पक्षान्ते भवं पाक्षिकमिति व्युत्पत्तिमुत्पादयन्ति, तैरत्रापि विचारणीयं। यतस्तन्मतेन यः संवत्सरस्यान्तः, स चातुर्मासिकपाक्षिकयोरप्यन्त एव। तथाच पाक्षिकादिषु शासनस्यानुसर्तारः प्राग्दैवसिकं प्रतिक्राम्यन्ति। अत आवश्यकचूर्ण्यादिषु दैवसिकस्य त्रयो गमाः प्रतिपादिताः। तत्सर्वमेतदुत्थाप्य सांवत्सरिके पाक्षिकचातुर्मासिकगमावपि दैवसिकगमदृष्टान्तेनादरणीयौ स्यातामिति। किञ्च-यद्येवं पक्षचतुर्मासीसंवत्सरानुद्दिश्य तत्तत्प्रतिक्रमणादिषु तत्तदन्तेन व्युत्पाद्यते, तर्हि रात्रिदिवसयोरेवमेव वाच्यं स्यात्। क्रियते चामध्याह्नादानिशीथं दैवसिकं, आनिशीथाच्चामध्याह्नं रात्रिकं चेति। अत एव 'अंतो अहोनिसस्स ये'त्यनुयोगद्वारेषु अन्तरव्ययप्रयोगः क्रियते, क्रियते च कारणजातप्रतिक्रमणपरैः पूर्वाह्णादिष्वपि दैवसिकरात्रिके इति। संवत्सरेण निर्वृत्तं सांवत्सरिकमित्येव व्युत्पादनं न्याय्यं। आचरणया चतुर्दश्यां चातुर्मासिकं प्रतिक्रामतां तु तत्र पाक्षिकस्याकरणं, तथाचरणाया एव भावादिति। ननु परावर्त्य पञ्चदशीं चतुदश्यामाचीर्णं चातुर्मासिकमिति चेत्, सांवत्सरिकस्य यथा व्युत्पत्तिमहिम्ना संवत्सरोऽवधिस्तथैव 'सवीसइराए मासे' इत्यादिवचनात् आषाढकार्त्तिकचातुर्मासिके अपि अवधिभूते एव, ततो मध्यस्य सांवत्सरिकस्य तिथेराचीर्णा परावृत्तिस्ततस्तद्वशतोऽवधिभूतयोराषाढकार्त्तिकचातुर्मासिकयोस्तिथेः परावृत्तिरावश्यक्येव, तद्वशेनैव च फाल्गुनचातुर्मासिकतिथेरपि परावृत्तिरिति।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ननु युगप्रधानैर्भगवद्भिः कालकाचार्यैः राजविज्ञप्त्या पर्युषणा चतुर्थ्यां कृतेत्यस्याविवादास्पदत्वे न पाश्चात्यैः कथं सा परावर्तिता ?, न हि शासने जैने महाप्रभाववता केनापि किञ्चिदाचरितमेतावता सर्वैस्तत्कालीनैः पाश्चात्यैरपि तथा कार्यमिति नियमः, श्रीस्थूलभद्रवद्वेश्यावेश्मावस्थानप्रसङ्गादिति चेत् । सत्यं, परं सांवत्सरिकादीनां स्वरूपं तावत् कलहकषायनिवारणा । अत एवानुवर्त्तमानेऽपि पर्युषणाधिकारे भाष्यकृद्भिः 'अहिगरणकसायाणं संवच्छरिए विओसवणे'त्ति । न तावदधिकरणादित्यागः सांवत्सरिकस्वरूपतया निरूप्य विरताः, किन्तु पूर्वसंवत्सररात्रेरारभ्याक्षामितानां प्रायश्चित्तमपि निर्दिष्टं मूलरूपमद्य । किञ्च-संवत्सरदिनकृतानामधिकरणानामक्षामणे सांवत्सरिककायोत्सर्गेण मूलप्रायश्चित्तमादिष्टं, आदिष्टं च तस्य गणान्निष्काशनं, तत्कायोत्सर्गकालकृताक्षामितापराधे तु तत्कालमेव मूलप्रायश्चित्तमादिष्टं दाने । तथा च भाष्यकारा आहुः - 'संवच्छरमुस्सग्गे कयंमि मूलं न सेसाइं'ति । एवं स्वरूपत्वाच्च सांवत्सरिकस्यानुक्तानां च पाक्षिकादीनां च व्यवस्थेयं व्यावहारिकी यदुतापराधादीनां पाक्षिकान्तमक्षामणं चेत् तद्वन्तः प्रत्याख्यानावरणोदयवन्तः चातुर्मासिकान्तमप्रत्याख्यानोदयवन्तः सांवत्सरिकान्तमनन्तानुबन्ध्युदयवन्तश्च । अनन्तानुबन्ध्युदयवतां 'अनन्तान्यनुबध्नन्ति, यतो जन्मानि भूतये' इतिवचनादनुक्षणमनन्तसंसारोपार्जकत्वनियमः । एतेन सांवत्सरिकस्याधिकरणक्षामणादिस्वरूपवदनन्तसंसारासाधारणहेत्वनन्तानुबन्ध्यभावप्रायश्चित्तान्तापत्तिविगमौ फलतयोक्ताववसेयौ । न चेमौ गृहिज्ञातपर्युषणायामशंतोऽपि । एवं स्वरूपफलत्वाच्च सांवत्सरिकस्य शासनानुसारिभिः सहैव करणमनुष्ठेयमनुष्ठीयतेपि च । तथा च राज्ञो लोकानुवृत्त्या पञ्चम्यां सांवत्सरिककार्यस्यानुष्ठानमावश्यकं, ततः तिथिपरावर्ताय विज्ञप्तिः, अन्यथा युगप्रधानाचार्याणां तत्रैव क्षेत्रे विद्यमानेऽप्यसाहचर्यान्न सान्निध्येन स्यादाराधना, नृपानुग्रहायाचार्यस्य तत्सान्निध्यार्थं तत्क्षेत्रीयस्य सकलसङ्घस्य तत्समानकालीनाराधनाहेतोरेव सकलशासनस्य चतुर्थ्यां पर्युषणायाः करणमौचितिपदवीमध्यास्त । - ननु भवतु तद्वर्षे तथा, परं पाश्चात्यवर्षेषु तत्परम्परागतानामपरेषां च



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

परंतस्तथा तिथिपरावृत्तिः कथमौचितिमञ्चति ? इति चेद् ।

सत्यम्, परं प्रागेव प्रतिपादितं, यत्संवत्सरदिनान्तमनन्तानुबन्धिनामभाव इति द्वितीयवर्षेऽन्यदा च तथा चतुर्थ्यां सांवत्सरिकस्यापातो दुर्धरः स्यादिति । अत एव सा परावृत्तिराचरणारूपा नतु व्यक्तिकृतिरूपेति सुधियोह्यमिति । एतत्सर्वमपि खरतरसन्तानीयानां सम्मतमेव । यतस्तेऽपि चतुर्थ्यादिष्वेव सांवत्सरिकादि कुर्वन्ति । यतस्तेऽपि स्वीकुर्वन्त्येव पाक्षिकादिदिनातिक्रमेऽपराधादिक्षामणायां प्रत्याख्यानावरणादीनामनन्तानुबन्ध्यादीनामापत्तिमिति । तथा च सांवत्सरिककृतौ ज्ञानाद्याराधनासंवलितजिनाज्ञारूपो हेतुः, अपराधक्षामणादि स्वरूपं, प्रत्याख्यानाद्युदयनिवारणादि फलमिति । किञ्च–गृहिज्ञातपर्युषणा कल्पकर्षणवर्षावाससामाचारीस्थापनादिसाध्या, सांवत्सरिकं तु चैत्यमहोत्सवसकलसाधुवन्दनलोचाष्टमतपःक्षामणादिसाध्यमिति । सत्स्वपि हेतुस्वरूपफलसाधनादिगतेषु भेदेषु न भेदो गृहिज्ञातपर्युषणासांवत्सरिकयोरिति कदाग्रहपूर्वकं ब्रुवतां वक्त्रं न वक्रीभवति तद् दुष्षमाकालखलायितात् किमपरहेतुकं भवेत् ? । अन्यच्च खरतरसन्तानीया अपि पूर्वसांवत्सरिकदिनाद्वैषमसांवत्सरिकदिनमेकदिनेनाधिकमपि स्यात्तर्हि अनन्तानुबन्ध्यापातमूलप्रायश्चित्तावलोकनेन युगप्रधानैः श्रीकालकाचार्यैः पञ्चम्या एकदिनेनार्वागपर्वरूपायामपि चतुर्थ्यामाचीर्णं सांवत्सरिकमनुमन्यमाना अपर्वरूपायां भाद्रपदशुक्लचतुर्थ्यामेव कुर्वन्ति, न तु पर्वरूपायामपि भाद्रपदशुक्लपञ्चम्यां । ननु च यदि तेऽनन्तानुबन्ध्याद्यापातभयात् साम्प्रतमेकदिनोल्लङ्घनभयादपर्वचतुर्थ्यां सांवत्सरिकं कुर्वन्ति, तर्हि अभिवर्धिते वर्षे श्रावणभाद्रपदयोर्वृद्धौ सत्यां द्वितीयश्रावणे प्रथमे भाद्रपदे वा शुक्लचतुर्थ्यां सांवत्सरिकं कुर्वन्ति, द्वितीयवर्षे च भाद्रपदशुक्लचतुर्थ्यामेव कुर्वन्तः सांवत्सरिकं किं न शोचन्ति ? एकदिनाधिक्यांह्रीतानां मासप्रमाणस्य महतः कालातिक्रमस्यावगणनात्, किं तत्रानन्तानुबन्ध्यापातादि तेषां बाधाकरं नेति ? । अत्रार्थे त एव प्रष्टव्याः ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वयं तु सर्वदापि शुद्धभाद्रपदशुक्लचतुर्थ्यामेव सांवत्सरिकं कुर्म इति भवदीयप्रेरणायामनधिकारिणः, तद्वदेव तदाक्षेपस्य प्रतिवचनेऽपीति। ननु भवन्तोपि साम्प्रतं नवीनतरलौकिकपञ्चाङ्गमनुवर्त्तमानाः भाद्रपदशुक्लपक्षीयायाश्चतुर्थ्याः पञ्चम्या वा क्षये तत्पक्षीयायां तृतीयायां सांवत्सरिकं विधाय पुनर्द्वितीयवर्षे भाद्रपदशुक्लचतुर्थ्यां पर्युषणां कुर्वन्त एकदिनस्याधिक्यात् कथं नानन्तानुबन्ध्यापातादिदोषभाजनं भवतेति ? चेत्। सत्यम्, 'क्षये पूर्वा तिथिः कार्ये'त्युमास्वातिप्रघोषं युगान्त्याषाढ्याः क्षयस्य नियमेऽपि चतुर्दश्यामेव चूर्णिकारैराषाढीतिकृतं व्यवहारं चानुरुध्य वयं तां तृतीयेति सञ्ज्ञयाम एव न, किन्तु चतुर्थीतयैव तां सञ्ज्ञयामः। खरतरसन्तानीया अपि अष्टम्यादीनां पर्वणां क्षयस्यापाते तत्पूर्वापर्वतिथिं सप्तम्यादितया न व्यपदिशन्ति, किन्तु अष्टम्यादितयैव। विशेषतस्तु अपर्वपौषधापातेन स्वीयस्वतन्त्रमतव्याघातप्रसङ्गादिति। नन्वेकदिनातिक्रमभीतानां तेषां मासातिक्रमे किं नाश्चर्यमिति ? चेत्। नैकमेवैतत्, किन्त्वभिवर्धितस्य मासस्य शास्त्रकृद्भिर्मतमसङ्ख्यायते परतोऽनभिवर्धितेऽपि त्रयोदशमासानतिक्रम्य स्वेच्छया सांवत्सरिकस्य कृतिस्सापि तथैव। किञ्च-यवना अधिकमासं सङ्ख्यायन्ति परं तेऽग्रतोऽपि पूर्वकृतमेवाधिश्रयन्ते। इमे तु कालचूलारूपस्य मासस्यासङ्ख्येयस्य सङ्ख्यानं सङ्ख्येयानां च त्रयोदशानां मासानां सांवत्सरिकत्वेन व्यवहृतिमधिश्रयन्ति। किञ्च–प्रष्टव्यास्ते, यदुत–शास्त्रकारैरभिवर्धिते वर्षे आषाढ्या विंशत्या अहोरात्रैर्गृहिज्ञातपर्युषणां यां तके सांवत्सरिकरूपतया कल्पयन्ति। सा कर्त्तव्यत्वेनादिष्टा तैस्तु तामेवोक्तिमनुश्रित्य गृहिज्ञातपर्युषणाभिन्नं सांवत्सरिकं परं दिनैः पञ्चाशता। तदिदं यदुक्तिमालम्ब्य प्रवृत्तिस्तामेवोक्तिं विपर्यासन्तां (यतां) न किं व्रीडा भवतां मुखं मलीमसीकरोति ?। चेत् तदुक्तिमभिवर्धितविधिं ते समाश्रयेयुः तर्हि विंशत्या एव अहोरात्राणामतिक्रमे कार्यं सांवत्सरिकमन्यथा स्वच्छन्दप्रवृत्तत्वं तेषां लोकेनावगीयमानं न पार्यं



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रोद्धुमिति। किञ्च–विचारणीयमेतदपि तैः–यत् शास्त्रकाराः मासाधिक्यवतः सर्वानपि संवत्सरानुद्दिश्याषाढ्या विंशतिरात्रातिक्रमे भवता सांवत्सरिकरूपतयाभिप्रेतां गृहिज्ञातपर्युषणां कर्त्तुमादिशन्ति, तेषां तत्र-भवतां शास्त्रकृतामभिप्रायेण पौषस्याषाढस्य वा वृद्धौ वर्षमभिवर्धिताख्यं, तत्र चाषाढ्या विंशत्याऽहोरात्राणां गृहिज्ञातपर्युषणायाः कृतिश्च, भवद्भिस्तु सांवत्सरिकस्य कृतौ सोक्तिरुरीकृता, उरीकृत्यापि न सर्वेष्वभिवर्धितेषूक्तमपि आचर्यते, शेषेषु शेषमासाधिक्येनाभिवर्धितसञ्ज्ञां प्राप्तेषु वर्षेषु विंशत्या सांवत्सरिकस्याकरणात्। किञ्चाषाढ्याः प्राग्जातयोर्मासयोर्व्यपेक्ष्य 'ग्रीष्मे गत' इति वर्षावासात् प्राग्जातमधिकं मासं समुद्दिश्य अर्वाग्वर्षीया भावाद् विंशत्या पर्युषणा आज्ञायि भगवद्भिरधिकरणादिवर्जनार्थं, खरतरसन्तानीयैस्तु वर्षावासकाल एवाधिके तद्वाक्यमालम्बितं, तदेतत् तत्त्वज्ञस्य नाश्चर्यकरं स्यादिति?। किञ्च–पर्युषणाया अवस्थानरूपायाः कृतिस्तूत्सर्गादाषाढ्यामेव। भाद्रपदामान्तेषु शेषेषु क्रियमाणा सापवादिकी, भाद्रपदशुक्लपञ्चम्यां तु क्रियमाणा सा परमापवादिकी। एवं पर्युषणायाः करणे भेदत्रयी, सांवत्सरिके त्वेक एव भाद्रपदशुक्लपञ्चम्यां विधानलक्षणो मार्गः। किञ्च–पर्युषणायामवस्थानलक्षणायां निर्णयकालादुदितिकालभेदः, गृहिज्ञातपर्युषणायामुदितिमात्रं न तु कृतेर्नियमः, सांवत्सरिके तु न तादृशं वैविध्यं, तत्र क्रियोदित्योः समकमेव करणादिति। एवं सत्यपि महति भेदे गृहिज्ञातपर्युषणा सांवत्सरिकं वा गृहिज्ञातपर्युषणारूपं समदिनभवननियमवद्वा द्वयमेतदिति खरतरैः ख्यायमानं केषां मध्ये ख्यातिमाप्नुयात्?, तत्तु सुज्ञानां विदितचरमेवेति। ननु पञ्चम्या आगमोक्तत्वाच्चतुर्थ्यां सांवत्सरिकमावयोरयुक्तमिति चेत्। न, जीतव्यवहारस्य 'वत्तणुवत्तपवत्तो' इत्यादिलक्षणस्यागमोक्तत्वादेव। ननु 'जीएणं ववहरइ'त्तिवचनात् प्रायश्चित्ते एव जीतव्यवहारस्योक्तिः, संहननधृत्यादिहानीनां तत्रैवालम्बनत्वादिति। सत्यम्,



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

शुद्धिरूपलक्षणं विध्यादीनां, व्यवहारभाष्यादिषु तथा स्पष्टितत्वात्। अन्यच्च भगवद्भिः श्रीकालकाचार्यैः युगप्रधानैरपि 'अंतराविसे कप्पइ' त्ति पर्युषणाकल्पवचनमाश्रित्य तत् परावर्त्तितं न तु स्वातन्त्र्येण। ननु च तद्वचनं तु नियतावस्थानरूपपर्युषणाविषयं न तु सांवत्सरिकविषयं। न चान्यार्थमुत्सृष्टमन्यार्थेनापोद्यते इति चेत्। सत्यम्, अवस्थानपर्युषणा हि पञ्चरात्रकल्पकर्षणसाध्यत्वेन पञ्चरात्रसाध्या, गृहस्थानां पुरतो निर्णीतोक्तिरूपा तु षष्ठादिदिवससाध्येति। 'तं रयणिं'ति सांवत्सरिकमनुलक्षयति नान्यथा, युगप्रधानाः सांवत्सरिकपरावर्त्ते क्रियमाणे तदुदाहरिष्यन्निति। ननु चतुर्थ्यां भगवद्भिः सांवत्सरिकं प्रवर्त्तितं, भगवद्भिश्चूर्णिकारैरपि तामुद्दिश्य 'पवत्तिये'त्युक्तं, परं तस्या अपर्वत्वं, इयाणिं कहं अपव्वे'त्ति वचनाद्दूरीकृतमिति। सत्यम्, पञ्चम्यां स्थितिमत् तिथिपूरणीकरणरूपं पर्व आराधनाकालरूपं च पर्वत्वं न परावर्त्तितं। अत एव तस्या हानौ वृद्धौ वा 'क्षये पूर्वे' ति प्रघोषमाश्रित्य यावत्सम्भवेति न्यायेन पूर्णिमामावास्ययोर्हानौ वृद्धौ यथा भवति तथा पूर्वतन्यास्तृतीयाया एव क्षयो वृद्धिर्वा क्रियते। ननु चतुर्दश्याः पर्वतिथित्वाद्भवतु पूर्वतन्या हानिर्वृद्धिर्वा, चतुर्थी तथा नेति किं तथाकृतिरिति?, यथा कल्याणकदिनानां स्वयं पर्वतिथित्वाभावेऽपि पुण्यकृत्यसम्बन्धात् पर्वतिथित्वं तथा चतुर्थ्या अपि सांवत्सरिकपुण्यकृत्यसम्बन्धात् पर्वत्वमबाधमेव, अन्यथा तच्चतुर्थ्या हानौ वृद्धौ वा न 'क्षये पूर्वा तिथि'रितिप्रघोषोऽवलम्बनं भवेत्, तदनवलम्बने तु तथाप्रसङ्गे सांवत्सरिकलोपादि दुर्वारमेव। पर्वतिथिपरिगणनादिषु पञ्चम्या भिन्नत्वेन सांवत्सरिकस्य पर्वत्वेन भणनमपि तस्याश्चतुर्थ्याः पर्वत्वमेव प्रतिपादयतीति। किञ्चास्याश्चतुर्थ्या अपर्वत्वे चातुर्मासिकस्यापि चतुर्दश्यां परावृत्तेस्तत्क्षये पूर्णिमाया वा त्रयोदश्यां चातुर्मासिककरणमयुक्ततरं स्यात्। ननु चतुर्दश्येव व्यपदिश्यते, न त्रयोदशीति, आराध्यतिथेर्व्यपदेशपूर्वमेव 'छण्हं तिहीणे'तिवचनादाराधनादितिचेत्।



P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

सत्यम् , पर्वत्वेनैव सा तथा चतुर्थ्यादावपि चेति ।

भव्यानां हितसिद्धये कृतिरियं ज्ञाता यकाऽऽगारिभिः, सैषा पर्युषणा न वत्सरभवा सांवत्सरीत्वं श्रिता ।
न न्याय्यं त्वभिवर्धितेपि तपसि प्रौढात्पदे नादिमे, युक्तं तन्विति युग्मसाधनकृते ह्येतां बुधः संश्रयेत् ॥१॥
खाद्या वदन्ति निजकल्पनयैव सूत्रं, चूर्णिं च भाष्यसहितां समुपेक्ष्य नित्यम् ।
सांवत्सरे प्रतिविबुध्य समग्रमेतद् , भाद्रे सदा कुरुत तच्छिवशर्महेतोः ॥ २ ॥ इतिश्रीज्ञातपर्युषणा ॥

## श्रुतस्तुतिः (१८)

भरतैरवतविदेहाः सुकर्मभूमयोऽर्धतिसृके द्वीपे । सर्वार्हद्भिः श्रुतावलिभिः पाविताास्ताः सदा नम्याः ॥ १ ॥ पृथ्व्याद्या व्यवहार्याः सदा निगोदास्तथा ह्यव्यवहार्याः । यद्द्धति तमस्तिमिरं भिनत्ति पटलं तयोर्हि श्रुतम् ॥२॥ सुरगणनराः सदा यत् श्रयन्त आत्मावलम्बनं मत्वा । अविगानेन नमन्ति च पुनः पुनः श्रुतमहोऽर्हन्ति ॥३॥ जिनास्तीर्थं नृपा नीतिं, प्रजाः पालिं नवां नवां । सुवते तां परं धत्ते, श्रुतमेव चिरं ननु ॥४॥ जिनेशाः सुरेशा नरेशाः सदैव, तिमिरावलिं स्फेटयन्तीद्धरूपाम् । हृदाप्तां जनानां यदाप्यावलम्बं, श्रुतं सत्ततो नम्यमेवाप्तवर्गैः ॥५॥ जगज्जन्ममृत्यामयार्तिव्यथानां, व्रजैर्व्याधितं सारहीनं शरण्यं । ससारं सदाऽर्थं यदन्यन्न चैति, सदा तच्छ्रुतं संश्रयन्ते सुबोधाः ॥ ६ ॥ सदा सौख्यखानेः समीहा जनानां, यका स्याद्गतान्ता गतावाधवार्त्ता । यथेष्टा न चोना न चान्या श्रुतात् सा, बुधैः संश्रितं तत् स्तुयात्को न विज्ञः ॥७॥ क्षेत्रस्य कालस्य



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भवस्य भाव-व्रजस्य तीर्थस्य जिनस्य चान्तरे। गणस्य जातेऽपि न चान्तरेच्छ्रुतं, ततस्तदाप्नोति समग्र-
पूज्यताम् ॥८॥ पयोविहीनं न सरो विभाति, सरोविहीनं नगरं न चापि। जनेन हीनो नगरो
जगत्यां, वृत्तेन हीनं श्रुतमेवमिद्धम् ॥९॥ परःशतैर्वादिव्रजैरधृष्यं, तीर्थं जिनानां विजयाय जातं।
यच्छुद्धवृत्ताङ्कितमेकमाप्य, नरामरेशोऽपि तदाऽस्य मोघाः ॥१०॥ प्रमेयवृन्देन मतान्तराणां, प्रामाण्य-
वृत्तिस्तु जिनेश्वराणां। प्रमेयवृन्दस्य विदा ततस्तां, सिद्धां नतोऽहं प्रयतो विदन्तु तत् ॥११॥
अध्यक्षमेतत् प्रतिपक्षिणां ब्रुवे, वचः सघण्टारवमुच्चकैर्ननु। श्रुतस्य साम्राज्यमिदं वरेण्यं, शिवस्य
चारित्रमनंह उद्धतम् ॥१२॥ जगत्यशेषाणि मतान्तराणि, स्वकीयराद्धान्तहताहतानि। द्रव्यादिसंयोग-
युजा जिनेश-वचोऽमृतेनोच्छ्रवसनानि जग्मुः ॥ १३ ॥ त्रिकाले जिनेशा यतो लब्धभावाः, श्रुताद्
द्वादशाङ्गात् क्रियोद्दिष्टरूपात्। श्रुतं सच्चरित्रं जगत्यां तदादि, मतं जैनमेतन्नतोऽहं प्रयत्नात् ॥१४॥
अद्रोहबुद्धिर्जगतीतले या, सर्वासुमत्सौख्यनिधानमेषा। सत्यं श्रुतं तन् नियता समृद्धिः, सत्संयमाद्
यत् स च जैनशास्त्रम् ॥ १५ ॥ नमन्ति देवा असुरा मनुष्याः, स्व कांस्वकान् देवमुखाश्रितान्तं।
सद्भावनातस्तु श्रुतं सदा ते, चारित्रयुक्तं नमतादरात् तत् ॥ १६ ॥ पृथ्व्यादयो यत् समभावसंस्था-
स्तत्स्फूर्जितं धर्ममहीशतत्त्वम्। सत्संयमे तत् समवेक्ष्य भव्याः, सदादृताः सच्चरणे श्रुते तत् ॥ १७ ॥
अज्ञातभावा न समस्तभावाः, स्थिताः स्वरूपेऽपि हिताय पुंसां। युनक्ति तांस्तत्र श्रुतं सुवृत्तं, तत्सत्य-
मेतज्जगदत्र वृत्तम् ॥१८॥ अज्ञानभावादपि पापभावो, युतोऽपि पुण्येन भवाब्धिभावी। न निर्जरा-
युक् गतबन्धभावः, श्रुतात्तु तत्तद् ध्रुवमेवमेतत् ॥१९॥ वृत्तं श्रुतात् श्रुतं बोधाद्, बोधः सद्दर्शनाश्रितः।
इष्टा वृद्धिरतो विज्ञैः, श्रुतवद्दर्शने सदा ॥२०॥ यद्यपि शास्त्रे ज्ञानाभिधाभिधानं तथापि तन्नाम।



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

श्रुतस्य तत्तद्भगवत्तदर्चनाद्यादरो रूढः ॥२१॥ अर्हन् पूज्यो ज्ञानात् स भववियोगाच्च सिद्धभगवन्तः। आर्याद्याः सच्चरणात्तदत्र भगवच्छ्रुतं लोके ॥२२॥ शासनाधीश्वराः शक्रस्तवाद्यैः तद्विधाः परे। लोकोद्योतेन तु स्तुत्याः, परमेतेन शासनम् ॥ २३ ॥ वर्धापकानां क्रियते समर्चा, वर्धाप्यमाहात्म्यमवेक्ष्य विज्ञैः। श्रुतस्य रक्षा विधिबद्धलक्षा, जैनैः सदाऽर्च्यन्त इतोऽमरेशाः ॥ २४ ॥ इदं शास्त्रं भव्यैः शिवगतिपथाबद्धहृदयै–रनन्यत् संचिन्त्यं नहि सुलभमेतद्भवजले। कुतीर्थ्यैराक्रान्ते विपुलतरपुण्यैरधिगतं समाराध्यैतद्भो! व्रजत सततानन्दपदवीम् ॥२५॥ इतिश्रुतस्तुतिः॥

## ज्ञानभेदषोडशिका (१९)

भेदा ज्ञानस्य पञ्चामी मत्याद्या ये श्रुते मताः। किमात्मानन्तरपरम्परागमविभेदतः? ॥ १ ॥ मत्यादीनां स्वरूपं यज्ज्ञायते केवलेन तत्। भेदोऽपरस्माद् व्यावृत्तिः, सा रूपं नहि वस्तुनः ॥ २ ॥ न चासन् ज्ञायते तस्मात्, नार्हा प्रज्ञाप्तताभिदि। आत्मागमस्याभावेन, नेतरौ सङ्गतौ पुनः ॥ ३ ॥ सत्यं परं पदार्थाः स्वस्वरूपेण समे भुवि। वर्तन्ते स्वस्वरूपं चानुवृत्तिव्यावृत्तिद्वयम् ॥ ४ ॥ यद्वद् घटो घटत्वेन, पराभावेन वर्तते। तथा न चेत्परत्वाप्तिर्दुर्वारा सर्ववस्तुषु ॥ ५ ॥ परवस्तुविनिवृत्तं, रूपं वस्तुनि तत्समं। भावाभावस्वरूपाढ्यं, वस्तु प्राज्ञैर्मतं समम् ॥ ६ ॥ पटाद्यभावरूपं चेन्न घटाद्यं तदा तकत्। अभावाभावरूपत्वात्, पररूपं समाश्रयेत् ॥ ७ ॥ भावाभावोभयात्मत्वात्, स्यात्सामान्यं विशेषयुक्। सर्वत्र गमभेदाद्या, बाधका नहि तत्त्वतः ॥ ८ ॥ विश्वकर्तृत्ववादेन, वस्त्वेकं कल्पभेदतः। अमिताश्च मताः कल्पा, मन्वन्तरादिवाक्यतः ॥९॥ प्रत्यंशं



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वस्तुनि स्वांशे, स्वरूपमंशभेदतः । ततोऽनुवृत्तिः सर्वत्र, सामान्यस्य बुधैर्मता ॥ १० ॥ सर्वगं वस्तुरूपं तत्सा-
मान्यं सविशेषकम् । ज्ञानदर्शनयुग्मं तत्, केवलं सर्वगोचरम् ॥ ११ ॥ ज्ञानेषु तु भिदः सर्वसंसार्यसुमतां
किल । इन्द्रियानिन्द्रियोत्थानं, ज्ञानं तन्मतिसञ्ज्ञितम् ॥ १२ ॥ श्रुतं सर्वज्ञवाक्याद्यदात्माद्यर्था अतीन्द्रियाः ।
श्रुत्वा मता न तत्रान्यत्, प्रामाण्यस्य नियामकम् ॥ १३ ॥ जगद्व्यवहृतेर्येऽर्था, योग्या मूर्त्तत्वधारिणः । तान्
सर्वान् विषयीकुर्वंस्तृतीयमवधिः पुनः ॥१४॥ व्यवहाराद्बहिस्ताद्ये, मोक्षमार्गैकमानसाः । विदन्ति परचित्तानि,
तन्मनोज्ञानमुच्यते ॥१५॥ द्रव्यक्षेत्रकालभावान्, समस्तान् वेदितुं क्षमं । तत्पूर्णं केवलज्ञानं, ज्ञानेऽतो भित्त-
दाश्रिता ॥१६॥ तदेवं पञ्च ज्ञानानि, स्वरूपेण निभालयन् । सर्वज्ञः पञ्चधा ज्ञानमाख्यदानन्ददं नृणाम् ॥१७॥
इतिज्ञानभेदषोडशिका ॥

---

## अनानुगामुकावधिः (२०)

आदिष्टं कोविदैर्ज्ञान–मनानुगामुकं श्रुते । अवधेः षट्सु भेदेषु, तत्किं रूपं निवेद्यताम् ? ॥१॥
यतोऽत्र कल्पनायुग्मं, बुद्धिगम्यं नृणां भवेत् । बोधेत्प्रकाश्यक्षेत्रस्थ, उत्पत्तिक्षेत्रगोऽथवा ॥ २ ॥ शृणु
भव्य ! यथा सूत्रे, निर्दिष्टं नन्दिनामके । अनानुगामुकाख्याने, देववाचकसूरिभिः ॥३॥ अग्नेः स्थाना-
द्भ्रमन् दिक्षु, परितो वीक्षते तकत् । यथा तथोद्भवेज्ज्ञानं, यत्र तत्र समीक्षते ॥४॥ अन्यत्र नेक्षते
ज्ञाताऽनानुगामुकभेदवान् । एवं चोद्भासनीयस्थोऽवैति ज्ञेयमिति स्थितिः ॥५॥ ननु यत्रोद्भवेज्ज्ञानं, तत्रावैति
नरः सकः । इति वाक्याद्भवेत्क्षेत्रमुत्पत्तेर्ज्ञप्तिकारणम् ॥ ६ ॥ नैवं प्रकाश्यक्षेत्रस्थो, लभतेऽवधिज्ञानतः ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इति चेत्परिता अम्यन्नित्युक्तं किं नु विस्मृतम् ? ॥ ७ ॥ भाष्यकारोऽप्युवाचैव–मनानुगामिकोदितौ । पर-
श्चान्वेति तद्वन्तं, न यथा स्थितदीपकः ॥ ८ ॥ तथा च गत्यभावे तदेवमुत्पत्तिपक्षगं । सूत्रं चेत्तन्न पूर्वोक्त-
वैपरीत्यं यतो नहि ॥९॥ पूर्वं ह्युद्धास्यभूभागाच्च्युतौ ज्ञानक्षतिर्नहि । आनुगामुकरूपोक्तौ, निर्णीतमित्यदो
नैवम् । किन्तु व्याख्यानुगं तथा ॥ १० ॥ वाचकास्तु यदाचख्युः प्रश्नादेशपुरुषगं । ज्ञानं तथा नानुगामि,
ज्ञानं ज्ञेयं विपश्चिता ॥ ११ ॥ तथा चोत्पत्तिक्षेत्रस्थो, यावज्ज्ञानगुणान्वितः । तावदेव ततः क्षेत्राच्च्युतस्य
तन्न सम्भवेत् ॥ १२ ॥ पुनस्तत्रागतो वेत्ति, तावद् द्रव्यादिकं नरः । तथा चावरणीयानां, कर्मणां क्षेत्रतः
क्षितिः ॥१३॥ तदेवमुभयं सम्यक्, प्रधार्यं धीधनैर्मतं । यतोऽर्च्यतमवाण्या, न धार्या वितथता मनाक् ॥१४॥
इति अनानुगामुकावधिः ॥

## प्रज्ञप्तपदद्वात्रिंशिका (२१)

सूत्रेष्वाम्नायते विज्ञैः, प्रज्ञप्तं पदमादितः । तस्यार्थौ विविधैर्विज्ञैः, किं भिन्नत्वेन कथ्यते ? ॥ १ ॥
लौकिकेषु पदार्थानां, चतुर्धा साधनं मतं । प्रत्यक्षेणानुमानेनोपमानेनागमेन च ॥ २ ॥ यदा तत्रागमज्ञाता,
साध्यन्तेऽर्थास्तदा पुरः । श्रोतॄणां ख्यायते प्राज्ञैः, कथ्यन्ते ये प्ररूपिताः ॥ ३ ॥ आप्तोप्रज्ञत्वसूचायै, प्रज्ञप्तेत्य-
ब्रवीद् गुरुः । आगमा हि पराधीनवाक्यव्याख्यार्थगाः समे ॥४॥ आगमो ह्याप्तवचनमित्येतद् ख्यायतेऽमुना ।
प्रज्ञप्तेन विकल्पोत्थं, नैतद् व्याख्यानमीर्यते ॥५॥ निशामनेऽपि ह्रस्वः स्याद्, निशाने णिति प्रत्यये । तथा
यथा ज्ञपेस्तेन, प्रज्ञप्तं कथितार्थकम् ॥ ६ ॥ आगमानग्रतः कृत्य, लोके ये स्युः प्रकत्थकाः । नातीन्द्रियार्थ-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वेत्तारः, प्रज्ञप्तमित्यवादिषुः ॥७॥ अतथ्यानाममूलानामर्थानां प्रतिपादने। असत्यभ्रम्भसंभूत्यै, प्रज्ञप्तेति वचो धृतम् ॥ ८ ॥ अप्रज्ञप्ते स्वयं क्लृप्तेऽप्यर्थे लोकप्रतीतये। प्रज्ञप्तमित्यवादिषुस्ते, भवभ्रान्तेरभीलुकाः ॥ ९ ॥ जैनं मतं न कोप्यस्तीश्वरो विश्वविधायकः। न चैक एव सर्वज्ञस्तत्प्रज्ञप्तं न तत्परम् ॥ १० ॥ विश्वस्यानादितोऽनन्ता, अतीते ईश्वराः पुनः। अनागतेप्यनन्तास्ते, विश्वस्यानाशिता यतः ॥ ११ ॥ विश्वे जीवाद्यो नित्या, येऽर्था आगमनोदिताः। जीवाजीवाश्रवबन्धसंवरा निर्जराऽव्ययम् ॥१२॥ ज्ञानरूपोऽयमात्मा तत्क्षिप्त्वा कर्माणि संवृतेः। प्राप्य केवलमर्थांस्तान्, सर्वज्ञो देशयेज्जनान् ॥ १३ ॥ पारम्पर्येण तीर्थेशा, आगमाश्च परस्परं। हेतुकार्यत्वमाश्रित्यानादितो भुवि जज्ञिरे ॥ १४ ॥ यदा ते गणभृद्वर्यानाश्रित्योचुर्विभावने। 'पन्नत्त'मिति तत्रैषोऽर्थो बुधैरवधार्यते ॥१५॥ ज्ञानं पञ्चविधं तत्र, प्रकृष्टं केवलं मतं। सैव प्रज्ञा तयेमेऽर्था, ज्ञाता युष्मान् ब्रवीम्यहम् ॥१६॥ अत एवोच्यते शास्त्रेऽखिलानर्थान् जिनो विदन्। प्रज्ञापनीयान् गणिनोऽर्थान, यतो वदति तच्छ्रुतम् ॥१७॥ आत्मागमत्वसूचायै, जिनः प्रज्ञाप्तमित्यवक्। अनन्ताः कालभेदेन, तथाप्येका प्ररूपणा ॥१८॥ यतो ज्ञानं समस्तार्थं, जीवाद्याः शाश्वताः पुनः। न कालजीवभेदेन, द्वादशाङ्ग्यां विभिन्नता ॥१९॥ स्वयम्बुद्धादिभिश्चात्र, प्राक् तीर्थे जिनभाषितं। उच्यते लब्धमित्येते, प्रज्ञप्तं प्राग् जिनैर्जगुः ॥२०॥ जातिस्मृत्यादिका प्रज्ञा, तयाप्तमिति कथ्यते। तैस्ततोऽतीततीर्थेशाख्यातमित्यवधार्यते ॥२१॥ जिनोक्तानखिलानर्थान, ज्ञात्वा ज्ञानचतुष्टयीं। दधानाः परमां शिष्यानूचुर्गणभृतस्त्विदम ॥२२॥ गणभृन्नामकर्मोत्थामर्हद्वाण्युद्भवां पुनः। प्रकृष्टामाप यां प्रज्ञां, तयाऽऽप्तं जिनसाधितम् ॥२३॥ अनन्तरागमार्थोऽयमागमो गणभृद्व्रजे। ततस्तत्सूचनायै तत्, प्रज्ञाऽऽप्तमिति कथ्यते ॥ २४ ॥ छद्मस्था वा समे जीवा, ज्ञानमन्वहमाश्रिताः। आन्तर्मुहूर्त्तिकं यस्मान्नोपयोगो लघुस्ततः ॥ २५ ॥ अर्हन्नेवानुसमयं, ज्ञानं दर्शनसंयुतं। दधाति सर्वदा प्राज्ञस्ततोऽर्हन्नेव नापरः ॥ २६ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तस्मात्प्राज्ञाच्च जीवाद्या, अर्था आप्ता मया इमे। तान् प्राज्ञाप्तान् ब्रुवे युष्मानित्यनन्तर आगमः ॥ २७ ॥ प्रतिसूत्रमतः प्रोक्तं, श्रुतमायुष्मता मया। भगवताऽऽख्यातमित्येतदादौ स्पष्टतमं वचः ॥ २८ ॥ मयोक्तमेतदखिल-मर्हदुक्तं न चान्यथा। इति ज्ञापयितुं प्रान्त्य, 'इति बेमी' त्युवाच सः ॥२९॥ ज्ञापयत्येवमाख्यान्, सोऽनन्तरागमसंविदम्। अनुवादपरः शेषः, स्यात्परम्पर आगमः ॥ ३० ॥ यावत्तीर्थं तृतीयोऽसौ, यन्न तीर्थं विनाऽऽगमान्। न सर्वज्ञान् गणेशांश्च, विना जैनागमाः पुनः ॥३१॥ तदागमानां त्रितयमेवमाश्रित्य धीधनैः। प्रज्ञप्तपदतात्पर्यं, ध्येयमानन्दसिद्धये, ॥३२॥ इति प्रज्ञप्तपदद्वात्रिंशिका ॥

# अनुयोगपृथक्त्वम् (२२)

ननु इतरदर्शनेभ्यो जिनदर्शनस्य को विशेषो व्यापक? इति।

इतराणि दर्शनान्येकैकनयानुगतानि, जैनं तु दर्शनं सर्वनयसमूहात्मकस्याद्वादानुगतमिति। अत एव 'अन्योऽन्यपक्षप्रतिपक्षभावादि'ति श्रीहेमचन्द्राः, 'सुनिश्चितं नः परतन्त्रयुक्तिष्वि'त्यादि श्रीसिद्धसेनदिवाकरपादाः, 'सव्वप्पवायमूलं-तो सव्वं सुंदरं तंमि'त्ति श्रीहरिभद्रसूरिपादाश्चख्युः। ननु सर्वनयसमूहात्मकस्याद्वादमयं जैनं शासनं, एकैकनयप्रधानानि चेतरशासनानीत्यत्र किमितरदर्शनसाधितान् पृथग्नयानेकीकृत्य स्याद्वादो निरूपित? उत सर्वनयात्मकात् स्याद्वादात्तानि पृथग्भूतानीति?। आद्ये, उदधाविव सर्वसिन्धवः, समुदीर्णास्त्वयि नाथ! दृष्टय' इति श्रीसिद्धसेनदिवाकरवाक्यस्यानुकूल्येऽपि 'सव्वसुयाणं पभवो'त्यादिनन्दीवाक्यस्य 'सव्वप्पवायमूल'मित्याद्युपदेशपदीयवाक्यस्य 'कुधर्मादिनिमित्तत्वा-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दि'त्याद्यष्टकवाक्यस्य च का गतिः ?, परस्मिन् नन्व्यादिवाक्यानुकूल्येऽपि श्रीसिद्धसेनवाक्यस्य का गतिरिति ?।
जैनं हि दर्शनं सर्ववित्प्रणीतं, सर्वविदेव चात्माद्यतीन्द्रियपदार्थानां साक्षात्कर्ता, सर्वविद्या-वश्यं क्षीणदोषः, तत एव स यथाज्ञातानेवात्मादिपदार्थान् देशयेत्, अनन्तधर्मात्मकाश्च ते इति सर्वन-यसमूहात्मकस्य स्याद्वादस्यैवादितो देशना। परदर्शनकारास्तु वीतरागसर्वज्ञत्वाभावादनुकरणेनात्मादिप-दार्थान् ब्रूयुः, साक्षात्काराभावादनुकरणेनापि निरूपणेन मिथ्यात्वोदयेनैकधर्ममाश्रित्य निरूपणात् पराण्ये-कैकनयप्रधानानि। प्रतिबिम्बानां समाहारो न देवदत्तः किन्तु देवदत्तपृथक्पृथगवस्थादि, दर्शनानि प्रतिबिम्बानीति। श्रीसिद्धसेनदिवाकरास्तु स्वस्वदर्शनानुरक्तपरीक्षकपरिषदमुद्दिश्यैवमाहुः यदुत-पृथक् पृथग्मतमन्तव्यानि सर्वाणि सन्त्येव जिनशासने, परं जिनशासनमन्तव्यं अनन्तधर्मात्मकपदार्थ-प्रतीतिरूपं तु न क्वाप्यन्यत्रेति विहायेतराणि जैनमेवाश्रयणीयमिति विक्षेपणीकथावन्नेयमिति। बौद्धा हि पर्यायवादमाश्रिताः, न च पर्यायज्ञानं पर्यायिज्ञानाभावे, धर्मिज्ञानाभावे धर्मज्ञानस्य निराश्रयत्वात्। न च धर्मसमुदायो धर्मी, गुणगुणिनोः सर्वथैक्याभावात् शिबिकावहनवत्। अवयवसमुहोऽपि पृथक् चेन्नावय-विकार्यकृत्, तर्हि धर्मसमुदायोऽपि कार्यकृत् न स्यात्। तथा अवस्थामन्तरेणावस्था (वा)न् पदार्थ इति न साङ्ख्यानां द्रव्यैकान्ततापि कान्ता, उभये च द्रव्यपर्यायपदार्थाश्रिताः, तथावादी चादित एव सर्वविद्। नैयायिकास्तु 'इन्द्रियार्थसन्निकर्षे'त्यादि वदन्तः प्ररूपणीयानेवाङ्गीचक्रुः, न सर्वविदं वीतरागं तत्त्वतः प्ररूपकं, न चात्मादीनि तमन्तरा साक्षाद्द्रेयानि, न च तेषामन्तराऽध्यक्षमनुमानं। वैशेषिकास्तु तद्विशेषा इति तन्मतमेव संश्रक्रुः। मीमांसका अपि स्वर्गफलकानुष्ठानपरायणाः। अतीन्द्रियार्थद्रष्टृभावे च कथमतीन्द्रि-यस्वर्गस्वर्गिज्ञानं ?, कथं चोत्पाद्योत्पादकभावज्ञानमित्यवश्यं तन्मतमपि सर्वज्ञशाब्दमूलं। किञ्च-ऋषभमरी-



P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

चिकपिलासुरिसाङ्ख्ययोगाः पूर्वपूर्वमूला इति विदितचरं विदुषां । नास्तिकस्त्वात्मपरलोकाद्यपलापमूलः, अपलापश्च प्रसिद्धिपूर्वकः, सा चैतेषां सर्ववित्प्ररूपणामूलेत्यपरेषां दर्शनानां जिनोक्तद्वादशाङ्गमूलत्वं प्रतिपद्यमाना अपि स्याद्वादं तत्प्ररूपकांश्चैकैकार्थापलापिनो देशनिह्नवाः ।

सत्यपि तीर्थे सूत्रोच्छेदवादिनः सर्वनिह्नवाश्च द्वादशाङ्गार्थप्रभवा इति सुगममेवावसातुमिति । ननु नामादिद्रव्यादिज्ञानादिनैगमादिविविधनयस्वरूपं स्याद्वादात्मकं च जैनशास्त्रं चेन्नयानां क्वावकाश ? इति ।

जैनो हि धर्मो द्व्यात्मकः, श्रुतं चारित्रं च । श्रुते व्याख्येयं व्याख्यानं च, व्याख्येयं व्याख्यानतात्पर्यकं, तत एव विवक्षाया अवगमात् । व्याख्यानं च परैः केवलसंहितादिभेदमिष्टं । जैनैः अनुगमे तत्तथेष्टमपि सूत्रानुकूलार्थयोजनात्मकेऽनुयोगे तु उपक्रमनिक्षेपानुगमनयरूपमिष्टमिति प्रतिशास्त्रश्रुतस्कन्धाध्ययनोद्देशालापकसूत्राणि नयानां विचारणापदवीयोग्यत्वं । अत एव 'नत्थि नएहि विहूणं, सुत्तं अत्थो य जिणमए किंचि'त्यविसंवाद्येव प्रवचनवचनम् । नन्वेवं नयानां प्रतिसूत्रार्थं व्यापकत्वे किमिति पृथगनुयोगद्वारत्वमिति ? । यद्यपि व्याख्यानाङ्गपरिगणनाय तद्व्याख्यानं पृथग्द्वारतया निर्दिष्टं तथापि व्याख्याने तु नयाः सूत्रादिना सहैव व्याख्येया भवन्ति । अत एव भाष्यकाराः—सुत्तं सुत्ताणुगमो, सुत्तालावगकओ य निक्खेवो । सुत्तप्फासियनिज्जुत्ति नया य समगं तु वच्चंती'त्याहुः ।

ननु प्रतिसूत्रार्थं नयास्तर्हि कथमनुयोगद्वारादिषु पृथग्नयद्वारं तुर्यद्वारतया व्याख्यायते ? ।

भगवद्भ्य आर्यरक्षितेभ्यः परतः प्रतिसूत्रं तद्व्याख्यानस्यावरोधात्तथोच्यते व्याख्यायते प्रत्यध्ययनं ज्ञानक्रियोभयनयव्याख्यानेन, परं सूत्रार्थौ न कावपि तद्धीनौ स्त इति प्रमाणद्वारे उपक्रमान्तर्गते तेषां व्याख्यानमादृतं । ततश्च सर्वेषां सूत्राणां प्रमाणपदप्राप्तत्वनिर्णयस्तु तद्विचाराधीन एव, परं दुष्षमाजीविनां ॥ ६१ ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

मेधादिहानिमवलोक्य प्रतिसूत्रं तदभिधेयं च प्रति प्रमाणनयसिद्धयोरेव सूत्रार्थयोर्व्याख्यानमाचीर्णमिति। न हि द्रव्यस्य निधानीकरणेऽपलापकलङ्कः, व्यवहारस्तु तत्र मुत्कलेन। अत्रापि प्रतिसूत्रं तद्व्याख्यानं निधानीकृतं, नत्वपलप्तं न वा निह्नवैरिव विपर्यासितमिति। तथा च विद्वान् कश्चित्तथाविधस्तथाविधान् विदुषः श्रोतॄन् प्राप्य जिनप्रवचनाव्याघातकं प्रतिसूत्रार्थं पदार्थान् वा कतिचिदाश्रित्य कुर्यान्नयानां व्याख्यानं, न स्युस्ते उभयेऽप्याचरणोत्थापकाः सूत्रोत्तीर्णवादिन इति। ननु प्रतिसूत्रार्थं नयव्याख्यानं कुर्वद्भिर्भगवद्भिरार्यरक्षितैः पाश्चात्यानां मेधादिहानिं भगवन्तं तथाविधानुपमधृतिसम्पन्नमपि मोमुह्यमानं दुर्बलिकापुष्पमित्रं दृष्ट्वा प्रमाणद्वारे नयव्याख्यानं निधानीकुर्वद्भिः सर्वभाषापरिणामिजिनपतिवचनरूपस्यात्मागमस्य भगवद्भिर्गणधरैः सूत्रीकृतस्य धर्मकथागणितचरणकरणद्रव्यार्थमयस्यार्थाधिकाराः कथं पृथक्कृता इति।

यथा नयगता प्रतिसूत्रार्थं विद्यमाना वक्तव्यता न्यासीकृता तथैव मेधादिहानिमपेक्ष्यानुयोगापरपर्याया अर्थाधिकारा अपि पृथक्कृत्वैकैकः सरलमार्गः प्रवृत्तिपदवीमासादितः, शेषास्त्रयस्तु निधानीकृताः,। प्रतिसूत्रार्थं नयवक्तव्यतावत् प्रतिसूत्रार्थमनुयोगचतुष्टयवक्तव्यताया अपि मन्दमेधोभिर्धारयितुं दुष्करत्वात् नयवक्तव्यतानिरूपणेन विनाऽनुयोगसमुदायस्य निरूपयितुमशक्यत्वाच्च। तत एव सूरीन्द्रैः प्रतिसूत्रार्थं नयानां वक्तव्यता शेषानुयोगत्रयस्य च वक्तव्यता इत्युभयमपि न्यासीकृतमिति। सर्वमिदमावश्यकनिर्युक्त्याद्यनुसारेणोहितुं सुशकमिति।

ननु निर्युक्तिरावश्यकस्य कैः कदा च कृता ?, आचार्या आर्यरक्षिताः कदा जाताः ? इति।

आवश्यकादिदशसूत्र्या निर्युक्तिर्भगवद्भिः भद्रबाहुस्वामिभिः श्रुतकेवलिभिः कृता। तेषां च सत्तासमयो वीरभगवतो द्वितीयशताब्दीरूपः। भगवन्त आर्यरक्षिताश्च श्रीवीरप्रभोः षष्ठ्यां शताब्द्यां



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जाताः। न च वाच्यमाश्चर्यमिदं यद्-द्वितीयशताब्दीजाताः षष्ठशताब्दीजातानामितिहोल्लेखका इति। न च श्रुतकेवलित्वेनातीन्द्रियार्थद्रष्टृत्वान्नासम्भवीदमिति. यतो निर्युक्तिषु पाश्चात्यश्रुतधराणां स्वस्य श्रीभद्रबाहोरपि च नमस्कारो दृश्यते इति। शृणु, काश्चन निर्युक्तयो भाष्यमिश्रिता अपि निर्युक्तित्वेन व्यवह्रियन्ते, काश्चन भाष्यबाहुल्यात् भाष्यत्वेन। अत्र क्रमेणावश्यकाचारप्रकल्पभाष्ये उदाहर्तुं शक्येते। भाष्याणि च पाश्चात्यानीति निर्विवादं। वस्तुतस्तु वर्तमानोऽनुयोगः श्रीस्कन्दिलाचार्यपादैः प्रवर्त्तित इति नन्दीसूत्रगतावलिकावाक्यं शरणं। तथा च सूत्रनिर्युक्तिभाष्यपाठेषु सुकरं समाधानमिति। भगवतां श्रीआर्यरक्षितानामिति बहुन्यद्भुतानि-प्रथममतिलघुवयस्कस्य चतुर्दशविद्यास्थानपारगामित्वं, तादृक्त्वेन राजमान्यकुलत्वेन च महद्दूर्ध्या राजकृतो नगरप्रवेशः, प्राभृतप्रचयैर्गृहपूर्त्तिः, मातुः सन्तोषायैव चिराय गृहागतेनापि प्रस्थानं, तदादिष्टाध्ययनायाज्ञातश्रावकाचारेण ढड्ढरश्रावकाचीर्णश्रावकाचारस्यानुकरणं प्रव्रजनं च शैक्षनिष्फेटिकयाऽपि, पूर्वाण्यधिजिगमिषुणापि निर्यामणार्थं विलम्बनं, विघ्नां जिघृक्षुणाऽपि आचार्योपाश्रयात् पृथगुपाश्रयेऽवस्थानं, आह्वानायागतस्यापि भ्रातुः प्रव्राजनं, समस्तकुटुम्बदीक्षणं, सच्छत्रकसकच्छधौतिकस्यापि वृद्धपितुर्दीक्षणं, कलया तन्मोचनमपि, वृद्धस्याऽपि पितुः भिक्षाचर्यायै अवतारणं, कालिकादिश्रुतमूढनयत्वकरणं, अनुयोगविभागेन सूत्राणामवस्थापनं क्रमशो विहितानि। स्वयं परलोकमलंकुर्वाणेष्वपि भगवत्सु भगवद्वज्रस्वामिनि दशानां पूर्वाणां तुर्यसंहननस्य यथा व्युच्छेदस्तथा किञ्चिन्न व्युच्छिन्नं। परं तत्रभवच्छिष्येण गोष्ठामाहिलेन निह्नवायितमिति।

ननु त एवैते आर्यरक्षिता ये कल्पकिरणावलीकारेणार्यरक्षतयाख्याता अन्ये वेति।

तदुदितचरित्रा एवामी, केवलमार्यरक्षत्वेनाख्याता इति तु मुग्धमोहनमेव, तत्रैव त्रिषु आर्यरक्षित-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नाम्नैव व्यवहारात्, सत्यपि आर्यरथशिष्यत्वप्रसङ्गे तोसलिपुत्राचार्यशिष्यतयैव भणनात् भद्रगुप्ताचार्यनिर्यामणायाः श्रीवज्रस्वामिनः पार्श्वेऽध्ययनस्य च भणनात् श्रीभद्रगुप्तवज्रस्वामिभ्यां समानकालभावित्वस्य स्पष्टं ज्ञापनात्, केवलं वज्रस्वामिवृत्तान्तस्यासन्नत्वात् श्रीवज्रस्वाम्यार्यरक्षितानां सम्बन्धस्य दृढरूढत्वात् तदनन्तरं तद्वृत्तमाख्यातं स्मारितं बहुसमाभिधानेमार्यरक्षनाम्ना। अनाभोगविलसितं तदाख्यानं चेद्भविष्यत्, निरदेक्ष्यदार्यरक्षनाम्ना आर्यरथशिष्यत्वेन चेति।

किञ्च–तत्रोपसंहारोऽपि इत्यार्यरक्षितस्वरूपमित्येव कृतः, न तु इत्यार्यरक्षस्वरूपमिति। कल्पान्तर्वाच्ये ५३ श्रीवज्रस्वामिनि दशमं पूर्वं तूर्यं संहननं च व्युच्छिन्नं। ४६ इतिश्रीवज्रस्वामिसम्बन्धः। आर्यरक्षितसम्बन्धश्चायम् ॥अपूर्णं। इति अनुयोगपृथक्त्वम् ॥

## निषद्याविचारः (२३)

निषद्याया विचारोऽथ, क्रियते बालबुद्धिना। प्रसिद्धिर्यन्निषद्याया, जैने सार्वत्रिकी खलु ॥१॥ कः शब्दार्थोऽत्र चेद्रूढ्या, प्रच्छन्नं प्रणिपत्य यत्। सर्वेषां गणधारिणां, तत् त्रिकं जिनराट् पुरः ॥ २ ॥ जिनाश्च क्रमशः सर्वे, तान् वदन्तिस्म शासने। उत्पन्नं विगमं ध्रौव्यं, ततः सा त्रिपदी मता ॥३॥ कोट्याचार्या अतः प्राहुः, स्वीयावश्यकवार्तिके। अङ्गप्रविष्टं तद्यत्स्यात्, त्रिपृच्छोत्थं श्रुतं समम् ॥४॥ एष एव च रूढोऽर्थः, शासने वर्ततेऽधुना। त्रिपद्युत्था ततः सर्वा, द्वादशाङ्गी प्रकीर्त्यते ॥५॥ आवश्यकस्य चूर्णौ तु, द्वादशाङ्ग्या विधौ गणी। निषद्यात्रिकमादास्ताद्योऽन्यथा ताः परेषु तु ॥ ६ ॥ नन्द्याश्चूर्णौ तु सूरीशैर्मतं भिन्नं ततो बुधैः। आसनं तु निषद्याह्वं, ज्ञायते तद्वचोगणात् ॥७॥ आहुस्ते गणिनः पूर्वं, निषद्यामाश्रिता जगुः।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

एकामेकादशाङ्गानि, ततोऽर्थोऽत्र भवेत् पृथक् ॥७॥ चतुर्दश च पूर्वाणि, सर्वेऽपि गणधारिणः। चक्रुश्चतुर्दशैतास्तु, श्रित्वा शासनसम्पदे ॥९॥ क्रियासूत्रे च सर्वत्र, निषद्याऽऽसनवाचिका। साधुदेहं जगुः सूत्र–कारा नैषद्यगं पुनः ॥ १० ॥ निषद्याद्योतिनीं चक्रे, पद्धतिमर्थसङ्ग्रहाम्। आनन्ददां सुसाधूनां, मोक्षमार्गैकचेतसाम् ॥११॥ इति निषद्याविचारः ॥

## सम्यक्त्वषोडशिका (२४)

नम्यो जिनेशो यदि तत्त्वबोधो. निर्ग्रन्थ आप्यो यदि मोक्षवाञ्छा। कृपा वितीर्या यदि कर्मभीतिस्तत्त्वत्रयं धार्यमिदं सुधीभिः ॥ १ ॥ शास्त्रेषु सम्यक्त्वमुदीरितं ज्ञैर्भूतार्थतत्त्वेषु रुचिर्निरीहा। जीवादिषु प्रोज्झितसर्वदोषा, निक्षेपमानैः सनयैः प्रबन्धात् ॥ २ ॥ तुर्ये ह्युपाङ्गे प्रथमे पदेऽदो, जगाद सल्लक्षणमाप्तवर्यः। तथोत्तराध्यायवचोऽपि मोक्ष–मार्गे स्थितं भव्यविलोकनीयम् ॥ ३ ॥ सत्यप्यमुष्मिन् वचने गताघे, श्रीयोगशास्त्रे प्रभुहेमसूरिः। जगाद देवे सुगुरौ सुधर्मे, श्रद्धानमुग्रं किमु सद्दृशां तु ? ॥४॥ सत्यं त्वयावादि विनेयवर्य !, परं विरोधो नहि कोप्यमुष्योः। यतो भवेज्जीवमुखानि सम्यक्, मन्वान आर्हन्त्यमुखेषु मन्ता ॥ ५ ॥ विलोकयन्नाश्रवभारभुग्नं, देवं गुरुं धर्ममुशेन्न तत्त्वम्। चेत्संवरे निर्जरणे च मग्नं, पश्येत्कथं नैव स मन्यतेऽर्हम् ? ॥ ६ ॥ श्रद्धा ततो जीवमुखेषु यस्य, जायेत तत्त्वेषु जिनोदितेषु। कथं स कुर्यात् भववार्धिसेतौ, श्रद्धां न देवे सुगुरौ सुधर्मे ? ॥ ७ ॥ ज्ञाता न चिन्तामणिसद्गुणानां, रमेत पाषाणचये कदापि। न षट्पदश्चूतरसेन पीनो, निम्बं निलीयेत गतात्मभावः ॥ ८ ॥ अवेत्य जीवादिपदार्थसार्थं, श्राद्धस्ततो मुञ्चति दुष्टदेवान्। गुरूंश्च धर्मान् भवदावली-





P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ढान्, कूटे न कार्षापण आदरो विदः ॥ ९ ॥ आस्थाय माध्यस्थ्यमुशन् सभायां, चिन्तामणिं काचसमानभावं । विद्वानपि प्रेक्ष्यत आदरेण, किं भाववेत्त्रोभययोर्यथार्हम् ? ॥१०॥ जगाद वीरो व्रत-धारणायां, अनुक्रमात्पञ्चकमात्तमुख्यः । अतिक्रमाणां सुदृशस्तदादौ शङ्कादिकान् पञ्च समुदकीर्त्तयत् ॥११॥ विद्वज्जुगुप्सा विचिकित्सता वा, वर्ज्योदिता या न सका गुरुं तु । धर्मं च सत्यं निरचैषुरर्हं, तेषां परेषां न तु लेशतोऽपि ॥ १२ ॥ तथा परीहारमुदाजहार, वीरोऽन्यपाखण्डिकसंस्तवस्य । न चाविनिश्चित्य गुरुं यथार्थं, जह्यात् सुदृष्टिस्तकमाप्तशुद्धिः ॥ १३ ॥ श्राद्धोऽपि चानन्द उपासकेऽङ्गे, तथा परिव्राट् प्रभुरम्मडोऽपि । तत्याज मुक्त्वार्हतचैत्यसाधू–नाद्ये ह्युपाङ्गे परतीर्थिकार्च्यान् ॥ १४ ॥ ततश्च निश्चेयमिदं सुधीभिर्जीवादितत्त्वेषु रुचिर्हि हेतुः । कार्या सुदेवव्रतिधर्मसेवा, यथार्थमेतद् द्वितयं जिनोक्तम् ॥१५॥ सम्यक् सम्यक्त्वमालक्ष्य, शुद्धे देवे गुरौ वृषे । श्रद्धानं कार्यमानन्द–मयं येन पदं भवेत् ॥ १६ ॥ इतिसम्यक्त्वषोडशिका ॥

## सम्यक्त्वभेदविचारः (२५)

गुणो यथाऽऽत्मनो ज्ञानं, स्वरूपेण ततः शिवे । स्थितो भङ्गेन साद्यनन्ततया नित्यरूपभाक् ॥ १ ॥ न तज्ज्ञेयाश्रितं ज्ञानं, ज्ञेयानां हानिवृद्धितः । विपर्यासान्न तस्य स्यात् स्वरूपपरिवर्त्तनम् ॥२॥ नाज्ञातं तेन विश्वेऽस्ति, वस्तु किञ्चित् समन्ततः । ज्ञातं समं ततस्तेन, नेतरेतराश्रयता ततः ॥३॥ अन्यथा तस्य सार्वज्ञ्ये, ज्ञेयं वस्तु समं भवेत् । सिद्धे समग्रविस्तारे, ज्ञाते सार्वज्ञ्यमस्य तु ॥४॥ आत्मनो ज्ञानवन्नित्यं, गुणः सम्यक्त्व-मिष्यते । चारित्रस्येव नाशोऽस्य, सिद्धत्वाप्तौ मतो नहि ॥५॥ परं यथाऽऽत्मनो ज्ञानं, छाद्मस्थ्ये वस्तुनिश्रितं ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अतो निबन्ध इत्युक्तं, तत्त्वार्थे विषयोदितौ ॥ ६ ॥ तथेदमपि जीवानां, जायमानं विनाशतः । सम्यक्त्वरोध-
कानां तु, रुचिरित्यभिधां धरेत् ॥ ७ ॥ अत एव हि सूत्रेषु, सम्यक्त्वानां विभेदने । दशधा रुचिशब्देन भेदाः
शिष्टा दशापि च ॥ ८ ॥ ये जिनेनाभिधीयन्ते, भावा जीवादयो नव । यथा तथैव ते सम्यग्दृशोऽमन्यन्त
नान्यथा ॥९॥ आद्या रुचिर्निसर्गाख्या, सा द्विधा यद् भवोदधौ । मरुदेव्यादिवत्केचिदन्तकृत्त्वं गता इह ॥१०॥
केचिद्वल्कलचीर्यादिश्राद्धबालादिसन्निभाः । पूर्वं प्राप्त्वापि सम्यक्त्वं, नवं प्रापुर्विना कथाम् ॥ ११ ॥ दीपा-
दर्शादयो ह्यर्था, यथा नान्यानपेक्षते । स्वरूपेऽर्थान परं सत्त्वे, द्योतनादि व्यधुः पुनः ॥ १२ ॥ निसर्गोऽयं
तथा जीव-गुणो तो यदि सङ्गताः । जीवादयस्तदा तेषां, रुचिरत्र शुभा भवेत् ॥ १३ ॥ पर्याप्तिरागकायादि-
हीने यद्दर्शनं भवेत् । रूपं तज्जीवगं नित्यं, परत्र रुचिरीर्यते ॥१४॥ सरागाणां यथा धर्मः, श्रोतॄणां श्रुतसंश्रितः ।
न धर्मः श्रुतबाधायां, तेषां तत्ते श्रुतं श्रिताः ॥१५॥ असङ्गं यदनुष्ठानं, चारित्रं यदरागजं । न तत्राज्ञानिबन्धोऽस्ति,
पश्यतां नास्ति देशकः ॥१६॥ उपदेशरुचिमुख्याः, शेषा भेदा नवात्र ये । ते सर्वे नियमात् तत्त्ववृन्दे श्रद्धां
दधुर्ध्रुवम् ॥ १७ ॥ श्रीपुण्डरीकगण्याद्या, जिनोक्तेषु रुचिं दधु । जीवादिषु तथाभूता, उपदेशरुचौ मताः
॥ १८ ॥ श्रीश्रेणिकमुखाः श्राद्धा, वचः श्रुत्वाऽऽर्हतं पुनः । अविचार्यैव मन्यन्त, आज्ञायां ते रुचिं व्यधुः
॥१९॥ दाहायाभय आदिष्टो, येनाशङ्क्य शीलव्ययं । चेल्लनीया वचो मत्वाऽऽर्हतं तं यन्न्यवारयत् ॥२०॥
अधीयाना श्रुतान्येके, सद्दृशं त्वनुलेभिरे । अतः शस्त्रपरिज्ञायामुत्क्रमः कायगो मतः ॥२१॥ स्पृष्टं श्रुतं मतं
सर्वैर्न च सर्वेऽपि सद्दृशः । मिथ्यादृशां ततो दत्ते, व्रतं मार्गप्रवेशकृत् ॥२२॥ अतः कन्याविवाहस्यातिचारोऽ-
णुव्रते मतः। परःसहस्रसाधूनां, सूत्रात् सम्यक्त्वसम्भवः ॥ २३ ॥ उत्पत्तिव्ययनित्यात्म-पदत्रयमुदाहृतं ।
सर्वज्ञेन समाकर्ण्याशेषं विरचितं श्रुतम् ॥२४॥ गणधारिभिः समग्रै-स्तत्ते सर्वे न किं मताः । बीजरुचय



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

आसँस्तद्वदन्येऽपि भवाश्रिताः ॥२५॥ युग्मम् ॥ श्रीगौतमगणेशोऽग्रे, जिनस्यागाद् बुभुत्सया । जाते चाभिगमे बुद्धः, प्राव्राजीच्च क्षणात् पुनः ॥२६॥ परेऽपि तादृशा जीवा, रुचिं ये दधुरार्हतीं । अभिगम्य परं तत्त्वं, तेऽपि च स्युस्तथाविधाः ॥२७॥ आचार्येण नवाः श्राद्धाः, सुबुद्ध्याद्याः कृताः पुरा । सुहस्तिना समाख्याय, विस्तराज्जिनशासनम् ॥२८॥ परे तथाविधा ये स्युः, श्राद्धाद्यास्तेऽत्र सम्मताः । विस्ताररुचयो येन, बुद्धाः श्रुत्वा बहुश्रुतम् ॥२९॥ श्राद्धः पतिः सुभद्राया, यथाऽऽचर्य व्रतोच्चयं । क्रियया प्रतिबुद्धः सन्, प्राप्तः सद्दृष्टिमुत्तमाम् ॥३०॥ शान्तिं विवेकसहितां, संवरं च यथाऽबुधत् । चिलातिः स्वातिदत्तश्च, सूक्ष्मादिश्रवणात् पुनः ॥३१॥ एक इत्यादिवाक्यानां, विप्रो बुद्धस्तु सोमिलः । श्रुतेस्तद्वत्परे जीवाः, भवेयुः सूक्ष्मरुचयः ॥ ३२ ॥ गोविन्दवाचकाद्या ये, पराजित्य व्रतं ललुः । पश्चादधीत्य षट्काय-धर्मदर्शकमागमम् ॥३३॥ आर्हन्तं सत्यमाश्रित्य, ततः सम्यग्दृशोऽभवन् । तादृशा धर्मरुचयो, जीवा अत्र समीरिताः ॥३४॥ यथा काचादिसंसर्गात्, प्रकाशस्य भिदा भवेत् । द्रष्टॄणां ज्योतिषो नैव, स्थानाच्चात्र गुणे भिदा ॥ ३५ ॥ एते भेदा निसर्गाद्या, दशोक्ता रुचिभेदतः । प्रतिबन्धविनाशस्य वैचित्र्यं नात्र लेशतः ॥ ३६ ॥ प्रतिबन्धविनाशस्य, वैचित्र्यात् त्रिविधं मतं । क्षायिकादिविभेदं तु, सम्यक्त्वं श्रुतसागरे ॥ ३७ ॥ कारकाद्या मता भेदा, विशेषावश्यके श्रुते । अनुष्ठातृभिदैते स्युः, न परं तत्त्वभेदतः ॥ ३८ ॥ निश्चयव्यवहाराभ्यां, द्रव्यतो भावतोऽपि च । ये भेदास्ते ज्ञेयकर्तृ-वैशिष्ट्यमेक्ष्य सम्मताः ॥३९॥ इति सम्यक्त्वभेदविचारः ॥

## सम्यक्त्वभेदाः (२६)

अभिनम्य जिनेशाङ्घ्रिं, भवाब्धौ पोतवद्धितम् । सम्यक्त्वे निर्णयं वक्ष्ये, भेदेषु स्वान्यबुद्धये ॥१॥



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

यस्मिन् लब्धे भवोऽपार्ध-पुद्गलावर्त्ततोऽधिकः। नियतं न भवेत्तस्मै, को न श्लाघेत धीधनः? ॥२॥ अनन्तशोऽधिजग्मेऽयं, जीवश्चारित्रपालनम् ,। ज्ञानं च दशपूर्वान्तं, न च तीर्णो भवार्णवात् ॥ ३ ॥ व्यवहारगतान् जीवानाश्रित्योक्तो जिनागमे। ग्रैवेयकेषूपपातो, न तज्ज्ञानव्रते विना ॥ ४ ॥ निरुद्धा दुर्गतिर्दत्तं, ताभ्यां पौद्गलिकं सुखम्। यद्यपीह परं लब्धं, नर्ते सम्यक्त्वमव्ययम् ॥५॥ व्रतं ज्ञानं च किं नैषां, मा ब्रवीर्मोक्षसाधकम् ?। मोक्षबीजं तु सम्यक्त्वं, न वृक्षो बीजमन्तरा ॥६॥ आसन्नं ग्रन्थिदेशस्यानन्तकृत्वः समागताः। भवसिद्धिकजीवा न, परं सम्यक्त्वमाश्रिताः ॥७॥ पुरोऽभ्यर्णे समायातो-ऽनन्तशोपि नरो ध्रुवम्। लभते न नराधीशा-स्थानसंसत्सुखं पुनः ॥ ८ ॥ तस्याभूत्कर्मणो ह्रासो, ग्रन्थिकस्येभधूलिवत्। ततोऽप्याघक्षयप्राप्यं, नापत् सम्यक्त्वसन्निधिम् ॥ ९ ॥ अनूनोच्छलितात्मीय-वीर्यो ग्रन्थिविभेदनं। कृत्वा कश्चित् लभेतेदं सम्यक्त्वं मोक्षसौख्यदम् ॥१०॥ कोऽसौ ग्रन्थिः? कथं चायं, भिन्नो ज्ञायेत पण्डितैः ?। बह्वौ स्थितौ प्रहीणायां, किं सम्यक्त्वादेः प्रयोजनम् ? ॥ ११ ॥ ग्रन्थिः संयोजनान्त्यांश-स्तद्भेदो दुष्करः पुनः। सुखं पौद्गलिकं काङ्क्षन्नेतं यावत्समीयिवान् ॥ १२ ॥ न धर्मं नाप्यधर्मं स, विविक्ते मुग्धबुद्धिकः। पाषाणघोलयुक्त्या तु, बह्वबध्नन्नघं जरन् ॥१३॥ आयातोऽत्र परं नाग्रे, याति पौद्गलिके सुखे। दुःखबुद्धिं सौख्यबुद्धि-मनाधाय महोदये ॥१४॥ आत्मपुद्गलयोर्भेदं, यथावदधिगम्य यः। करोति लीनमात्मानं, सद्दृगात्मोद्भवे सुखे ॥१५॥ एवं च पुद्गलाशंसा-रहितोऽव्ययमीप्सुकः। ज्ञायते भिन्नग्रन्थिर्ना सच्छास्त्रं दृशमाश्रितैः ॥१६॥ लब्धे सम्यक्त्व एतस्मिन्, मन्यते नार्थकृत्पदम्। विहाय शासनं तेन, दीक्षयत्यात्मसंश्रितान् ॥ १७ ॥ यथाभ्रपटले क्षीणे, तेजोऽर्कस्य प्रसर्पति। कर्मौघे क्षपिते तद्वद्दर्शनादि त्रयं स्वतः ॥ १८ ॥ यथा तापोऽम्बुसंशोषं, विदधाति तथा त्रयम्। अग्रतः शोषयेत्कर्म-स्थितिं तस्माद् गुणावलिः ॥ १९ ॥ दर्शनस्येत्थमाप्तस्य, सप्तषष्टिमिता मताः। भेदा वृक्षे



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यथा स्कन्ध-पत्रशाखासुमानि च ॥ २० ॥ साधनानामानुकूल्ये, न वृक्षः स्वाङ्गवर्जितः। तथात्र दर्शनस्यामी, प्राप्यन्ते साधनाश्रयात् ॥२१॥ नियमात्तत्र श्रद्धान-चतुष्कं दर्शने भवेत्। लिङ्गत्रयं त्रिकं शुद्धे-र्लक्षणानां च पञ्चकम् ॥२२॥ स्थानानां भावनानां च, षट्कं शेषाः प्रसङ्गतः। दशधा विनयः पञ्च-दोषत्यागः प्रभावकाः ॥२३॥ अष्टाग्ध्या भूषणानि, पञ्च-सेव्यानि शुद्धये। आकारा यतनाः षट् षट्, स्युरापत्तिगतस्य च ॥२४॥ क्षायिके दर्शने क्षायो-पशमिकेऽपि तत्त्वतः। व्यवहारनिश्चयाभ्यां, स्युर्लब्धेऽमी गुणाकराः ॥ २५ ॥ यथा साधोर्यथायोग्यमेते साधनसम्भवे। तथा साधनसामग्र्या, अभावेऽणुव्रतेशिनाम् ॥२६॥ केचिदत्राभेदभाजः, केचिच्चितरथा पुनः। अङ्गाङ्गिनां मते जैने, भेदाभेदौ न बाधकौ ॥ २७ ॥ व्रतेषु भावनाः पञ्च, यथा न व्रतभेदकाः। तथा विज्ञेयमत्रापि, भेदबाहुल्यमात्मना ॥२८॥ स्कन्धेन शाखया पत्रैः, सुभैः शाख्युपलक्ष्यते। न च भिन्नानि तान्येभ्यस्तद्वदत्रापि भाव्यताम् ॥२९॥ इत्येवं भववार्धिपारगमने सामर्थ्यभाग् दर्शनं, शास्त्रोक्त्या-नुगुणं भवी हितपदप्राप्त्यै सदानन्ददं। भेदैः साधुरसोन्मितैरनुगतं सद्दृष्टिनां श्रेयस, आनन्दोदधिना व्यचार्यमृतवार्धावुत्सुकेनात्मना ॥३०॥ इति सम्यक्त्वभेदाः ॥

## सम्यक्त्वज्ञातानि (२७)

पल्यादीनि प्रसिद्धानि, प्रोच्यन्ते सूरिसत्तमैः। आद्यसम्यक्त्वलाभे तु, ज्ञातानि श्रुतसन्ततौ ॥१॥ सामायिकानि चत्वारि, निर्युक्तौ विवृतानि तु। आद्यं सम्यक्त्वमुक्तं तज्ज्ञातानां तत्र योजनम् ॥२॥ तत्त्वतस्तानि सर्वाणि, चतुर्ष्वपि मुनीश्वराः ॥ सामायिकेषु युञ्जन्ति, निर्युक्तौ यदुदीरितम् ॥ ३ ॥ सामान्येनान्तिमे भाग, आप्तौ ज्ञातानि सन्ति च। सामायिकानां तद्युक्तं, ननो (न तु) सर्वत्र योजनम् ॥ ४ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सामान्येन नव प्रोक्ता, दृष्टान्ताः सद्दृगुद्गमे । परं तेषु विशेषोऽयं, कथ्यमानस्तु युज्यते ॥ ५ ॥ सामान्येन हि जीवानां, चतुर्धाघक्षितौ स्थितिः । पल्यदृष्टान्तनिर्धार्या, सतां धर्मोद्यमस्ततः ॥ ६ ॥ लोकानुभावनियतिं, तथाभव्यत्वसाधितं । बलं जीवे क्वचिद्येनातिक्रमो नित्यसंस्थिते ॥ ७ ॥ किञ्च प्राचुर्यमाश्रित्य, दृष्टान्तः पल्य उच्यते । अन्यथा नो गुणावाप्तिः, कर्माणूनां च शून्यता ॥८॥ तत्त्वतो बहुबन्धित्वं सञ्ज्ञिपञ्चाक्षजन्मिनां । मिथ्यादृशां ततो हेयं, मिथ्यात्वं सर्वथा बुधैः ॥९॥ द्वितीयेऽत्र निगोदानां, दृष्टान्ते गिरितुल्यता । सरित्तुल्यो जगद्भावोऽश्मानः सद्दृग्युजोऽङ्गिनः ॥१०॥ क्रियाऽत्र घर्षणं साऽणुबन्धबहुनाशसङ्गिता । सद्दृग्योग्यत्वमाकारो, न सम्यक्त्वं क्रियां विना ॥११॥ ततोऽत्र योग्यतावाप्त्यै, या सामग्री त्रसादिका । आप्यते सोपमेया स्याद्यावत्करणमादिमम् ॥१२॥ ज्ञानायाङ्गिप्रवृत्तीनां, कीटिकाज्ञातमुत्तमं । परं तदाद्यकरणे, परे द्वे सत्प्रयत्नजे ॥१३॥ अभिप्रायात् क्रिया तस्याः, फलं न सा फलार्थिनी । अत्राङ्गिनां तपो बाल्याङ्कितं चित्रं प्रजायते ॥१४॥ सहेतैतादृशं कष्टं, मिथ्यादृक् तप आदिजं । येन सम्यग्दृशोऽनेके, मुक्तिमापुः सकामकाः ॥ १५ ॥ यथा पुरुषज्ञातेऽत्र, यत्नेऽपि चौरसङ्गमः । तथाङ्गिषु प्रवृत्तेषु, रागादीनां समुद्भवः ॥ १६ ॥ अनेके तेन सद्दृष्टिमप्राप्यागुः परां स्थितिं । परिपक्वस्थितिर्भव्योऽत्र कुर्यात् करणत्रयीम् ॥१७॥ सम्यक्त्वमीप्सवोऽनेके, जीवा मिथ्यात्वमोहिताः । स्वयमेव गता मोहे, परमां तु पुनः स्थितिम् ॥ १८ ॥ यथा ज्वरस्तनौ तापं, समग्रे कुरुते द्रुतं । तथानन्तानुबन्धित्वात्, कषाया अपि जन्मिनाम् ॥ १९ ॥ केषाञ्चिदेव जन्तूनां, निसर्गायां तु सद्दृशि । स्वयं नश्यति तापः स, परेषां गुरुवाक्यतः ॥२० ॥ परोपकारिणो वैद्याश्चिकित्सन्ते ज्वरार्दितान् । तथाऽत्र साधवो जीवान्, नयंते सत्पथेऽपरान् ॥२१॥ कोद्रवाणां यथारूपं, त्रिधा तद्वदिहाङ्गिनां । प्राप्तेऽन्तरे त्रिविधं च, मिथ्यात्वं



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

कुरुतेऽसुमान ॥ २२ ॥ यथा शुद्धं जलं जातं, परेषां शुद्धये भवेत् । तथा सम्यक्त्वमाप्यान्या-नङ्गिनो-मार्गमानयेत् । ॥२३॥ यद्यप्यभव्यतोऽनन्ता, बुद्ध्वा सिद्धिं गता नराः । तथापि ते तदुद्देशा न, भव्या नित्यं तदर्थिकाः ॥ २४ ॥ वस्त्रं यथोपभोगार्हं, चिरं कालं तथाङ्गिनां । सम्यक्त्वं येन तत्साद्यनन्तमपि प्रजायते ॥२५॥ पृथक् पृथग् मया भावः, पल्यादीनामुदीरितः । ज्ञातानामात्ममोदायोशन्तु सम्यग् बुधाः परम् ॥२६॥ इतिसम्यक्त्वज्ञातानि ॥

## क्षायिकभवसङ्ख्याविचारः (२८)

नत्वा मोहमहाराति-मानमर्दनमालिनं । जिनं निर्जरसन्तान-ततकीर्तिं जगत्प्रभुम् ॥१॥ सम्यक्त्वे क्षायिके लब्धे, शेषां भवभ्रमावलीं । शास्त्रदृष्ट्या विनिर्णीय, वच्मि स्वान्यावबुद्धये ॥ २ ॥ क्षीणे निश्शेषतो दृष्टि-मोहसप्तक आप्यते । दर्शनं क्षायिकं यत्तन्निर्मलं व्यभ्रचन्द्रवत् ॥३॥ न सम्यग्दर्शनाणूनामुदयाद्दर्शनाहतिः । चेत्तदैषां क्षये किं न सम्यग्दर्शननास्तिता ? ॥४॥ भेदं दर्शनदृष्ट्योर्ये, मन्यन्ते साणुदर्शनं । साच्छादं विगमे दृग्या, दृष्टिरिष्टा बुधैस्तकैः ॥५॥ निर्मलेऽभ्र यथा नार्क-तापो भुवि निहन्यते । अभ्रापगमभावे तु, स प्राचुर्येण भासते ॥६॥ तथाऽत्र दर्शनाणूना-मुदयात् शङ्कितादयः । तेषां क्षये विलीयेत, शङ्काकाङ्क्षादि दूषणम् ॥७॥ क्षायिके दर्शने लब्धे, नायुर्बद्धं तदा नरः । समाप्य क्षपकश्रेणिं, लभते पदमव्ययम् ॥ ८ ॥ बद्धायुर्विरमेतात्र, स्वर्गे श्वभ्रेऽमितायुषि । नरे तिरश्चि यात्येष, नापरत्रेति शास्त्रगीः ॥९॥ अनन्तरे भवे स्वर्गी, नारको वा शिवं व्रजेत् । अमितायुर्नरस्तिर्यग् , देवीभूय पुमान् पुनः ॥ १० ॥ जातो महोदयं याया-देवं क्षायिकदर्शने । लब्धे भवानां त्रितयं, चतुष्कं वावशिष्यते ॥ ११ ॥ कथं कृष्णनरेन्द्रस्य क्षायिके दर्शने स्थितं । भवपञ्चक-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मन्यच्च, प्रान्त्ये दुष्प्रसभेऽपि किम् ॥१२॥ नासौ यदमितायुष्को, न चानन्तरजन्मनि। शिवभाक्, क्षायिकं चास्य, सम्यक्त्वमुपवर्ण्यते ॥१३॥ श्रीप्रभस्यापि गणिनो, निशीथे महति श्रुते। दुष्षमामध्यमे भागे, सम्यक्त्वं क्षायिकं मतम् ॥१४॥ सत्यं त्रयो नैकजन्म-भाविमोक्षाः परं त्वमी। दधतेऽव्याहतं शुद्धं, दर्शनं क्षायिका मताः ॥१५॥ क्षायोपशमिके शुद्धे, व्यपदेशः कृतो भवेत्। क्षायिकस्यान्यथा किं नु, भवादिव्यत्ययो भवेत्? ॥१६॥ विनान्त्यजन्म सङ्ख्याब्दायुष्कस्तज्जन्म चान्तरा। सार्वदिष्टं विनाऽन्यस्मिन्न च स्यात्क्षायिकार्जकः ॥१७॥ किं च कृष्णेन रामाय, प्रेतेनापि रिपोः शुचे। दर्शयित्वा निजां मूर्तिं, सृष्टिकृत्त्वादि चोदितम् ॥१८॥ रामोपि तच्चकाराशु, भ्रातृस्नेहवशंवदः। स्नेहः सन्मार्गपाथोऽर्को, मिथ्यात्वाम्बुधिचन्द्रमाः ॥१९॥ कार्मग्रन्थिकसूरीणां, तथा सिद्धान्तदेशिनां। आचार्याणां मतं नात्र भवादिनियमे पृथक् ॥२०॥ तदेषा मतिरस्माकं, क्षायोपशमदर्शने। शुद्धे, श्रुतधरैर्न्यस्त, आरोपः क्षायिकस्य तु ॥२१॥ अन्यैस्त्वितरथा ख्यातं, मान्यं सत्यान्वितं मम। अत्रार्थेऽतीन्द्रिये यन्न, प्रमाणं मुग्धकल्पना ॥ २२ ॥ श्रोतॄणां मा विपर्यासः, शङ्कया भूज्जिनागमे। परस्परविरुद्धार्थ-माकर्ण्य मतिमोहतः ॥ २३ ॥ ततो मनीषयाऽस्माभिः, शास्त्रीयोक्तिर्दृढीकृता। अन्यथा वस्तुतत्त्वं चेन्, मिथ्यादुष्कृतमस्तु नः ॥ २४ ॥ सर्वे सम्यक्त्ववन्तः स्युः, श्रोतारः श्रीजिनागमे। याचनां प्रविधायेति, विरमे श्लोकदृम्भणात् ॥ २५ ॥ इत्थं क्षायिकदर्शनाप्तिरितरग्रन्थोदिता केशवा-द्येषु प्राप न सङ्गतिं न च विधिस्तत्रौचितीमञ्चति। सम्यक्त्वस्य तथाविधस्य गदितः शास्त्रोक्तयेऽतस्त्विमं, कृत्वा ग्रन्थमणुं समाधिविधये याचेऽमृतानन्दिताम् ॥२६॥ इति क्षायिकभवसङ्ख्याविचारः ॥

## शमनिर्णयः (२९)

नत्वा वीरं जगद्वन्द्यं, मोक्षमार्गस्य देशकं। शमस्वरूपशङ्कायां, निर्णयं वच्मि वाङ्मयात् ॥१॥ चारि-



P.P. Ac. Gunratnasuri M.S.  Jun Gun Aaradhak Trust

त्रेण विहीनानां, महोदयसुखं नहि। न च तज्ज्ञानहीनानां, ज्ञानं सम्यग्दृशां ननु ॥ २ ॥ सम्यग्दृक् च शुभो जीव–परिणामस्तु तत्त्वतः। स च मिथ्यात्वकर्माणु–शमनादेः शमादिभिद् ॥३॥ ज्ञायते स्वान्यगोऽप्येष, लिङ्गै-रुपशमादिभिः। तेषामुत्पत्तिराप्तैनो–दिता पश्चानुपूर्वीतः ॥ ४ ॥ न्यासस्तेषां यथामुख्य–मित्यूचे हरिभद्रराट्। विंशिकायां, यतो नैवा–नुकम्पायुग् हि नास्तिकः ॥५॥ जीवं भवान्तरं पापं, दुःखं च मनुते यदा। तदाऽऽ-र्त्तेष्वनुकम्पेत नास्तिकस्तु ततो बहिः ॥६॥ युक्तोऽनुकम्पया सत्त्वो, बिभेति दुःखसञ्चयात्। भवं च तन्मयं ज्ञात्वा, निर्विन्देन्न कथं भवात् ? ॥७॥ निर्विण्णश्च भवाज्जन्तु–रपवर्गं विमार्गयेत्। परा संविग्नता चैवं, तदर्थी श्रयते शमम् ॥ ८ ॥ चिन्तयित्वेदमाप्तोक्तं, धार्यं हृदयगं सदा। येन मिथ्योक्तिगरलं, न जातु दुःखदं भवेत् ॥९॥ अत्र केचिदनन्तानु–बन्धिनां शमनं शमं। लिङ्गमाद्यं जगुर्यस्मान्नाभिस्त्वेमान् यतः सुदृक् ॥ १० ॥ विरु-द्धकारणाभावो, हिनास्त्येव विरोधिनं। जन्मव्याध्यादिरहितं, यथा सिद्धे सुखव्रजम् ॥ ११ ॥ अत्रान्ये प्रवद-न्त्येवं, चतुर्विंशतिसद्युतः। शमं पुमाननन्तानु–बन्धिनां कुरुते न किम् ? ॥१२॥ किञ्च सास्वादनो जन्तु–राद्यो दयवान्न हि ?। अन्वयव्यतिरेकाभ्यां, न तत् तद् गमकं भवेत् ॥ १३ ॥ किञ्च चारित्रमोहस्य, भिदोऽनन्तानु-बन्धिनः। तन्न तद्गमकं तेषां, शमनं जातु सम्भवेत् ॥ १४ ॥ लिङ्गं स्याद् व्यवहारार्थं, शमश्च न तथा भवेत्। अनन्तानां तथासौ चेत्, किं नान्येषां परेषु सः ? ॥१५॥ न चान्येभ्यो विशेषत्व–मनन्तानां समक्षतः। पक्षा-दिस्थितिमत्त्वं हि, न लिङ्गं स्थूरनीतितः ॥१६॥ अन्यथाऽविरताः श्राद्धाः, तिर्यग्नरभवायुषोः। भवेयुर्बन्ध-कास्तस्मा–द्धेतुर्नास्य शमो भवेत् ॥ १७ ॥ सम्यक्त्वस्याग्रहाभावो, लिङ्गं स च श्रुतोदितं। स्पष्टमाचरतां तस्य, विरुद्धं सर्वथोज्झताम् ॥१८॥ अत्र मेधाविनः केचित्, कृतशास्त्रपरिश्रमाः। जगुर्य आग्रहाभावः स कथं सद्दृशां भवेत् ॥१९॥ कथं च किंकृतो वा स्या–दाग्रहोऽसत्यवस्तुनि। मिथ्यात्वाच्चेत् न किं स्यात्स, सर्वेष्वेकेन्द्रिया-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दिषु ? ॥ २० ॥ चतुर्विंशतिसत्ताको, नाभव्यो नामनुष्यकः (समस्तखः)। ततोऽनन्तानुबन्धिनां, शमः सम्यक्त्वहेतुकः ॥ २१ ॥ एतावता न सम्यक्त्व-हेतुता शमभावने। सम्यक्त्वप्राप्तये यस्मात्, करणत्रितयं मतम् ॥२२॥ चारित्रमोहनीयस्यैते, भेदाश्चेत् तदपागमे। किं चारित्रं भवेत् साक्षाद्, न चेदपगमात् किमु ? ॥२३॥ सर्वशास्त्रेषु समानां, क्षयादेः क्षायिकादिकं। सम्यक्त्वं सम्मतं तच्च, विरुध्येत कथं नहि ? ॥२४॥ आद्यादिषु गुणस्थानेष्वव्रतं न भवेद् ध्रुवं। पाते एवौपशमिकादास्वादस्तत्र कारणम् ॥ २५॥ नापरं तेभ्य इत्यत्र, शम एषां तु लिङ्गता ॥ पक्षादिनियमश्चैन्न, कषायाणां मतो भवेत्। पाक्षिकादिप्रतिक्रान्ति-नियमोऽपि वृथा भवेत् ॥२६॥ तत्तत्कषायगे चित्ते, भवेत्तेषां तथा गतिः। सद्दृशामत एवास्ति, नानुबद्धाऽशुभा मतिः ॥२७॥ कार्मग्रन्थिकसूरीणां, मते सैद्धान्तिकेऽपि च। घातकाः सद्दृशोऽनन्ता-नुबन्धिन उदीरिताः ॥२८॥ तदेषां शमनं सद्दृग्-भावस्य गमकं भवेत्। चेत्तदा न विरोधोऽस्ति, प्राप्तिरस्यास्तदुच्छिदः ॥२९॥ प्रीतिस्तत्त्वेषु शान्त्यैषां, प्रतीतिस्तत्त्वगा पुनः। मिथ्यात्वादिशमाच्चेत्स्यात् स्याद् दृक् चारित्रमोहभिद् ॥३०॥ गुणौ वैराग्यसंवेगौ, सम्यक्त्वस्य सहानुगौ। किं न चारित्ररूपे स्तोऽविवक्षाऽसञ्ज्ञिचित्तवत् ॥३१॥ विज्ञा अन्ये त्वाहुरत्र, शुश्रूषा धर्मरागिता। वैयावृत्त्यं गुरौ देवे, श्रावकत्वनिबन्धनम् ॥३२॥ केचित्तु कोविदा आहु-र्वैतृष्ण्यं विषये पुनः, न दृग्मोहोऽरुचिर्धर्मे, क्रोधकण्डूश्च सद्दृशः ॥३३॥ परे दाक्षिण्यमौदार्यं, पापकुत्साऽमला मतिः। लोकप्रियत्वमेतानि, लिङ्गान्याहुर्विचक्षणाः ॥३४॥ एवं सम्यक्त्वलिङ्गेषु दृष्ट्वा चित्रमतानि न। व्यामोहो विदुषा कार्यो, यतः सर्वाणि सन्मतेः ॥ ३५ ॥ यतः सम्यग्दृशां देवे, गुरौ धर्मे च न क्वचिद्। क्रोधादेः सम्भवस्तेन, शमो लक्षणमुच्यते ॥ ३६ ॥ सामान्यमतिजीवाना-मेतत्स्यादनघं यदि। तदाऽमीषां तु सम्यक्त्वं, यथार्हं लक्ष्यते बुधैः ॥३७॥ गीतार्था यतयो ये तु, धर्मशास्त्रप्ररूपकाः। तेषामनाग्रहो लिङ्गं, नान्तरा तत्सुदृष्टिता ॥ ३८ ॥ क्रियाभेदेऽपि नैतेषां, कदाग्रह-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

समुद्भवः । चेन्न सिद्धान्तबाधा स्यात्, तेषां तस्यापि लिङ्गता ॥३९॥ शास्त्रोत्तीर्णां क्रियां कुर्वन्, स्वयं शास्त्राश्रितां पुनः । निन्दन् कदाग्रहग्रस्तो, मिथ्यात्वी निश्चयान्न किं ? ॥४०॥ व्रतार्थी श्रावको धर्मं, श्रयन् लिङ्गैर्भवेद्युतः । शुश्रूषादिभिरभ्यर्च्यैरित्येषां लिङ्गताऽनघा ॥ ॥४१॥ श्रुतधर्मं श्रयन् श्राद्धश्चेन्न वैतृष्ण्यभाग्भवेत् । भवेन्मुग्धो वृषेऽनिच्छः, क्रुद्धश्चासौ न शुद्धदृक् ॥४२॥ ततः सिद्धमिदं हन्त, श्रोतारं शास्त्रवर्त्मनः । समाश्रित्य वितृष्णत्व–मुखं लिङ्गं यथोदितम् ॥४३॥ ये च दानादिधर्मेषु, प्रवर्त्तन्ते नरोत्तमाः । तेषामौदार्यदाक्षिण्य–मुखं लिङ्गं सुदृग्भवम् ॥४४॥ एवं लिङ्गानि पञ्चापि, सम्यक्त्वगमकानीति । न लेशतो विरोधोऽस्ति, स्याद्वादनयमिच्छताम् ॥४५॥ कश्चिदेकप्रकारं तु, निश्राय निश्चयं वदन् । निराक्रियेत विद्वद्भिर्नैकान्तो यत् श्रुतानुगः ॥४६॥ व्यवहार्याणि लिङ्गानि, नैकान्ताद् वीतरागता । सर्वज्ञतायाश्चिह्नं यन्, नाध्यक्षोहथा तु लिङ्गतः ॥४७॥ वीतरागत्वसाधुत्व–श्राद्धत्वानां च कानि वै । सञ्ज्वलनप्रत्याख्याना–ऽप्रत्याख्यानशमान् विना ॥४८॥ लिङ्गानि व्यवहारेण, यतोऽथाख्यातमुख्यकाः । गुणाः प्रादुर्भवेयुस्तदत्रापीदं निभाल्यताम् ॥ ४९ ॥ शिवार्थी निश्शेषो यतिगृहिगणः सन्मतरुचिः, प्रयत्नं कुर्वाणो निजहितकृते सद्दृशि सदा । यतेतात्मार्थी सन् जिनपगदितं लक्षणचयं, शमाद्यं बुद्ध्वा यत् शिवपदकरी सैव सुधियाम् ॥५०॥ इतिशमनिर्णयः ॥

## प्रतिमापूजाद्वात्रिंशिका (३०)

नत्वा नम्रेन्द्रराजालिं, जिनं सत्तत्त्वदेशकं । तत्पूजायामघोन्मादं, चिकित्सामि यथागमम् ॥ १ ॥ श्रीमज्जिनेन्द्रमूर्तीना–मर्चने यो वदेदघं । प्रष्टव्यः स पुमानेवं, कथं बन्धोऽत्र पाप्मनः ? ॥ २ ॥ मिथ्यात्वमव्रतं योगाः, कषायाश्च यतांऽहसः । बन्धस्य हेतवस्तत्र, किमर्चायां विभोरिह ? ॥ ३ ॥ जिनेन्द्रे देवताबुद्धेर्न-



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

मिथ्यात्वं जिनार्चने । न चोद्यं स्थापनायां न, गुणास्तत्तत्र किं न तत् ? ॥ ४ ॥ यथा नाम्नि गुणाभावे, नमोऽर्हद्भ्य इतीरणे । गुणाभावगताः नम्यास्तथात्र करणौ न किम् ? ॥५॥ किञ्चान्ययूथिकार्चानां, त्यागोऽर्चायाः कृतो न वा ? । कृतश्चेत् किं न तद्देव-बुद्धया स्यान्न तदन्यथा ॥६॥ शास्त्रेषु बहुषु प्रोक्ताः, सप्रभावा हि मूर्त्तयः । अन्ययूथिकदेवानां, सत्यं तच्चेन्न किं गुणः ? ॥७॥ सम्यक्त्वे त्याज्यता सूत्रे, चैत्यानां परतीर्थिकैः । स्वीकृतानां जिनानां तन् , न बिम्बे जिनधीर्वृथा ॥८॥ श्रीऔपपातिके सूत्रे, तदतिदेशयुतेषु च । सर्वत्र वर्णने पुर्या, बाहुल्यं चैत्यगोचरम् ॥९॥ अत एव गता यस्मा-च्चारणाश्चैत्यवन्दकाः । तत्रैत्य वन्दनं कुर्युश्चैत्यानामिति गीयते ॥१०॥ उत्सर्गे साधवस्तासां, मूर्त्तीनां वन्दनादिगं । फलमाप्तुं पठन्ति स्राक्, सूत्रमावश्यकोदितम् ॥११॥ अव्रतं च न तद्धेतुः, कषायोदयजं हि तत् । अन्यथा मुनयः किं स्वगुरोरभिमुखं ययुः ? ॥१२॥ कथं महर्धिकाः सर्व-सामग्र्या जिनवन्दकाः । निर्ययुः ? किञ्च वर्षासु, व्याख्यानश्रुतिरिष्यते ॥ १३ ॥ तदारम्भात्प्रमादाज्ञा-दनिवृत्तिर्भवेत्तकत् । न चात्र तत्कथं बन्धो-ऽर्हसां सम्यग्विचिन्त्यताम् ॥ १४ ॥ कषायाश्च न पूजाया, हेतवो येन बन्धनं । पापानामत्र सम्भाव्यं, योगेभ्यस्त्वल्पकालगः ॥ १५ ॥ यथा साधुर्नदीं क्राम्यन्, प्रमादाद्बन्धभाजनं । तथात्र तेन देवानां, पूजयार्हन्त्यमर्हति ॥१६॥ न चोद्यं सर्वथा पापा – भावे किं मुनयो नहि । आद्रियन्तेऽर्हतां द्रव्य – पूजायां मोक्षकाङ्क्षिणः ? ॥ १७ ॥ तत्र तेषामनाचारो, नैव पापनिबन्धनः । अन्यथा किं नदीः क्राम्येत् ; सर्वपापनिवारकः ? ॥ १८ ॥ किन्तु हेतुरुपादेयो, यावत्साध्यं न सिद्धिभाग् । साध्यसिद्धौ न मूर्खोऽपि, साधनं प्रति सोद्यमः ॥ १९ ॥ भावस्तवो हि साधूनां, सिद्धो दीक्षादिनाद् ध्रुवं । नैषां ततस्तद्धेतोर्हि, द्रव्यस्तवस्य सेवनम् ॥२०॥ अत एवोदिता हेम-सूरिभिर्योगवाङ्मये । निरवद्याऽर्चना श्राद्धै-र्हेया सामायिकादृतौ ॥२१॥ न सपापाऽर्हतां पूजा ततः सामायिका-



P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

दृतौ । तस्याः प्रसङ्गसम्प्राप्ति-रन्यथा ध्यान्ध्यजृम्भितम् ॥ २२ ॥ हारिभद्रं वचः स्वस्ति-करमावश्यके स्फुटं । पूर्वपापेन सहितं, सर्वं पूजा दहेदघम् ॥२३॥ अर्थदण्डेऽपि नाङ्केऽतो, द्वितीये ह्यूचिवान् जिनः । जिनपूजाभवां हिंसां, यथा नागादिपूजने ॥ २४ ॥ अष्टकेऽपि स्वरूपेण, साङ्कीर्ण्यं पुष्पपूजने । न्यगादि हरिभद्रेणानूदितं च जिनेश्वरैः ॥२५॥ स्वल्पस्याप्येनसस्तत्र, चेद्भवेत् सम्भवस्तदा । तन्मुनीन्द्रैर्न कार्यं स्यान्नानुमोद्यं च कर्हिचित् ॥२६॥ उदाहृतं च यत्पूज्यैरल्पाघे बहुनिर्जरे । कार्येऽर्हत्पूजनं तत्र स, मृषाऽदत्तादिहेतुता ॥२७॥ अत एवोदिता तत्र, जिनेन्द्रपक्षपातिता । अर्हद्भक्त्या कृतौ त्वस्य, विषयो नात्र युज्यते ॥२८॥ अशुद्धैरन्नपानाद्यैर्ग्लानो-पचरणे यथा । तथात्र ज्ञापितो किं स्यात्, शुद्धैरिव नयार्चने ॥ २९ ॥ साधूनामर्हतां भक्तेः, शंसायां यः शुभोदयः । सोऽपि पापविनाभूतौ, पूजायां नान्यथा क्वचित् ॥३०॥ न ह्याधाकर्मणो दान-मल्पपापं मुनिः क्वचित् । प्रशंसेदनुमन्येच्च, सुबहुनिर्जरान्वितम् ॥३१॥ तदेवं जिनपूजायां, द्रव्यतोऽपि न पाप्मनः । बन्धस्ततः सदा श्राद्धास्तां कुर्वन्तु यथागमम् ॥३२॥ सदा पूजा भव्यैर्जिनगुणगणालीढहृदयैः, शिवाप्त्यै स्वान्येषां सतत-सुदृगाद्यर्थमनिशम् । विधेया चेत्सिद्धौ परमसुखमय्यां यदि मनो, जिनोक्तं संस्मृत्योदितमिदमनन्तार्थकलि-तम् ॥३३॥ इतिप्रतिमापूजाद्वात्रिंशिका ॥

## प्रतिमापूजा (३१)

अर्चा जिनेश्वरार्चानां, कथं सम्यक्त्ववर्धिनी ?। यतोऽध्यक्षं समीक्ष्यन्ते, बहूव्यो जीवविराधनाः ॥१॥ न राज्यदेशग्रामेश-त्वेनार्हत्पूजनं मतं । त्यक्ताष्टादशदोषत्वं, हेतुरव्ययदेशनम् ॥२॥ ततस्त्यागस्य सन्मानो-ऽर्हदर्चानां समर्चने । अप्यष्टभिः प्रातिहार्यैरानर्चुरमरा अपि ॥ ३ ॥ च्यवनादिषु सत्कल्याणकेषु सुरराजयः ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जीवतोऽर्हत आनर्चुः, समवसरणादिभिः ॥४॥ गुणानामसतां प्राप्तिः, प्राप्तानां चाभिवर्धनं । गुणश्लाघाऽर्चना-
साध्यमर्हदर्चार्चनं ततः ॥५॥ प्रत्याख्येयो गृहस्थानां, त्रसानां वध इष्यते । नातो हत्वा त्रसानर्चा, पशुभि-
र्यज्ञवन्मता ॥ ६ ॥ ये च श्राद्धा न कुर्वन्ति, स्थिराणां वधमात्मना । कुर्युर्भावस्तवं ह्येकं, यथा सप्तमवाहिनः
॥७॥ सर्वस्थिराङ्गिहिंसां ये, कुर्युः स्वार्थान्धिता नराः । हिंसाधीः पूजने तेषां, लोपकोद्भ्रमितात्मनाम् ॥८॥
यथा गुरूणां नत्याद्याः, श्राद्धैर्वर्षति वारिदे । क्रियन्ते सन्मुखं गत्वा, लाभाय गुणमानिभिः ॥९॥ त्रसेतरा-
ङ्गिरक्षायै, वस्त्रपात्रप्रमार्जनं । हृद्याधाय दयां तच्च, साधुकृत्यं गुणान्वितम् ॥ १० ॥ दयानाम्ना यदा श्राद्धो,
नाभ्येति गुरुसन्मुखं । विराधकस्तदा तद्वज्जिनार्चायां दयाब्रुवः ॥११॥ अशुद्धमपि भक्तं चेदास्तिकः साधवे-
ऽर्पयेत् । तत्र चेन्निर्जरा बह्वी, किं नार्चायां जिनेशितुः ? ॥१२॥ जिनो निष्किञ्चनश्छत्रा–दिषु चेद्रागहानितः।
कुतो भोगित्वमायात–मजीवप्रतिमार्चने? ॥१३॥ जिनकर्मप्रभावेणार्च्यते देवैर्जिनः सदा । सम्यक्त्वोत्थं च तत्कर्म,
तच्च कर्मक्षयादिजम् ॥१४॥ वन्दनाद्यर्थमुत्सर्गोऽर्हदर्चानां मुनेरपि । बोधिमोक्षफलः किं न ?, श्रावके तर्हि
का कथा ? ॥१५॥ महितेति पदं स्तुत्यै, महनं किमु आश्रवे ? । सम्यग्दृष्टेर्गुणो नैवाश्रवस्तुत्या कथञ्चन ॥१६॥
अपेक्ष्य स्थापनां सामा–यिके 'भंते' त्ति शब्दनं । नतौ कायादिस्पर्शस्यार्चायां का विमतिस्तदा ? ॥ १७ ॥
अवग्रहो गुरोर्यार्च्यो, वन्दनादौ मुने ! त्वया । विनार्चां कस्य मार्ग्येतावग्रहस्तत्स्थिराऽऽकृतिः ॥१८॥ हिंसा धर्माय
नैषा यत् , तारतम्यं न हिंसया । धर्मस्य, वहुमानेन धर्मस्यास्ति विशेषिता ॥ १९ ॥ याज्ञिकानां यथा
सङ्ख्या, वृद्धिर्धर्मस्य वृद्धये । अजादीनां तथा नात्र, किन्तु भक्त्यतिशायिता ॥२०॥ दूरमाराद् गुरोर्यातु,
सन्मुखं लाभकृत्पुनः । गन्तुरात्मगतो भावस्तथाऽत्राकृतिपूजने ॥ २१ ॥ यथा हिंसाऽप्रमत्तस्य, निर्जरैकफला
मता । सम्यक्त्वादिगुणोन्नत्यै, तथाऽर्चायां शुचेर्हृदः ॥२२॥ स्वरूपेणैव हिंसा चेद्, भवभावनिबन्धनं । नदी-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सिद्धादयः किं स्युरप्रासुकजले स्थिताः ? ॥२३॥ नद्युत्तारे सुसाधूनां, न प्रतिज्ञाविराधनं । त्राणं चेद्यतना सा किं, नष्टा पूजाक्षणेऽर्हताम् ? ॥२४॥ अर्हतामर्चनीयाऽस्ति, निक्षेपाणां चतुष्टयी । परमेष्ठिनमस्कारोऽतोऽर्हद्भ्यो नम आदृतिः ॥ २५ ॥ प्रातिहार्याष्टकोपेतो–ऽतिशयैश्चतुस्त्रिंशता । पञ्चकल्याणकमहै,–र्युक्तोऽर्हन्नान्यथाविधः ॥२६॥ अर्हन्नामस्मृतिर्बिम्बात्, सिद्धत्वादस्ति द्रव्यता । कर्तुर्भावोऽस्ति तत्सिद्धयैन्निक्षेपाणां चतुष्टयी ॥२७॥ स्थाप्योऽत्रार्हन्न चेन्न्यक्षं, कथं नैपातिकं नमः ? । न चेत्पूजार्थता का नु, निपातक्रिययोर्भिदा ॥२८॥ धर्मे यस्य मनो नित्यं, तं महन्त्यमरा यदि । धर्माकरं जिनं नित्यं, किं न देवा महन्ति नु ? ॥२९॥ तप्तायोगोलकल्पानां, सावद्याश्चेत् समाः क्रियाः । तर्ह्यर्चने वन्दने च, का भिदा विदुषां भवेत् ? ॥३०॥ अव्रतेषु ध्रुवो हिंसादोषश्चेत्किम्वगारिणां । हिंसाभीतेर्निरुध्यन्ते, जिनेन्द्रार्चार्चनादयः ॥ ३१ ॥ योगः पङ्गुरघागत्यां, चेन्नार्चा सकषायिणी । मनसा मोक्षमाधाय, सा स्यान्मुक्तात्मनां शुभा ॥ ३२ ॥ इत्येवं प्रतिमारिपोर्हितकृते पद्यैरगर्हैः कृता, द्वात्रिंशद्गणितैरिहार्हतमुदे श्रीसूर्यपुरे श्रुते । आनन्दादिगणेशिना स्थितिमता वीरं जिनं स्थापितुं, सत्ताम्रागमन्दिरे नवकृते ऋद्धैः परैः श्रावकैः ॥३३॥ इति प्रतिमापूजा ॥

## प्रतिमापूजासिद्धिः (३२)

गणिनेड्यं जिनेशार्कं, ध्वस्तमोहान्धतामसं । शीतांशुमकुरङ्काढ्यं, विरहे सुखदं स्तुवे ॥१॥ ये स्थापनां न मन्यन्ते, सूत्रोक्तामपि साहसात् । वदन्ति च न कल्याण–मजीवात्प्राप्यते कथम् ? ॥ २ ॥ पृच्छामि ते कथं साधो–र्मृतस्य कुरुसे महः ? । कथं चाजीवतासाम्ये, गुरोरासनवर्जनम् ? ॥३॥ अजीवा निहताः काल–सौकरेणावटे यके । महीषाः दुर्गतेस्ते तु, कारकाः किं त्वयेप्सिताः ? ॥४॥ कथं च वन्द्यते काष्ठा, प्रत्यहं तीर्थकृच्छ्रिता ?



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कथं न वनितालेख्यान्वितायां वसतौ स्थितिः ? ॥ ५ ॥ कथं वा यमिनां मूर्त्तिः, क्रियते पत्रगामिनी । यन्त्रेण वन्द्यते किञ्च, प्रत्यहं मार्गसंश्रितैः ॥६॥ न चानाचार एषोऽस्ति, चारित्रस्य बकुशिता । स्याद्यतः किन्तु सम्यक्त्व–हीनता श्रद्धया विना ॥७॥ न चाजीवस्य हिंसापि, क्रियते बन्धहेतुतः । अत एव न खण्डाश्वगत्रादे-र्भक्षणक्रिया ॥८॥ ख्यातं च ख्यातसुश्लोकैः, स्थानाङ्गेऽजीवहिंसनं । दोषकृद्द्विविधां हिंसां, दर्श्यमानै-र्गणोत्तमैः ॥९॥ नामापि जीवरूपं नो, तत्स्मृत्यास्तर्हि किं फलं ? । भावे न चेन्न सो वास्ति, किं काको वाऽस्यभक्षकः ॥ १० ॥ भावतीर्थङ्करो लक्ष्य, आकृतेर्यदि सा प्रमा । किं प्रतिच्छन्दसंत्यागः, कायोत्सर्गे न वक्तृता ॥११॥ द्वादश स्युः पर्षदो याः, सांमुखीनो जिनस्तदा । सर्वासामाकृतिभ्यस्तन्न भावादाकृतेर्भिदा ॥१२॥ न लेप्यगोः पयःप्रादुर्भावश्चेत्किं नु नामतः ? । अज्ञाताया दवीयस्याः, किं तर्हि भावतो भवेत् ? ॥१३॥ भवान्तरे जिनाकार–ज्ञप्तिः स्याद्बिम्बसंस्कृतेः । अन्यथाऽसंस्कृतेर्भावगोः पार्श्वे मृतिवन्न किम् ? ॥१४॥ मिथ्यादृशां परित्याज्या, न वाऽर्चास्तंर्मुखे कथं । अर्चा नार्च्या अजीवत्वादन्तिमेऽनर्थदण्डिता ॥ १५ ॥ द्वितीयेऽङ्गे श्रुतस्कन्धे, द्वितीये नागभूतयोः । कृतेऽर्चायाः कृता हिंसाऽनर्थदण्डो जिनैर्मतः ॥१६॥ यदि च श्रीजिनेशानां, प्रतिमाकरणे वधः । स्यादनिष्टः स तत्रैव, निर्दिशेज्जिनपुङ्गवः ॥१७॥ न च कुत्रापि दण्डेऽसौ, न्यगादि पुरुषोत्तमैः । तन्नैषामर्चया हिंसा, फलोद्भेदाद् भवाब्धिदा ॥१८॥ चतुर्विधान् समान्भावा-ञ्श्रद्दधानः सुदृष्टिकः । चेदाकारं न मन्यन्ते, कथं स्युस्ते नु तादृशाः ? ॥१९॥ आवश्यकं प्रकुर्वाणा, धूरीणं कं वदन्त्वमी । भदन्तशब्दमाख्यान्तो, विहरन्तं जिनं यदि ॥२०॥ न स साक्षान्न चामुष्य, तीर्थे यूयं यतोऽन्तिमं । शासनं सप्रतिक्रान्ति, पञ्चव्रतसमन्वितम् ॥२१॥॥ यदि च न प्रतिमाः स्यु–र्वाञ्छापूर्त्यै महार्हिना । किं दूरस्थे कल्पितेऽस्मिन्मनसि क्वचिदीक्षिता ? ॥ २२॥ तथा चाऽजां निनीषोर्न, किं क्रमेलकवेशनं ? । भवेद्यत्संवरे



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मिथ्या-वाद आवश्यके मुखे ॥२३॥ शिष्याणां गुरवो वाच्या-स्तेषां तेन कके पुनः। ध्यान्ध्यापत्तिर्विनाकारा-
ङ्गीकारं नैव शाम्यति ॥२४॥ किञ्च वन्दनकेऽपि स्यात्संबुद्ध्यामन्त्र्यमाकृतेः। विना सा यद्विना साक्षात्कारं नार्हति
कुत्रचित् ॥२५॥ मह्यं त्वमनुजानीहि, मितावग्रहमित्यपि। कथं शिष्यस्य शोभेत, वाचा यद्याकृतिर्नहि ? ॥२६॥
गुरुं स्वकं समुद्दिश्य, चेन्न सर्वे तथा मताः। स्युस्तथापि गुरोरुक्तिः, न कथं वितथा भवेत् ? ॥२७॥
प्रमाणयुक्तो नैवास्ति, विहरज्जिनसङ्गतः। अवग्रहः, क्व याच्ञा क्व, प्राप्तिः स्वप्नेपि स्यात्किमु ? ॥२८॥
अधःकायं प्रतिक्षाम्यन्, कथं स्पर्शो विधीयते ?। कथं च स्याद् गुरोः क्लान्ति-र्येन तत्क्षमणं श्रुते ॥२९॥
तथा च यदि नापेया, ह्यजीवत्वात् प्रतिक्रिया। नावश्यकं विधातव्यं, तथाचेद्वितथोदितिः ॥ ३० ॥
गर्हा पि स्यात्कथं चार्वी, यतः सा गुरुसाक्षिकी। नाङ्गीकाराद्विनाकृत्या, तत्तथेति विमृश्यताम् ॥३१॥
कक्षीकाराद्विना मूर्त्तेः, कं पृच्छन्ति सुहृत्तमाः। इच्छया सन्दिशत भो, ईर्यायाः प्रतिक्रम्यते ॥ ३२ ॥
कं चोशन्ति प्रतिक्रान्तु-मिच्छा मेऽस्तीति साधवः। प्रत्याख्यानं कथं साधोः, स्यात्ससाक्षिकमार्हतम् ?
॥३३॥ प्रतिक्रमणकाले किं, स्थाप्यते इति संस्मृतं। सूत्रेऽनुयोगसङ्ज्ञे तद्, ध्रुवं स्थाप्या प्रतिक्रिया ॥३४॥
अक्षो वराटको वेत्यादिरूपेण सूरीश्वरैः। सद्भावेतरभेदेन, स्थापनैवं तु युज्यते ॥३५॥ दशका-
लिकशास्त्रार्थगङ्गाहिमवदाकृतिः। श्रीमान् शय्यम्भवः प्रापन्न-किं बिम्बात्सुदृष्टिताम् ? ॥३६॥ आर्द्राय प्रैषि
जिनराड्-बिम्बं यवनदेशिने। धीसखेनाभयेनार्हं, दृष्ट्वा सद्दृशमाप च ॥ ३७ ॥ क्ष्मादि प्रेक्ष्य
किं बोधिर्नाजनि प्रतिमादिवत् ?। तत्किं स्यात् पूज्यता तेषां, न चेत्काऽत्र नवा मतिः ॥ ३८ ॥
सत्यं परं न तत्तत्स्था-कृत्यादेः किन्तु चिन्तया। तद्रूपेण समं विश्व-भावानामत्र नैव तत् ॥ ३९ ॥
देवत्वोल्लेखतस्तेन, प्रोक्ततत्त्वव्रजस्य च। अन्वीक्षणात्सुदृष्टित्वं, तत्पूज्येयं न चेतरत् ॥४०॥ अभव्यस्येव



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भव्यस्य, साधोर्दृष्टेः सुदर्शनं। प्रादुर्भवेत्तथाप्यन्त्ये, पूज्यता सद्गुणत्वतः ॥ ४१ ॥ गुरूणामुपदेशेन, स्याद्यथा सद्गुणार्जनं। दुष्प्रतीकारताऽऽम्नाता, ततश्चैषां तथेह तु ॥४२॥ यथोपकरणं साधोश्चारित्रोत्पादकं ततः। पादादिना न संस्पृश्यं, तथात्वे तु विराधना ॥४३॥ तथैषा सद्दृशो हेतु-स्तदाशातनवर्जनं। यथा तीर्थकृतां शक्रा, दंष्ट्राणां सुरसद्मनि ॥४४॥ न वृक्षादिर्धियां हेतुः, समेषां तत्त्वसंश्रितां। यथार्चादि ततः सिद्धो, भेदः स्पष्टोऽनयोर्द्वयोः ॥४५॥ स्त्रीत्वसाम्ये प्रसूवध्वो-र्यथा स्पष्टा भिदा मता। तथा चेतनतासाम्ये, हेतोः पूज्यत्वसङ्गतिः ॥४६॥ पञ्चमेऽङ्गे नतिर्विद्या-जङ्घाचारणसाधुभिः। चैत्यानां विहिता पूज्यै- स्तत्किं विस्मरणं गतम् ? ॥४७॥ नच ज्ञानं यतस्तत्र, तत्रत्यानीति भाषितं। ज्ञानं त्वेकं न तत्रत्यं, नचाश्रद्धानकौ मुनी ॥४८॥ ज्ञानस्य वन्दनं व्योम्नि,स्थितेनाधातुमीश्यते। अवतारात्तु चैत्यानां, नतिर्बिम्बाद्यपेक्षया ॥४९॥ अपि चात्रैत्य वन्दन्त, इत्युक्तौ प्रतिमानतिः। स्पष्टात्रैवात्र चैत्यानां, सद्भावश्च ध्रुवस्ततः ॥५०॥ ज्ञातधर्मकथायां न, किं द्रौपद्याऽर्चिता प्रभोः ?। अर्चा, तथा च खाद्यानां, किम्बुत्सूत्रमजल्पितैः ॥५१॥ आनन्देनान्तिमाईन्त्यान्वितस्य पुरतः कृता। सन्धाऽन्यस्वीकृतार्चानां, नत्यादावर्हतां सका ॥ ५२ ॥ न स्याद्विनार्हतामर्चा-मेवं तस्य प्रजल्पनं। अम्बडोप्याख्यदाद्याङ्गोपाङ्गेऽनूनमिदं खलु ॥५३॥ तथाचाजीवताहेतोर्न न नम्या जिनाकृतिः। भावना तत्त्वगा सिद्धिं, ददाति भविनां द्रुतम् ॥५४॥ यथा लिपिर्नता ब्राह्म्याः, सूत्रादौ गणधारिणा। ज्ञानाङ्गत्वात्तथा नेयं, किं नव्या सद्दृगं गतैः ? ॥५५॥ यथाऽजीवं शबं साधो-र्नम्यते धार्मिकैर्व्रतं। संस्मृत्य, कं तथा स्तुत्या, जिनार्चा न गुणेक्षिभिः? ॥५६॥ यथोत्सर्गं प्रपन्ने स्यात्, साधौ फलोदयो ध्रुवः। शुभाभिसन्धेर्नमनात्, तथैवात्र विभाव्यताम् ॥५७॥ यथोपकरणे साधोर्नाशिते तद्गुणाश्रितः। तीव्रो मन्दः कर्मबन्ध-स्तथात्र प्रतियोगिनः ॥५८॥ यथा कार्ये समेऽप्यर्ह-दुपसर्गे भवोदधिः। अनन्त इतरत्राल्पस्तद्वद्



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गुणगणेक्षया ॥ ५९ ॥ यथादानं यथापात्रं, फलत्यत्यन्तसम्पदः । अशनादेरजीवस्य, गुणभृत्पात्रकाङ्क्षिणाम् ॥६०॥ यथाद्रव्यं यथा श्राद्ध–गणस्य फलसम्भवः । अजीवस्य गुणाङ्गत्वमाश्रित्यायं न चान्यथा ॥ ६१ ॥ इति प्रतिमापूजासिद्धिः अपूर्णा ॥

## प्रतिमाष्टकम् (३३)

विकारं स्त्रीचित्रात् पुनरघभयं नारकगता–कृतेः पापं चाङ्गोद्भवमलुलायाहतिभवं । जिनेन्द्रैः सद्दक्षाः समवसरणेऽर्चाः सुरकृताः, नतिं ब्राह्मयाः शास्त्रे सुदृगभिसमीक्ष्याश्रयंकृतिम् ॥१॥ कुमारः श्रीआर्द्रोऽधिगत उदयं बिम्बकलनात्, तथा विप्रे शय्यम्भव उदयमागात् किमु न दृक् ? । न नेमुश्चैत्यानि प्रवचनधरा अत्र मुनयः, न देवैद्रौंपद्याऽर्चनमघभिदेऽकारि किमु वा ? ॥२॥ उपाङ्गे आद्ये किं सकलनगराख्याननिगमे (कषे) बहून्याख्यचैत्यान्यनघमतिकस्तत्प्रतिपुरं । न बुद्धया शेषं किं विदसि भुवनं चैत्यनिभृतं, न चास्तिक्यं धृत्वा भवति सुजनो वक्तृविमुखः ॥३॥ यदारम्भं ब्रूते जिनपतिसमार्चासु न तदा, स्वयं दानं यानाभिसरणनमस्योपवसनं । सुवर्षायां श्राद्धैः कृतमनुमतिं किं नयसि भोः, शुभो भावश्चेत्तेऽवनमभिसरस्यत्र नहि किम् ? ॥४॥ न निष्क्रान्तौ मृत्यौ विविधविधिना सत्कृतिकृतौ, वधो जीवानां किं भवगतिविधिश्चेत्किमु कृतः ? । मुनिं निश्चित्यैतत्क्षणमभिनयन् सर्वविरतिं (०ष क्षण उदयवान् सर्वविरतं) श्रुताल्लाभश्चेत्ते किमु जिनवरार्चासु न मतः ? ॥५॥ वितन्वन् सामायं वदसि च भदन्तेतिवचनं, मृषेदं किं ते न किमु गुरुपदस्पर्शनवचः ? । नमस्यायां सूरेर्वितरणमवग्राहविषयं, स्वयं वाञ्छन् विद्वन्



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

महनमभवे नेच्छसि किमु ? ॥६॥ विना श्रौतीं वाणीं प्रतिगृहममत्राम्बुजघनं, समाकर्षन् वेषं श्रुतशतविरुद्धं निविशसि। गुदादेर्मोकेनाशुचिमपनयन्नार्त्तवदिनान्, पवित्रानाख्यंस्त्वं किमु न भविता म्लेच्छसदृशः ? ॥७॥ समुत्तीर्णं श्रौतात् पथ उदितमिथ्यात्वगरलं, समाशास्तुं मीत्या जिनवचनलुम्पाकयमिनं । इदं सङ्क्षिप्योक्तं विपुलमतिना पुण्यविमल–सुविज्ञप्तेनालं भवभयहृदानन्दगणिना ? ॥८॥ इतिप्रतिमाष्टकम् ।

# जिनवरनुतिः (३४)

भगवन्नपूर्ववस्तूनि, तानि यानि स्मराम्यहं। त्वां स्तुवेऽतः परो हर्षोऽन्येषां मे स्तवनात्तव (था) ॥१॥ तव भाग्यभराक्रान्तं, तथाभव्यत्वमादितः । कृतं न यत्त्वयाऽन्यैश्च, त्वय्यपूर्वमजायत ॥२॥ ततो जिनभवे शक्रैः, पुरुषोत्तमता तव । स्तुताऽऽदौ येन सा मूलं, तवैश्वर्यस्य नापरम् ॥३॥ न तत्त्वयाऽन्यतो लब्धं, तदर्थं न च ते क्रिया । तव स्वभाव एवायं, नैवान्येषां तु जन्मिनाम् ॥४॥ भ्रान्त्वाऽऽवर्तान् स्वयं सद्दृग्, जातो गुरुनिमित्ततः। अतः शक्रैः स्वयंबुद्ध–तयाऽस्तावि च्युतिक्षणे ॥५॥ अन्येषामिव भगवंस्ते, सद्दृष्टिर्गुरुयोगतः। गौणस्तत्र गुरुर्येन, तस्यास्त्वं जिनराड् यतः ॥६॥ अतस्त्वङ्गीयसे स्वामिन्नादौ बोधे हरिव्रजे। स्वयम्बुद्धतया नैवं, परेषां सोऽभिजायते ॥७॥ आदौ क्रमेण वा तेऽभूत्, वरबोधिः स्वभावतः । यत्तदा ते गुरुर्न स्यान्नियमाद्वरबोधिमान् ॥८॥ आश्चर्यं जिन! ते बोधौ, वरे यत् स्वयमुद्धृतिम् । अप्राप्तोपि परान् जीवान्–भवाब्धेरुद्दिधीर्षसि ॥९॥ यथा यानाधिपो यान–मारूढान् पारयत्यलं । स्वपारं तु न चैच्छत्सः, स हि तस्यानुषङ्गिकः ॥१०॥ तथा भव्यान् समस्तांस्त्वं, निनीषुर्मोक्षमव्ययं । स्वस्य मोक्षमनीप्सुः सन्, विदधासि प्रसङ्गतः ॥११॥ युग्मम् ॥ असम्भवीदं ते वस्तु,



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जगदुद्धरणात्मकं । दत्त्वा जिनपदं जातं, तव भाग्यात् फलेग्रहि ॥१२॥ ततोऽर्हदादिभक्तिं त्वं, सर्वाङ्गितारणेच्छया ।
विदधत् बद्धवान् तीर्थ-करनाम गुणालयम् ॥१३॥ तदा त्वं भगवन् ! सर्व-संसारक्षपकोऽपि सन् । जन्मत्रयं च-
कर्थान्त्यं, शेषं जीवोपकृत्तया ॥१४॥ परेऽव्ययपदं गत्वा, धर्मोद्धाराय संसृतिं । आगच्छन्तीति यद्वाक्यं, मृषा ते
वृत्ततः कृतम् ॥१५॥ संसृतेः क्षय आरब्धे, शेषं जन्मत्रयं तव । नासम्भवि परेषां तु, सम्भवी न भवः शिवात्
॥१६॥ सुरलोकोद्भवामृद्धिं, त्यक्त्वा गर्भाशयं विशन् । अशुचिं न शुशोच त्वं, महत्त्वं ते कियद् ब्रुवे ॥१७॥
यथा रत्नवणिक् ताप-श्रमादिखेदमाप्नुवन् । लाभार्थी गणयेन्नैव, तं तथा त्वं भवव्यथाम् ॥१८॥ यतस्तीर्थ-
करो भूत्वा, जगदुद्धारहेतवे । तीर्थस्थापनवाञ्छस्त्वं, न व्यथां तामजीगणः ॥ १९ ॥ अपूर्वं ते जगत्यर्हन्,
गर्भागमनमात्रतः । कल्याणकमहं सर्व-सत्त्वसौख्याय तेनिवान् ॥२०॥ सिंहासनानि शक्राणां, निश्चलान्य-
चलंस्तदा । पेठुः शक्रस्तवं तेऽपि, स्तोतुं त्वां भाग्यनिर्भरात् ॥२१॥ लोकानुभावतो जात-स्तदोद्योतो जगत्त्रये ।
अपूर्वं जिन ! तेनेदं, सदाऽपूर्वं परं किमु ? ॥२२॥ स्वप्नांश्चतुर्दशोद्दीप्रांस्त्वत्प्रभावात् च्युतिक्षणे । माताऽप-
श्यन्न द्रष्टुं यान्, चक्रिमातापि शक्तिभाक् ॥२३॥ अबाह्यस्तेऽवधिः प्राच्याद्भवादत्रागतावपि । शुद्धान्यप्रति-
पातीनि, गर्भे ज्ञानानि त्रीण्यपि ॥२४॥ वृद्धिस्ते जठरे मातु-र्गर्भगे त्वयि नाभवत् । अकृताकारितं चित्रं,
महतां लोकभावजम् ॥३५॥ गर्भगस्यापि कायस्ते, न रुधिरादिकल्मषैः । लिप्यते महता चित्रं, चरित्रं
केन चिन्त्यते ? ॥२६॥ कुलं ते गर्भगे स्वामिंस्त्वयि राज्यादिवृद्धिमत् । नियमात्स्यात् सुरा वाऽपि, तथा
तद्विदधत्यपि ॥२७॥ लघुः कायोऽपि ते स्वामिन्, स्नापितो देवनायकैः । सर्वैः सुराचले कोट्या, कलशैः
सुमहत्तमैः ॥२८॥ त्वयि भाग्यभराऽचिन्त्यो, यज्जन्माहनि सोढवान् । भक्त्योदस्ताम्बुसम्भारं, मेरौ सर्वैः
सुरेश्वरैः ॥२९॥ जगत्यस्ति प्रभो ! बाल-स्त्वां विहायापरो नहि । यो विना स्तन्यपानेनै-धते पुष्टाङ्गवान् भवान्



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

॥३०॥ सञ्ज्ञाकालेपि दुःखं नो, जनन्या दत्तवान् विभुः । अवागपि व्यधात्सञ्ज्ञां, बोधो मातुर्यथा भवेत् ॥३१॥ आजन्मातिशयास्तेऽर्हं–श्चत्वारो देहजा न ये । परैराप्यास्ततस्ते स्यु–र्भावा अतिशयाह्वयाः ॥३२॥ कल्याणकानि पञ्चापि, चतुस्त्रिंशच्च ते जिन ! । अतिशया जगत्यां न, प्राप्या अन्येन केनचित् ॥३३॥ एवं जिनस्य नुतवान् जगतो ह्यपूर्व–वस्तुप्रदर्शनपरेण नवेन भक्त्या । माहात्म्यमाप्यमपुनर्भवजैः परैर्न, वाञ्छा जिनस्य नुतये सततं ममास्तु ॥३४॥ इतिजिनवरनुतिः ।

## देवद्रव्य–द्वात्रिंशिका (३५)

नत्वा नतं देवगणैर्जिनेशं, ज्योतिःप्रसा–रोन्मथितान्धमोहं । यदीयभक्त्या चिरसञ्चितैनः, विलीयतेऽर्केण तमस्ततीव ॥१॥ परिग्रहो यद्यपि शास्त्रकारै–रुक्तः सदा सात्वविघातहेतुः । तथापि त्वद्भक्तिवशान्मुनीश !, स सञ्चितस्तीर्थकरत्वहेतुः ॥२॥ अर्थो यदा स्याद्विषयेप्सयाऽऽत्तः, संरक्षितो वर्धित एव वा स्यात् । तदाऽऽर्त्तध्यानं प्रवदन्ति विज्ञा, भक्त्या जिनेशस्य तु धर्मवृद्धिः ॥३॥ जिनेशितुर्नो तनुवाग्मनांसि, तथापि भक्त्याऽभिधया युताऽऽकृतिः । तथैव निष्किञ्चनमार्हतानां, देवं विनिश्चाय शुभाय सोऽर्थः ॥४॥ पृथ्व्यादिहिंसापि जिनालयादौ, कृता न भक्त्या भववर्धिनी स्यात् । यथा सुभावेन तथाऽर्थवृद्धिः सद्धर्मवृद्ध्यै विहिता वृषाय ॥५॥ अर्थेन पूजा जिनबिम्बराजेर्वृद्धेन भव्यालिविबुद्धये स्यात् । विध्याति संसारदवानलोऽतो, मुक्तश्च भव्यव्रजमुक्तिहेतुः ॥६॥ एवं समीक्ष्योग्रफलं सुबुद्ध्या, चैत्यस्वरक्षाकृतमामनन्ति । परीतसंसारजिनाधिपत्व–मुख्यं त्वाप्नोति विवर्धकोऽस्य ॥७॥ चैत्यस्वविघ्नापहतौ मुनीनां, पाराञ्चिके शेषमपि त्रुटेद्व्रत । आतापनायाः कृतिरप्युपेया,



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

राजादितुष्ट्यै मुनिभिस्तदर्थम् ॥८॥ शक्तौ हि कुर्यादभिचारमाप्तश्चैत्यार्थमाश्रित्य न तत्र पापं। कल्पं जिनानामधिगत्य साधुः, कुर्यादुपेक्षां भवभाजनं सः ॥९॥ प्रोवाच शास्त्रे हरिभद्रसूरिश्चैत्यार्थरक्षादिविधौ फलं महत्। यच्चैत्यद्रव्यं जिनशासनस्य, प्रभावकं ज्ञानदृशोर्विवृद्ध्यै ॥१०॥ केचिद् वदन्त्यत्र जिनागमानां, रहस्यमज्ञाय मुनीन्द्रवृन्दम् । मुख्यं यतो ग्रामतयोदितं तच्चैत्यात्ततोऽस्य द्रविणं तदर्थम् ॥११॥ न तेऽवबुध्यन्त इहास्ति न क्रमो, ग्रामप्रकारे विदुषां प्रशस्तौ। यच्चैत्यरिक्थांशकृता मुनीनां, शय्या न कल्प्या गदिताऽऽगमेषु ॥१२॥ प्रभावना या जिनशासनस्य, प्रोक्ताऽस्ति चैत्यद्रविणस्य वृद्धौ। न सा मुनीनां कृत आश्रयादेस्तद्वन्दनार्थे तु मुनीन्द्रसङ्गमात् ॥१३॥ आप्तोपदेशाज् जिनशासनस्य,प्रभावना ज्ञानदृशोश्च वृद्धिः। शस्ता मुनीन्द्रैर्हरिभद्रवर्यैः, पञ्चाशकादिष्ववलोक्यतां तत् ॥१४॥ न तेन चैत्यार्थमुपाहितं स्वं, ज्ञानादिकार्ये सुधीभिर्नियोज्यं। यदाहुरर्च्या जिनरिक्थमाप्त, तत्रैव योज्यं न परत्र विज्ञैः ॥१५॥ दत्तं भवेद्वा मनसा वितीर्णं, विनिश्चितं वा जिनभक्तिकार्ये। यद् द्रव्यमेतज्जिनद्रव्यमाहुर्विज्ञा जिनोक्तिप्रतिबद्धरागाः ॥१६॥ मूर्त्तीश्च जैनीर्मनसा निधाय, जिनेश्वरं वा गुणरत्नवार्द्धिं। कृतं हि भक्तादि मुनीन् प्रतीत्य, कर्मेदमाप्ता न समामनन्ति ॥१७॥ युज्येत लातुं यमिनां तदेतत्,सूत्रोदितं किं न मतं भवद्भिः?। देवस्वभोगो नहि सूत्रकृद्भि–रुक्तो भवेन्मोक्षसुखैकतानैः ॥१८॥ पूजां जिनानां हृदये निधाय, भक्तं विदध्यात् कथनाद्ध्रुवं वा। औद्देशिकं तन्न मतं यदत्र, तदत्र सूत्रस्य महाशयत्वम् ॥१९॥ आज्ञां प्रमाणीकुरुते सुबुद्धिर्यस्तस्य नास्त्यत्र कदापि दोषः। न निश्चितं तत्र यतो ह्यधिकं, सर्वं स्वभोगे गृहिणामुपैति ॥२०॥ व्याख्यानभूमिं जिनमार्गवृद्ध्यै, कुर्वन्ति देवा भगवत्सुभक्त्या। महर्द्धिको यत्र समैति नो वा, जाता जिनानां समवासृतिर्वा ॥२१॥ ततो न तद्भोगभवं मुनीना–मंहो न चात्रातिचरेन्मुनीशः। भिन्नोऽस्ति वा कल्प इहाकृतीनां, भावात् यतस्तद्दृशि भक्ष्यमन्नम् ॥ २२ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जिनेश्वरे नाङ्गनया क्रियेत, स्पर्शस्तथा किं जिनबिम्बवृन्दे ?। भक्त्यर्थमत्रोद्यमनं विशेषात्, पार्श्वे स्थितिं तद्विबुधास्त्यजन्ति ॥२३॥ धर्माभिधानो श्रमणो यथेच्छं, जगाद यद्देवगृहान्तरायैः। उत्सर्पणादि क्रियते न तत्कं, चैत्यस्वमेतन्न विदां विधेयम् ॥ २४ ॥ जिनेन्द्रचैत्यान्तरुपासकानां, वाचंयमानां च निषिद्धमेव। स्वकार्यमुग्राघनिबन्धनत्वाद्विहाय चैत्याऽऽकृतिकार्यमग्र्यम् ॥२५॥ किञ्चाऽऽयमेनं जिनराजबिम्बपूजार्थमार्याः कथयन्ति शास्त्रे। उत्सर्पणायाः स्वमुशन्ति श्राद्ध-विधौ गणेशा जिनद्रव्यमेव ॥२६॥ तदन्यथाकारकृतौ कथं न, देवायनाशो ? न ततश्च दुर्गतिः। भवेदनन्ता किमु ? तत्समग्रैर्धर्मो मुनीशैरखिलैर्निरस्तः ॥२७॥ तेनोदितं यज्जिनराजमूर्त्ते-रुत्सर्पणेन क्रियतेऽर्चनादि। साधारणं तद् द्रविणं समेषु, श्राद्धानगारादिषु तन्नियोज्यम् ॥२८॥ एवं वदन् सोऽखिलसाधुवृन्दै-र्जैनाञ्चनो द्राग् विहितो बहिस्तात्। स आलजालं बहु लपवांश्च, निन्दामवापाखिललोकमध्ये ॥२९॥ आदौ जगौ सोऽत्र न वाङ्मयोक्तं, समाहितेऽस्मिन् परथा व्यलापीत्। आरात्रिकादौ न विधेयमेतत्, शास्त्रेण तत्रापि निदेशितेऽवाक् ॥ ३० ॥ यथा पराधीनमतिर्यदृच्छा-माश्रित्य जल्पेन्नहि सत्यसीम्ना। तथाऽत्र यः कश्चिदुवाच चैत्य-निवासिभिर्द्रव्यमिदं प्रवृत्तम् ॥३१॥ तथाच तत्रद्धरिभद्रमुख्यैः, संवेगिधुर्यैर्जिनचैत्यहेतोः। प्रोक्तं जिनस्वं तु विवर्धनीय-मिति प्रबुद्धैः श्रुतमर्चनीयम् ॥३२॥ इत्थं तत्त्वावगमविधिनाऽऽस्थेयमाप्तोक्तमात्मन्!, चेत् स्वम्मार्गे नयितुमभिलाषोऽस्ति स्वस्याघभीतेः। नह्यन्धानां भवति सुखकृद्यानमाश्रित्य दुर्गं, तत्सूत्रोक्तं मुनिगण! सदा मन्यतामुच्यतां च ॥३२॥ इति देवद्रव्यद्वात्रिंशिका ॥

## रात्रिचैत्यगमनम् (३६)

ननु जाते सूर्यास्ते चैत्यालये देवान् वन्दितुं कल्पते नवेति ? चेत्। विहाय खरतरोत्पत्तिकालं न



P.P. Ac. Gunratnasuri M.S.        Jun Gun Aaradhak Trust

केनापि तन्निषिद्धं, प्रत्युत मूलानुयोगरूपायां वसुदेवहिण्ड्यां बहुशः पूजाप्रदीपारात्रिकादिविधानं प्रतिपादितं। भगवतां श्रीमदर्हतामभिषेकस्तु जन्ममहे रात्रावेव भवति। ननु च श्रीमति महानिशीथे श्रावकाणामभिग्रहे प्रतिपादितमेवं–'तत्थ तुमे पुव्वण्हे पाणंपि न चेव ताव पायव्वं। नो जाव चेइयाइं साहूवि अ वंदिआ विहिणा ॥ मज्झण्हे पुणरवि वंदिऊण निअमेण कप्पए भुत्तुं। अवरण्हे पुणरवि वंदिऊण निअमेण सुअणंति ॥, एष पाठः स्पष्टतया ज्ञापयति यदुत–शयनकालो जायेत श्रावकाणां यावत्तावत्कालं जिनचैत्याना-मुद्घाटत्वं श्रावकश्राविकाणां जिनवन्दनादि चानिवार्यमेव। आरेकतेऽत्र खरतरसन्तानीयो यदुत–'अन्नाण सावियाण अकालचारित्तदोसभावाओ। ओसरणंमि न गमणं दिवसतिजामे णिसि कहं ता'? ॥ १ ॥ इतिशास्त्रवचनात् स्पष्ट एव श्राविकाणां जिनचैत्यगमननिषेध इति चेद्। नैषा गाथा पूर्वाचार्यग्रन्थीया, किन्तु स्वाग्रैरेव स्वमततततये तता। किञ्च–भगवतां श्रीमतामर्हतां प्रथमचरमप्रहरयोर्देशनाप्रवृत्तिरागमप्रसिद्धाप्यनेन साध्वीश्राविकारूपद्विविधसङ्गगमनेनावरुध्यते। किञ्च–स्वविमानेन सूर्यचन्द्रमसोः कौशाम्ब्यां श्रीमतो भगवतो महावीरस्य वन्दनार्थं यदाऽऽगमनं जातं तदा नक्तकाले मृगावतीचन्दनबालयोरागमनादिजातो वृत्ता-न्तोऽप्यपलप्यते अनया गाथया। भगवन्तोऽभयदेवसूरयोऽप्याहुः पञ्चाशकवृत्तौ– अभिग्रहः–चैत्यवन्दमकृत्वा मया न भोक्तव्यं न वा स्वप्तव्य'मिति। सिद्धमनेनापि रात्रिशयनकालं चैत्यानां वन्दनं श्रावकश्राविकावर्गस्य, न च चैत्यप्रवेशेन विना भावि तदिति। 'सूरत्थमणे तित्थयरो धम्मं कहेउमुट्ठिओ थेरी गय'त्ति श्रीआवश्यका-दिपाठोऽपि श्रीमदर्हतां चतुर्थप्रहरे द्वादशानां पर्षदामग्रे धर्मदेशना, तत्र स्त्र्यागमश्चेति स्पष्टं ध्वनयति। किञ्च–न चैषा गाथा खरतरसन्तानीयग्रन्थेभ्योऽन्यत्र क्वापि ग्रन्थे, न च तद्भागो भावार्थो वोपलभ्यतेऽस्याः। खर-



P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

तरसन्तानीयाश्च श्रीउमास्वातिवाचकश्रीहरिभद्रसूरिप्रभृतिकर्तृकत्वेनाचारवल्लभतरङ्गिणीप्रभृतिकल्पितनाम्ना कल्पितगाथानां सामाचारीशतकादिषूल्लेखान्नैव ग्रन्थगाथा कल्पनाशिल्परहिता इति स्वप्नेऽपि सज्जनाः प्रतीयन्ते। श्रीअभयदेवसूरिसन्तानीयश्रीगुणचन्द्रसूरिकृतश्रीमहावीरचरित्रस्य प्रशस्तौ 'सुविहिये'त्यस्य स्थाने 'खरयरिये'ति परावर्त्तकरणात् पाठपरावृत्तिकुशलास्ते। आदर्शश्चैष वटपद्रीयराजकीयपुस्तकालये तथा परावर्त्तितपाठसाक्षिको नेतुं दृष्टिपथं सज्जनानां सुगम एव। प्रतिश्चेयं जेसलमेरुखरतरप्राचीनभाण्डागारसत्का। विल्हकविकृतगुर्वावल्यां च 'सुरवरवरलद्धे'त्येवंविधं पाठं परावृत्त्याप्रस्तुतस्यानधिकृतस्य 'खरयरवरलद्धे'ति परावृत्तेः पाठपरावृत्तिपटुताप्रवीणा एते खरतराः। श्रीअर्थदीपिकावीतरागस्तोत्रवृत्तिप्रभृतिषु श्रीअभयदेवसूरीणामुपपदे 'खरतरे'ति शब्दस्य नूतनस्य करणात् सप्तदशशतीयघटितसत्यव्रतजिनचन्द्रेणारोहितानां (तेषु) प्रत्नतरग्रन्थेषु कल्पितपरम्पराद्यालेखाङ्कितपुष्पिकादिदर्शनाच्च पाठप्रक्षेपप्रयत्नप्रतिष्ठाः खरतरा इति कः खलु न मनुते? माध्यस्थ्यका दृशा दर्शक इति। किञ्च—श्रीवसुदेवहिण्ड्यां प्रियदर्शनालम्भेऽधिकृते सीमणगपर्वते ह्रीमन्ताचराभिधाने नगे श्रीवासुदेवादिभिर्निशायामेव श्रीजिनप्रतिमानां पुरतः प्रदीपादिपूजा विहितेति स्पष्टं दर्शनात् कः सकर्णः सूत्रोत्तीर्णं श्रोतुमुत्सहेत?। श्रीआचारोपदेशे तु स्पष्टमादिष्टं दैवसिकप्रतिक्रमणगुरुविश्रामणाद्यनन्तरं शयनार्थं स्वगृहगमनावसरे यत्-'ग्रामचैत्यं ततो यायात्'दिति। कतिचिदर्वाग्भाविनः सुविहितास्तदनुकुर्वन्त्यर्थापत्त्याऽशतश्च तत्तेषां सूक्ष्मेक्षिकाराहित्यं मुग्धजनप्रियत्वापेक्षां वा द्योतयति, न त्वेतादृशेन प्रत्नग्रन्थप्रतिपादितानां सुविहितोपदेशानां व्यवच्छेदः अकर्त्तव्यता वाऽऽसादयेत् सिद्धिं, बाधां वा विद्ध्यात्तत्सुविहितोदितीनामिति। खरतरसन्तानीयमान्यानां जिनवल्लभानामुत्सूत्रसपादितता श्रीमलयगिरि-



P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

सूरिभिः श्रीजीवाभिगमप्रज्ञापनावृत्त्योः संहननमाश्रित्य स्पष्टं सूत्रिता। 'अट्ठमीचउद्दसीसु प्रभावइदेवी भत्तिराएण सयमेव राओ णट्टोवहारं करेइ', त्ति दृष्ट्वापि निशीथोल्लेखं कः खलु न श्रद्दध्याच्छ्राद्धो रात्रावपि जिनमन्दिरे ललनानां निःसंशयं प्रवेशं ?। किञ्च–तावय दिवसावसाणे सूरो अत्थं समल्लीणो ॥१॥ णयरीए मज्झयारे दिट्ठं चिय जिणहरं मणभिरामं। हरिसिय रोमंचइया तत्थ पविट्ठा परमतुट्ठा ॥२॥ थोऊण अच्चिऊण य जिणपडिमाओ परेण भावेण'। इति विमलाचार्यकृतपद्मचरित्रे प्राचीनतरमेनं पाठं दृष्ट्वापि खरः शर्करामिव मक्षिका चन्दनमिव च खरतरमोहमदिरामत्ता जिनालयप्रवेशं वेश्यागवमन्दिरमिव नियतदर्शनपूजायोग्यमिति मन्वानाः सर्वकालदर्शनपूजायोग्यं जिनमन्दिरं न श्रद्दधते। 'तत्थेव जिणहरे ते रत्तिं गमिऊण अरुणवेलाए'॥ त्ति। एवं ज्ञात्वाऽपि सिद्धान्तचरित्रयुक्तिभिः सिद्धं रात्रौ चैत्यं गत्वा वन्दनं सपूजं कः खल्वागमानुसारिमतिकः खरवचनानां खरतराणां जिनदत्तोपज्ञं रात्रौ चैत्यगमननिषेधरूपं कर्णकटु भवव्रततिवृद्धिवारिदायमानं श्रोतुमप्युत्सहेत ?। ननु साध्वालये रात्रौ गम्यते स्थीयते च न वेति ?, गम्यते स्थीयते च, साधुसमीपे सामायिकावश्यकपौषधक्रियाणां समादरोक्तेरिति चेत्। चैत्यगृहेऽपि ता उक्ता एव। ननु तत्राशातनाप्रसङ्ग इतिचेत्। सत्यं, वर्जने विधिः। 'दुब्भिगंधमलस्सावी तणूरप्पेसऽण्हाणि' त्तिवचनात् स्पष्टो निषेधः अवस्थानस्य चेत्। सत्यं, साधव एवंविधा, न गृहिणः, ते च नैव तथा, प्रत्युत निश्रितचैत्यसमवसरणविध्युक्तिप्रतिपादकः सिद्धान्तः। किंचाधिवासनादिष्ववनामनार्थमनेकसधवनारीणां निशायामागमनं श्रीहरिभद्रसूर्यादिभिरुक्तं। भवताऽपि तत्कार्यत एव ॥ इति रात्रिचैत्यगमनम् ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

# देवतास्तुतिनिर्णयः (३७)

कश्चिदाहात्र सूरीणां, प्रातिकूल्यं चिकीर्नरः। किं नतिं तनुथाऽऽचार्याः!, सुराणां चैत्यवन्दने? ॥१॥ देवा अविरता यूयं, विरता सर्वपापतः। मुनयोऽपि तथा श्राद्धाः, श्राद्धयश्चांशाद् व्रतोद्यताः ॥२॥ हीनेषु न गुणाय स्याद्, नतिः स्याद्दोषवृद्धये। अन्यथा दोषयुक्ताः किं, त्यज्यन्तेऽपरदेवताः? ॥३॥ असदेतद्यतो वैया–वृत्त्यादिकारिणः सुरान्। शासनस्य स्मरन्तो न, दोषलेशं समीयुरति ॥४॥ नार्चादिनुतिवत्तत्र, वन्दनेत्यादि कथ्यते। प्राक् सूत्रे नैव चोत्सर्गे, कथं ब्रूषे वितथ्यकम्? ॥५॥ त्वं च सर्वाः स्तुतीर्दैवी–नतियुक्ताः किमीक्षसे?। येन सर्वं श्रुतं त्यक्त्वा, त्यजस्यमरसंस्तुतिम् ॥६॥ नमोऽर्ह्यं तु प्रकटं, ख्यात्युत्कर्षं सुरावधिम्। का हानिस्तत्र यद्देवाः, सन्ति शासनसेवकाः ॥८॥ शय्यम्भवा जगुस्तस्माद्, देवा धर्मवतो नरान्। नमस्यन्तीति प्रकटं, बुद्ध्वा मार्गमनुव्रज ॥९॥ जिनेन्द्राणां समस्तानां, कल्याणकमहोत्सवान्। देशनाभुवमेकोनविंशतिं ह्यतिशायिनां ॥१०॥ उत्कर्षमेवं देवानां, विदन् को न नतिक्रियाम्। उचितां शुद्धधीः कुर्यात्, सम्यग्लाभविधित्सया ॥११॥ जिनोऽपि देशनारम्भे, त्रयोदशगुणस्थितः। सङ्घं किं तीर्थशब्देन, नमत्यर्वाग्गुणस्थितम्? ॥१२॥ तीव्रधर्मानुरागेण, रक्तोऽयमिति कोणिकं। कथं शशंस भगवान्, कामदेवादिकं च किम्? ॥१३॥ अधोगुणस्थितस्यापि, गुणः स्तुत्यो न किं भवेत्?। श्रेणिकादेर्न किं स्ताव्यं, सम्यक्त्वं क्षायिकं पुनः? ॥१४॥ गणाधीशा न किं सूरीन्, वाचकान् साधुसञ्चयान्। परमेष्ठिस्तुतौ नित्यं, स्तुवन्तीद्धगुणा अपि? ॥१५॥ सर्वज्ञा अपि नत्वा किं, गणिनः पृष्ठतो भुवि। न निषीदन्ति

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

समव-सरणे ? हृदि चिन्तय ॥१६॥ मार्गस्थोऽधःस्थितः स्तुत्यो, न मार्गाद् बहिरास्थितः। अत एव सुरा मिथ्या-दृशस्त्यज्यन्त आर्हतैः ॥१७॥ हीनोऽपि मुनिमार्गेण, शासनस्य प्रभावनां। कुर्वन् सत्यं ब्रुवन् शस्तो-ऽनेकशः शास्त्रकारिभिः ॥ १८ ॥ गुणैः समोऽधिको वाऽपि, यदा नैवापरो मुनिः। सहभावी भवेत्साधो-स्तदा तैरपि सङ्गतिः ॥१९॥ देशनाभुवि देवीनां, पृष्ठतोऽस्थुः किमार्यिकाः ?। श्राद्धश्राद्धी-व्रजाग्रे च, किं सुराः कल्पसंस्थिताः ? ॥२०॥ गुणस्तुतेस्तु देवानां, करणाद्बोधिराप्यते। निषेधात्किं न तस्यास्ते, बोधेः प्रत्यूहकारिता ? ॥२१॥ निषेधयंश्च देवानां, स्तुतिं किं त्वं न शास्त्रतः। प्रत्यनीको भवेऽमुत्र, भविता बोधितोज्झितः? ॥ २२ ॥ बलिं पूर्वं सुरा भूमौ, देशनाया न किं ललुः?। नरेभ्यस्तर्हि किं नैते, नरेभ्यः श्रेष्ठतायुताः ? ॥ २३ ॥ चक्रुः प्राक् साम्प्रतं तीर्थो-दयं कुर्वन्ति भाविनि। करिष्यन्ति सुरास्तत्किं, कृतज्ञः तत्स्तुतिं त्यजेत् ॥२४॥ सुदृग्देवस्तुतिं श्राद्धाः, कुर्वन्तस्ते न सम्मताः। अन्यदेवार्चकाः केऽपि, मतास्ते मतमध्यगाः ॥२५॥ अपराद्धं तव श्राद्ध-वर्गस्य च सुदृक्सुरैः। सन्तोषमापिता यूयं, नूनमन्य-मतामरैः ? ॥२६॥ अन्यदा देवनुत्या चेन्मिथ्यात्वं न तदा किमु। प्रतिष्ठादिविधौ ? यूयं, तत्र तत्र रता यतः ॥२७॥ परः शतानि शास्त्राणां, वचनानि सुरस्तुतेः। ज्ञापकानि विधातॄणि, न किं बुद्ध्या समीक्षसे ? ॥२८॥ 'असहिज्जे'त्यादिसूत्र-मन्यथाकारमाग्रही। माकार्षीः शासनात्कम्प्रं मनस्ते नैव कुर्वते ॥२९॥ न तदीयसहायेन, मार्गोऽसौ साध्यते परं। जिनेशाध्वनि वृत्तानां, विघ्नवृन्दापहाः सुराः ॥३०॥ सहायास्तु श्रुते प्रोक्ता, मुनीना-मपि संयमे। नृपाद्या अपि तत्किं न, हीनोऽपि स्यात् सहायकृत् ? ॥३१॥ इत्थं शास्त्रवचः सयुक्तिकमलं नेत्रे निमील्याचिरं, धृत्वा हृत्कमले निराग्रहमतिर्भूत्वा तनु प्रत्यहम्। सुदृग्देवनुतिं सदादरवतीं प्रेत्याग्र्यबोधिप्रदां, चैत्यानां नमने शिवामरनरानन्दाय प्रोत्साहितः ॥३२॥ इति देवतास्तुतिनिर्णयः ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

# गुरुस्थापनासिद्धिः (३८)



कश्चिदाहात्र सूत्रार्थं, न्यायतोऽनवधारयन् । विरहे एव सूरीन्दोः, क्रियायां स्थापना मता ॥१॥ अत एव यदाऽऽचार्याः, साक्षात् स्युस्तत्र नाकृतिः । प्रतिक्रान्त्याद्यनुष्ठाने, कार्या सूत्रोक्त्यनुश्रितैः ॥२॥ ये च सूरीश्वरे साक्षात्, स्थापनां सति कुर्वते । आग्रहाधीनचेतस्का, ज्ञेया मार्गविराधकाः ॥३॥ अमीषां वचनं सूत्रोत्तीर्णं, यद् भाष्यकारकाः । सामायिके भदन्तेति, शब्दस्यान्वर्थतां जगुः ॥४॥ तथा च विरहे सूरे-रवश्यं स्थापनाक्रिया । विरहे एव न तु, यत्, भावाकृत्योर्भिदा नहि ॥ ५ ॥ अन्यथा देशनाभूमौ, जिने साक्षात् प्रभावति । किं सुराः प्रतिमाश्चक्रु-स्त्रिदिक्षु प्रभुसेवकाः ? ॥६॥ किञ्च-कायोत्सर्गे चतुर्विंश-त्यागमस्तोत्रादिके स्थापनाया अभावे कः, स्थाप्यो जिनतया ननु ? ॥७॥ वन्दने च कथं काय-स्पर्शः सूरेस्तपस्विनां । भवेत् परः सहस्राणां ?, मन्यस्व श्रुतगं वचः ॥८॥ चूर्णिकारा अतो व्याख्यां, कुर्वन्तो वन्दनस्य तु । रजोहृतौ गुरोः पादौ, स्थाप्याविति जगुः स्फुटम् ॥९॥ आभिमुख्ये च सम्बुद्धिर्भदन्तेति पदं तथा । ततो ब्रुवन् भदन्तेति, सूरिं यद्वाऽऽकृतिं वदेत् ॥१०॥ अभिमानग्रहग्रस्तं, मनस्ते तेन जल्पसि । श्राद्धान् साधूँश्च न स्थाप्या, स्थापनेति क्रियाक्षणे ॥११॥ विनाऽक्षस्थापनां सूरे-र्व्याख्याने पापभागिता । शिष्येऽपि श्रोतरि प्रायश्चित्तं सूत्रकृतो जगुः ॥१२॥ योगक्रियाक्षणे शिष्यः, त्रिःप्रदक्षिणयन् गुरून् । त्रिः प्रदक्षिणयेदक्षा-निति शास्त्रगिरं स्मर ॥ १३ ॥ कायोत्सर्गे च निष्कम्पा, दृष्टी रक्ष्या कथं त्वयि । न च निश्चलता भाव-स्तवो येन त्वयीक्षणम् ॥१४॥ गुरोरक्षस्यान्तराले, आत्मनश्च यदा पुनः। पुरतो गमनं कर्तु-र्विधेः किमूदितं श्रुते ? ॥१५॥ आचार्योऽपि गणानुज्ञा-काले शिष्याय मन्त्रयन् । अक्षान् दद्यात्सभामध्ये, कथं तेऽमुष्मिन् प्रभावति ? ॥१६॥ इति स्थापनासिद्धिः।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

## आगमोद्धारककृतिसन्दोहस्य

### द्वितीयो विभागः

**समाप्तः ॥**

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust